ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# दर्शनम् १

## मध्यमा २

## (ધોરણ 12)

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 23.00**

गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्
'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम्-382 010

© गुजरात राज्य शाला पाठ्यपुस्तक मण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकारा: गुजरातराज्यशालापाठ्यपुस्तकमण्डलाधीना: सन्ति।
अस्य पाठ्यपुस्तकस्य कश्चिदपि भाग: केनापि रूपेण गुजरातराज्य-शालापाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**

श्री भा. वं. रामप्रिय:

**लेखनम्**

श्री चिंतन: जोषी (कन्वीनर)

डॉ. जानकीशरण: आचार्य:

डॉ. लक्ष्मीनारायण: भट्ट:

**समीक्षणम्**

डॉ. नारायणपति:

डॉ. कश्यप: त्रिवेदी

**भाषाशुद्धि**

डॉ. लक्ष्मीनारायण: भट्ट:

**संयोजनम्**

डॉ. क्रिष्ना दवे

(विषयसंयोजक : अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह

(उपनियामक: - शैक्षणिक:)

**मुद्रणायोजनम्**

श्री हरेश: एस. लीम्बाचीया

(उपनियामक: - उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुल-परम्परानुसारम् अभ्यासं कुर्वत: संस्कृतपाठशालीय-विद्यार्थिन: लक्षीकृतयप्राचीनार्वाचीनोभयपद्धत्यो: सरस-सरलसमन्वयपूर्वकं गुजरातराज्यमाध्यमिकोच्चतरमाध्यमिकशिक्षणबोर्डद्वारा अभ्यासक्रमसंरचना जाताऽस्ति, एते अभ्यासक्रमा: गुजरातसर्वकारद्वारा मानिता: प्रमाणीकृताश्च सन्ति।

गुजरातसर्वकारप्रमाणितस्य **दर्शनम् १, मध्यमा २ (धो२ण 12)** इति विषयस्य संवर्द्धिताभ्यासक्रमानुसारं सज्जीभूतस्य पाठ्यपुस्तकस्य संवर्द्धितामावृत्तिं विद्यार्थिसमक्षं प्रस्तुन्वन्मण्डलमानन्द-मनुभवति। अस्या: पाठ्यपुस्तकसंवर्द्धितावृत्ते: प्रकाशनात्प्राक् हस्तलिपीनां शिक्षणकार्यं कुर्वद्भि: शिक्षकै: तज्ज्ञैश्च सर्वाङ्गिसमीक्षणं कृतमस्ति। शिक्षकतज्ज्ञानां सूचनानुसारं हस्तलिपिषु योग्यां शुद्धिं कृत्वा पाठ्यपुस्तकमिदं प्राकाश्यं नीतमस्ति।

प्रस्तुतं पाठ्यपुस्तकं सरसम् उपयोगि क्षतिरहितं च कर्तुं मण्डलं सश्रद्धं प्रायतत। तथापि शिक्षणरसिकेभ्य: पाठ्यपुस्तकस्य गुणवत्तावहा: सूचना: स्वीकार्या: सन्ति।

**पी. भारती (IAS)**
नियामक: कार्यवाहकप्रमुख:
ता. 26-10-2020 गान्धीनगरम्

प्रथमावृत्ति : 2020

**प्रकाशक:** – गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन, पी. भारती, नियामक:

**मुद्रक:** –

# मूलभूतकर्तव्यानि

प्रत्येकस्य भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः।*

(क) संविधानं प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रगीतस्य चादरः।

(ख) स्वातन्त्र्याय अस्मदीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनं, अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डितायाश्च समर्थनं तद्रक्षणं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषणायां जातायां तदनुसरणं च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः पृथक् स्थित्वा, समस्तभारतीयेषु सम्मानस्य-समानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धिदायस्य मूल्यं ज्ञात्वा तद्रक्षणम्।

(ज) वनानां तडागानां नदीनाम् रक्षणम् अन्यवन्यपशुपक्षिसहितं प्राकृतिक-पर्यावरणरक्षणं तत्संशोधनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानिकमानसस्य मानवतावादस्य जिज्ञासायाः संशोधनस्य च भावनाबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावुकेन षट्वर्षतः चतुर्दशवर्षं यावत् (6 तः 14) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | पूर्वमीमासांशास्त्रपरिचयः | 1 |
| २. | पूर्वमीमासाग्रन्थानां ग्रन्थकर्तृणां च परिचयः | 5 |
| ३. | धर्माधर्मनिरूपणम् | 9 |
| ४. | ब्राह्मणवाक्यभेदाः | 13 |
| ५. | प्रयोगविधिः | 17 |
| ६. | विधेस्त्रैविध्यम् | 24 |
| ७. | अङ्गत्वग्राहकप्रमाणानि | 29 |
| ८. | श्रुत्यादिबलाबलविचारः | 34 |
| ९. | कर्मभेदविचारः १ | 39 |
| १०. | कर्मभेदविचारः २ | 45 |
| ११. | विध्यर्थविचारः | 50 |
| १२. | नामधेयविचारः | 56 |
| १३. | अर्थवादविचारः | 64 |
| १४. | मन्त्रविचारः | 68 |
| १५. | वेदप्रामाण्यविचारः | 73 |
| १६. | कर्मभेदकप्रमाणानि | 76 |
| १७. | प्रमेयादिविचारः | 80 |

# १ पूर्वमीमांसाशास्त्रपरिचयः

**प्रस्तावना**

मीमांसादर्शनं पूर्वोत्तरमीमांसाभेदेन चास्ति भिन्नं द्विविधञ्च। तत्र पूर्वमीमांसासादर्शनञ्चास्ति खलु जैमिनिमुनिना प्रणीतम्। उत्तरमीमांसां ज्ञानकाण्डस्वरूपां रचितवान् चिरजीवनसम्पत्तिमान् भगवान् व्यासः।

तत्र वेदान्तर्गतयज्ञयागस्वरूपकर्मकाण्डसम्बन्धे समुपस्थितानां विरोधिवचननिचयस्वरूपाणां वाक्यानां समन्वयात्मिक्या दृष्ट्या च एकवाक्यतासंस्थापनमेव अस्य दर्शनस्य मुख्यमुद्देश्यम्। तादृशस्य दर्शनशास्त्रस्य अत्र कश्चन परिचयः दीयते।

**'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' - ईश. मं. २**

इति कर्ममार्गप्रदर्शकमिदं पूर्वमीमांसादर्शनसम्बन्धावच्छिन्नं मन्त्रात्मकं वाक्यम् ।

अस्मिन् मते कर्मण एव अभ्युदयनिःश्रेयसयोः समुत्पत्तिजनकत्वेन तस्यैव प्राधान्येन सर्वतोभावेन च निरूपणीयत्वमवगम्यते। कर्मणा समुत्पन्नं धर्माऽधर्मापरपर्यायभूतमपूर्वमेव साक्षात् कर्मजन्यफलजनकं भवतीति निर्वादितमिदं विषयजातम्।

विचारस्यास्य सर्वत्रैव पूर्वमीमांसादर्शनग्रन्थेषु निरूपणीयत्वेन विशेषतोऽयं विचारः सर्वप्राथम्येन अस्माभिः तत्रैवानुभूतो स्मृतिपथे च नीयते। अयं खलु मीमांसाशब्दोल्लेखोऽपि संहिताब्राह्मणग्रन्थेष्वेव मिलतीत्यपि न तिरोहितमस्ति केषामपि पूर्वमीमासांविदुषाम्।

- **मीमांसाशब्दार्थविचारः**

तत्र मीमांसाशब्दः पाणिनीयव्याकरणानुरोधेन माधातोर्जिज्ञासार्थकात् सन् प्रत्यये तदन्तात् स्त्रियामम्मप्रत्यये ततश्च टाप्प्रत्ययेन निष्पन्नो विचारमर्थं ब्रूते। तथा च विचारशास्त्रम् इति मीमांसाशब्दार्थः फलति। सोऽयं मीमांसाशब्दः प्रथमं छान्दोग्योपनिषदि विमर्शपूर्वकव्याख्यानार्थे प्रवृत्तो दृश्यते। इममेवार्थं स्वीकृत्य संहिता-ब्राह्मण-उपनिषदात्मक वेदराशिप्रतिपादित-गूढार्थप्रकाशनपरेषु ग्रन्थेषु मीमांसाशब्दः प्रचलितोऽभूत्।

- **पूर्वमीमांसाशास्त्रस्य महत्त्वम्**

मीमांसा नाम वेदार्थविचारः। स च वेदार्थनिर्णयार्थः। तस्य च प्रयोजनं साङ्गस्य धर्मस्यानुष्ठानद्वारा स्वर्गादिप्राप्तिः। कर्मानुष्ठानार्थम् अपेक्षितं वेदार्थज्ञानं मीमांसाशास्त्रं विना व्याकरणेन निरुक्तादिना वा न सम्भवति। यद्यपि अधीतन्यायव्याकरणादितत्वस्य वेदवाक्यार्थश्रवणसमनन्तरमेव कश्चिदर्थः प्रतिभाति। तथापि सः किं बाधितः अबाधितो वा? किं स एव तत्र विवक्षितः उत अन्यः? इत्यपि संशयनिरासो मीमांसाशास्त्रं विना न भवितुमर्हति।

तथा हि 'अक्ताः शर्करा उपदधाति'

इति वैदिकं वाक्यमुपलभ्यते। तत्र 'शर्करा' - पदस्य लोष्टखण्डका अर्थः, 'अक्ताः' इत्यनेन तेषाम् अञ्जनं कर्तव्यम्, कृताञ्जनानां चोपधानं कर्तव्यमिति अवगम्यते। उपधानं नाम राशिरूपेण घटनाविशेषः। अत्र च अञ्जनं नाम राशिरूपेण घटनाविशेषः। अत्र च अञ्जनं द्रवदव्येणैव भवति, न वालुकादिभिरिति सर्वविदितम्। तत्रैव सन्देहो भवति केन द्रवद्रव्येण अञ्जनं कर्तव्यमिति। अनेकानि द्रवद्रव्याणि विद्यन्ते - तैलम्, जलं घृतादिकमिति। अयं च सन्देहो न व्याकरणाध्ययनमात्रेण निरस्तो भवितुमर्हति। मीमांसाशास्त्राच्ययनमन्तरं त्वस्य सन्देहस्यपरिहारो नावलोक्यते।

मीमांसाशास्त्रे हि प्रथमाध्यायस्यान्ते 'सन्दिग्धेषु वाक्यशेषात्' (जै.सू. ०१-०४-१९२९) इति सूत्रे 'अक्ताः शर्करा उपदधाति' इत्यत्र तद्वाक्यानन्तरं श्रुतेन 'तेजो वै घृतम्' इति वाक्यशेषेण घृतस्य स्तुतिः क्रियते। तथा च अनेन घृतेन किमपि कर्तव्यमिति, पूर्वं चाञ्चनं कर्तव्यमिति बोधितं भवति। केन साधनेनेति साधनं किमपि द्रवद्रव्येण च अपेक्षते। एवञ्च नष्टाश्वदग्धरथन्यायेन उभयोरपि परस्परसम्बन्धात् 'घृतेनैवाञ्जनम् न तैलादिना' इति निर्णयः सिद्धो भवतीति निरूपितम्। अतश्च मीमांसाशास्त्राध्ययनम् अनिवार्यमिति विज्ञायते।

- **वेदस्य अपौरुषेयत्वविचारः**

वेदः खल्यस्माकं ज्ञानविज्ञानयोः आदिमः स्रोतः। अयमेव च विश्वस्य सर्वसम्मतमादिमं साहित्यम्। अत एव अस्य सर्वविदिते महत्वे किमपि कथनं दिवा प्रज्वलनम्। आस्तिकदर्शनेषु नास्ति किमपि वेदप्रामाण्यविषये संशयस्थानम्। तानि वेदरचनाविषये पूर्णमतभेदमुपस्थापयन्ति।

वेदः पौरुषेयः इति न्यायदर्शनस्य पक्षः। स च पुरुषः ईश्वरः। नैयायिकाः स्वकीयेनानुमानास्त्रेण तस्येमां पौरूषेयतां प्रमाणयन्ति। तेषामनुमानस्यायं प्रकारः 'वेदः पौरुषेयः वाक्यत्वात्, महाभारतादिवाक्यवत्।' अद्वैतिनः वेदान्तिनः पौरुषेयत्वं न मन्वते। परं तेषां अपौरूषेयता मीमांसापेक्षया विचित्रैव। तेषां मते पौरुषेयशब्दार्थः केनचित्पुरुषेण अन्यप्रमाणसाहाय्येन रचितत्त्वमिति। वेदो नास्त्येवंविधः। अत एवापौरुषेय इति। केषांञ्चिदन्येषां प्रमाणानां साहाय्येन सः रचितः नास्ति। एवं सत्यपि वेदान्तिनोऽनेन सममीश्वरस्य रचयितृरूपेण सम्बन्धं स्वीकुर्वन्ति, इदमेव तेषां मीमांसया सह वैमत्यमस्ति। वस्तुत एतावतो ज्ञानराशेः रचना केनापि पुरुषविशेषेण सम्भाव्यो नास्ति। पूर्वाभिहितानुमानप्रकार इव वेदापौरुषेयतायाः साधकोऽयमनुमानप्रकारो नास्ति दोषग्रस्तः।

**यथा**

**वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।**
**वेदाध्ययनसामान्यादधुनाध्ययनं यथा॥** **(मीमांसा न्यायप्रकाशः)**

यदि पुरुषविशेषरूपेण ईश्वरोऽपि कल्प्यते ततस्तेनेश्वरस्य किमपि गौरवमथवा वेदस्यैव गौरवमुपजायते। सर्वज्ञेनेश्वरेण कथमिव वेदरचनायां प्रवृत्तेन भाव्यम्? यदि कश्चित् : सम्बन्ध इष्ट एवं चेत् ततः सः उपदेशकरूपेण भवितुं शक्नोति, अत एव योगदर्शने सः गुरूणां गुरुरित्याधीयते।

अपौरुषेयतां प्रसाध्य मीमांसकैः स्वकीयं महल्लक्ष्यं साधितम् नास्त्यत्र सन्देहः। यदि पुरुषस्य केनापि प्रकारेण प्रवेशोऽत्र स्वीक्रियते ततः पुरुषसम्बन्धभवा अनेके दोषाः अत्र प्रविष्य उपलक्ष्येरन् येन नास्तिकदर्शनैः अस्य व्यापकं प्रामाण्यमुच्छिन्नं कृतं भवेत्। परं विचारकुशलैः अमीभिः तदर्थमवसरो न दत्तः। भ्रान्तयश्च समूलोच्छेदमुपशमिताः।

- **धर्मस्वरूपविचारः**

तत्र बहवो बहुधा धर्मशब्दार्थं प्रकल्पयन्ति।

**तद्यथा** -

- ❒ **सांख्याः** - अन्तःकरणस्य वृत्तिविशेषं यागाद्यनुष्ठानजन्यं धर्ममाहुः।
- ❒ **सौगताः** - ज्ञानस्य ज्ञानान्तरजन्यां वासनाम्।
- ❒ **आर्हताः** - पुद्गलाख्यान् देहारम्भकान् पुण्यविशेषोत्पन्नान्परमाणून्।
- ❒ **नैयायिकाः** - अदृष्टापरपर्यायं विहितकर्मजन्यमात्मनो विशेषगुणम्।
- ❒ **मीमांसैकदेशिनः** - अपूर्वम्।

❒ **केचन अनुमानुयायिनः** - चैत्यवन्दनमेव धर्मः।

❒ **भागवताः** - अयं हि परमो धर्मः यद्योगेनात्मदर्शनम्।

❒ **स्मृतिकाराः** - आचारः प्रथमो धर्मः।

❒ **काणादाः** - यतोऽभ्युदयनिःश्रेयससिद्धिः सः धर्मः।

❒ **अभियुक्तचूडामणयः** - न हि सत्यात्परोधर्मः।

**असूत्रयद्भगवाञ्जैमिनिः-**

एवञ्च लोके बह्व्यः धर्मविप्रतिपत्तयो दृश्यन्ते। एवं बहुधा विप्रतिपत्तिगोचरे धर्मशब्दार्थे चोदनालक्षणोऽर्थो धर्मः इति। तस्य च अर्थः वेदबोधितश्रेयः साधनताको यागादिक्रियाकलापो धर्म इति। ''तानि धर्माणि प्रथमान्यासन्'' इत्यपि श्रुत्या यागादिरूपक्रियाया एव धर्मत्वप्रतिपादनात्। न केवलं श्रुतिरेव किन्तु लोकेऽपि यो हि यागमनुतिष्ठति सः धार्मिक इति समाचक्षते। **'धर्मस्त्वनुष्ठितः पुंसाम्'** इत्यादि पुराणेष्वपि अनुष्ठेयक्रियाया एव धर्मत्वं प्रतिपाद्यते। 'धर्मं चरं' इत्याद्युपनिषद्वचनाच्च क्रियाया एव धर्मत्वम् अवगम्यते।

**आहुरमुमेवार्थं भाट्टपादाः**

**श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः।**
**चोदनालक्षणैः साध्या तस्मात्तेष्वेव धर्मता॥**
**अन्यत्साद्यमदृष्ट्वैव यागादीननुतिष्ठतः।**
**धार्मिकत्वसमाख्यानं तद्यागादिति गम्यते॥**

तथा च चोदनालक्षण इत्यस्य चोदनाप्रमाणकः इत्यर्थः लक्षणशब्दः प्रमाणवचनोऽध्यायवचनश्च दृष्टो मीमांसायाम्। तथा च चोदनाप्रमाणकत्वं धर्मस्य सिद्धम्।

## स्वाध्यायः

**१. रिक्तस्थानं पूरयत।**

(१) कुर्वन्नेवेह कमाणि इति .......... वाक्यं वर्तते। (वेदस्य, पुराणस्य, स्मृतेः)

(२) पूर्वमीमांसाशास्त्रं .......... मुनिना रचितम्। (व्यास, जैमिनि, कणाद्)

(३) विरोधिवचनयुक्तवाक्यानां समन्वयात्मकवाक्यतानिरूपणम् .......... शास्त्रस्य मुख्यमुद्देश्यम्। (व्याकरण, साहित्य, मीमांसा)

(४) मीमांसा शब्दे .......... धातुः। (मान्, गम्, अद्)

(५) मीमांसा शब्दे .......... प्रत्ययः। (सन्, तिप्, क)

(६) मीमांसा नाम .......... विचारः। (वेदार्थ, पुराणार्थ, स्मृत्यर्थ)

(७) धर्मस्यानुष्ठानद्वारा .......... प्राप्तिः। (मोक्ष, स्वर्ग, धर्म)

(८) वेदः पौरुषेय इति .......... वदन्ति। (मीमांसकाः, वेदान्तिनः, नैयायिकाः)

(९) वेदाध्ययनं .......... पूर्वकम्। (गुर्वध्ययनपूर्वकम्, यागानुष्ठानपूर्वकम्, शास्त्राध्ययनपूर्वकम्)

(१०) चोदनालक्षणोऽर्थो धर्मः इति .......... वदन्ति। (नैयायिकाः, वेदान्तिनः, मीमांसकाः)

२. **एकैकवाक्येन उत्तराणि लिखत।**

(१) मीमांसाशब्दार्थः कः ?

(२) भागवतानां मते धर्मः कः ?

(३) मीमासकाः धर्मस्य लक्षणं किं वदन्ति ?

(४) अज्ञनं केन क्रियते ?

(५) लोके कः पुरुषः धार्मिक इत्युपाधिना उच्यते ?

(६) स्मृतिकाराः धर्मस्य किं लक्षणं कुर्वते ?

(७) सौगताः नाम के ?

३. **द्वित्रवाक्यैः उत्तराणि लिखत।**

(१) मीमांसाशास्त्रस्य महत्वम् उपवर्णयत।

(२) 'चोदनालक्षणोऽर्थो धर्मः' इतीमं व्याख्यात।

(३) मीमांसादर्शनस्य मुख्यमुद्देश्यम् किम् ?

(४) 'कुर्वन्नेवेह कर्माणि...' इति कस्य वाक्यम्।

(५) नैयायिकानुसारं वेदस्य पौरुषेयत्वम् उपवर्णयत।

४. **टिप्पणीं लिखत।**

(१) वेदापौरुषेयत्वम्।

(२) धर्मः।

(३) मीमांसा

५. **निबन्धात्मकमुत्तरं लिखत।**

(१) पूर्वमीमांसाशास्त्रस्य महत्त्वं लिखत।

(२) वेदस्य पौरुषेयत्वम्, निरस्य, अपौरुषेयत्वं साधयत।

(३) धर्मस्य विविधानि लक्षणानि विविच्य 'चोदनालक्षणोऽर्थो धर्मः' इत्यमुं प्रतिपादयत।

●

# २ पूर्वमीमांसाग्रन्थानां ग्रन्थकर्तॄणां च परिचयः

**प्रस्तावना**

मीमांसा नाम वेदार्थविचारः इत्यस्माभिः गते पाठे पठितम्। एतादृश्यस्य वेदार्थविचारस्य प्रवृत्तिः विना विद्वद्भिः भवितुं नार्हति। तैः सर्वैः स्वीयं सर्वस्वं वेदाय समर्पितम्। तत्समर्पणेनैवाद्य वयं एतेषां ग्रन्थानां पानं कर्तुं समर्थाः स्मः। अतः तेषां जीवनस्य ग्रन्थानाञ्च परिचयं समवाप्य वयं कृतकृत्या भवेम।

## १. महर्षिः जैमिनिः

प्राचीनभारतीयपरम्परानुसारं मीमांसादर्शनस्य आदिमः प्रवर्तकः सूत्रकारश्च जैमिनिः वर्तते। मुनिवरोऽयं कुत्र जन्म लेभे इत्यत्र प्रायः न कुत्रापि किमपि प्राप्यते। मीमांसादर्शनस्य सूत्रग्रन्थः अनेन ग्रथितः। एतेषां सूत्राणाम् अन्तः साक्ष्याधारेण अस्य मुनेः समयः क्रि.पू. २०० वर्षात्मकः निर्णीयते। प्रो. जैकोबी शून्यवादस्य उल्लेखेन जैमिनिं नागार्जुनस्य परवर्तिनं-मनुते। परं कथनमिदमन्यप्रमाणैः पुष्टं न भवति।

**कृति** : सर्वेषु दर्शनेषु जैमिनिना प्रणीतं मीमांसाशास्त्रं विशदं वर्तते। दर्शनग्रन्थेऽस्मिन् २७०० सूत्राणि १००० (सहस्राधिकानि) च अधिकरणानि समुपलभ्यन्ते। द्वादशाध्यायेन विभक्तमिदं शास्त्रं द्वादशलक्षणी इत्यभिधया प्रसिद्धमस्ति। अनेन च मीमांसाशास्त्रस्य आदिमः प्रवर्तकः अयमेव जैमिनिः इति सिध्यति।

## २. शबरस्वामी

अयञ्च शबरस्वामी क्रिस्तीयकालान्तवर्ती सन् (२००) वर्षे आसीत्। समस्तद्वादशाध्यायान्तर्गतसूत्राणामुपरि विस्तृतं प्रामाणिकञ्च भाष्यं रचितवान् यच्च ''शाबरभाष्यम्'' इति नाम्ना प्रसिद्धिं गतं वर्तते। इदञ्चास्ति भाष्यं सर्वथा मीमांसाशास्त्रीय वैदुष्यपरिपूर्णमिति सर्वेऽपि मीमांसका विदन्ति, वदन्ति च।

अयञ्चापि शाबरभाष्यनामको ग्रन्थस्तुलनात्मिकया दृष्ट्या विचार्यमाणे महर्षिपतञ्जलिना विरचितेन महाभाष्येण तथा श्रीशङ्कराचार्येण रचितेन शाङ्करभाष्येण च साम्यं बिभर्तीति नात्र किमपि विचारणीयमस्ति।

अस्य शबरस्वामिविषये यद्यपि बहुवक्तव्यमस्ति, परन्तु शाबरभाष्यविषये उपयुक्तमुक्त्वा भाष्यपरिचयेन शबरस्वामी परिचाययिष्यते।

- **कृतिः शाबरभाष्यम्**

  इयञ्च मीमांसा द्वादशलक्षणी भवति। तत्र खलु परमार्थेन विचार्यमाणे सतीदमेवाऽऽयाति।

  - **प्रथमाध्यायः**

    अध्यायेऽस्मिन् विध्यर्थवाद-मन्त्र-स्मृति-नामधेयार्थकस्य शब्दसमुदायस्य प्रामाण्यं विचारितम्।

  - **द्वितीयाध्यायः**

    अत्र च कर्मभेदरूपः, प्रमाणापवादरूपः प्रयोगभेदरूपश्चार्थः प्रस्फोरितः।

  - **तृतीयाध्यायः**

    अध्यायेऽस्मिन् श्रुति-लिङ्ग-वाक्य-प्रकरणादीनां बलाबलभावप्रभृतयो विचाराः विचारिताः।

  - **चतुर्थाध्यायः**

    अस्मिन् प्रधानप्रयोजकत्वाऽप्रधानप्रयोजकत्व, राजसूययज्ञाङ्गभूताऽक्षद्यूतादिविचाराः चिन्तिताः।

❒ **पञ्चमाध्यायः**

अध्याये च क्रमबोधकश्रुति-अर्थ-पाठादीनां प्राबल्याऽप्राबल्यविचारः कृतः।

❒ **षष्ठाध्यायः**

अत्र अधिकारि तद्धर्माणाम्, अर्थलोपनप्रायश्चित्तस्य याज्ञिकवन्हिविचारः साधितः।

❒ **सप्तमाध्यायः**

अध्याये चात्र प्रत्यक्षवचनातिदेश-लिङ्गातिदेशकथनं कथितम्।

❒ **अष्टमाध्यायः**

अस्मिंश्चाध्याये स्पष्टास्पष्टप्रबललिङ्गातिदेशापवादकथनं विहितम्।

❒ **नवमाध्यायः**

तत्र ऊहविचारामारभ्य, सामोहस्य, मन्त्रोहस्य च विषयाणां विचारः विचारितः।

❒ **दशमाध्यायः**

अध्यायेऽस्मिन् ग्रहादिसामप्रकीर्णनमर्थकथनं प्रोक्तम्।

❒ **एकादशाध्यायः**

अत्रापि तन्त्रोपोद्घातः, तन्त्रावाप पञ्चनावाप प्रभृतिविषयाणां विचारः अनुष्ठितः।

❒ **द्वादशाध्यायः**

अन्तिमेऽस्मिन् अध्याये प्रसङ्गतन्त्रिविनिर्णयप्रभृतीनां विषयाणां विचारः साधितः।

### ३. कुमारिलभट्टः

शबरस्वामिनः पूर्वं कश्चिद्वार्तिककारः बभूव, यदुद्धरणानि कुमारिलभट्टप्रभाकरयोः ग्रन्थयोः प्राप्यन्ते। परन्न ग्रन्थः उपलभ्यते। भाष्यकारात्परः मीमांसादर्शनस्य ऐतिह्यपरम्परायां सर्वाधिकः प्रतिभासम्पन्नः दार्शनिकः कुमारिलभट्टः वर्तते यस्य कारणेनैव मीमांसादर्शनमिदं ख्यातिं प्राप विस्तृतिञ्च लेभे। कुमारिलभट्टोऽयं उद्भटः विद्वान् प्रसिद्धः शास्त्रार्थी चावर्तत। वेदेऽस्य प्रगाढा श्रद्धा दृश्यते। तेनैव विचारकाः एतन्मतं समाहृत्य श्रद्धापूर्वकम् भट्टपादाः इत्युक्त्वा स्मरन्ति। एतस्य भट्टवर्यस्य समयः सप्तमशताब्दिरिति मन्यते। केचन ऐतिह्यविदः कुमारिलभट्टं मैथिलं वदन्ति, अपरे चैनं दाक्षिणात्यं मन्वते।

**कृतिः** कुमारिलभट्टः शबरस्वामिकृतेभाष्ये वैदुष्यपूर्णं मौलिकं व्याख्यानं विधाय भाष्यमाहात्म्यं संवर्धितवान्। आचार्यप्रवरोऽयं शाबरभाष्यस्य तर्कपादे श्लोकवार्तिकं रचयित्वा दार्शनिकसिद्धान्तेषु नूतनचेतनायाः सञ्चारं व्यधात्। ग्रन्थोऽयं कारिकाबद्धः वर्तते। समालोचकाः एनं ग्रन्थं आधारस्तम्भं मन्वते। तर्कपादातिरिक्तेषु तृतीयाध्यायपर्यन्तेषु समस्तपादेषु आचार्यः तन्त्रवार्तिकं ग्रन्थं निरमात्। स च ग्रन्थः आचार्यशेमुषी-शिखरद्योतकः वर्तते। ग्रन्थोऽयं गद्यमय्या भाषायां लिखितः, टुप्टीका शेषाणम् अध्यायानां संक्षिप्ता व्याख्या वर्तते।

परम्परानुसारं मध्यमटीका बृहट्टीका इत्युभौ ग्रन्थौ आचार्यकृतौ मन्येते। परमेतौ नोपलभ्येते। एवमाचार्यप्रवरोऽयं मीमांसदर्शने महत्त्वपूर्णं स्थानं दधाति।

### ४. प्रभाकरगुरुः

मीमांसादर्शनशास्त्रवेत्तृषु तथा तत्प्रवर्तकेषु च मीमांसकेषु पूर्णतया प्रसिद्धिं लभमानोऽयं (६५०-७२०) क्रिस्तीय काले सर्वथा वर्तमानः 'गुरु' शब्देनोच्यमानः प्रभाकरः स्वीयमीमांसादर्शनशास्त्रे कुत्रचित् किमपि वैलक्षण्यं दर्शितवान्। आचार्यस्य जन्मभूः मिथिला बङ्गदेशः इति विद्वांसः मन्वते वा।

**कृतिः** सर्वप्रथमं प्रभाकरगुरोः ग्रन्थपरिचयः प्राप्यते। कुमारिलभट्टवद् आचार्योऽयं शाबरभाष्ये टीकाः चकार। तत्र बृहती (निबन्धनं), लघ्वी (विवरणम्) टीके स्तः। आचार्योऽयं स्वतन्त्रप्रतिष्ठापकः परन्तु कुमारिलभट्टवत् नायं तथा ख्यातिं प्राप। एतन्मतसमर्थकः आचार्यः शालिनाथमिश्रः बभूव। एतेषां आचार्याणां तिस्रः पञ्चिकाः प्राप्यन्ते। प्रभाकर-गुरुविरचितायां बृहत्याम् अस्याम् लघ्व्यां च वर्तते। ऋजुविमला पञ्चिका टीका, दीर्घशिखापञ्चिका टीका, प्रकरणपञ्चिका टीका। अपरः आचार्यः भवनाथमिश्रः अस्ति, यः प्रभाकरपरम्पराम् उज्ज्वलां चकार। अयं नयविवेकाभिधं ग्रन्थं प्रणिनाय। मीमांसायाः उत्कृष्टग्रन्थोऽयं गण्यते। प्रभाकरसम्प्रदाये नन्दीश्वरविरचितः 'प्रभाकरविजयनामा' ग्रन्थोऽपि महनीयं स्थानं बिभर्ति। एवं मीमांसाशास्त्रेऽस्मिन् प्रभाकर-सम्प्रदायः सर्वथा महिमावान् वर्तते।

### ५. मण्डनमिश्रः

मण्डनमिश्रः कुमारिलभट्टस्य प्रधानशिष्यः (८००) क्रिस्तीय कालवर्ती मीमांसाशास्त्रीयप्रतिभाभास्करः सन् मीमांसादर्शनशास्त्रस्य प्रौढविद्वान् आसीत्। शङ्कराचार्यदिग्विजयानुसारमियमस्ति प्रसिद्धिर्यत् श्रीशङ्कराचार्येण सह अस्य शास्त्रार्थो जातः, तत्र पराजयप्राप्त्यनन्तरं तुरीयावस्थायाम् अयं श्रीमण्डनमिश्रः श्रीशङ्कराचार्यनिरूपितां शिष्यतां लेभे, इति नास्ति तिरोहितोऽयं विषयः केषामपि दार्शनिकविदुषाम्। तथाचायमेव पुनः सुरेश्वराचार्यनाम्नाऽपि प्रसिद्धिमवाप।

**कृतयः** - (१) विधिविवेकः। (२) मीमांसानुक्रमणी। (३) विभ्रमविवेकः। (४) मीमांसासूत्रानुक्रमणी। (५) भावनाविवेकः।

### ६. लौगाक्षिभास्करः

व्याकरणे प्रविविक्षूणां कृते कौमुद्याः यत्स्थानं वर्तते तदेव मीमांसायाम् अर्थसंग्रहस्य वर्तते। ग्रन्थकर्ता अस्ति श्रीलौगाक्षिभास्करः।

डो. कीथकृते इन्डियन् लोजिक ग्रन्थे लौगाक्षिभास्करः मुद्गलपुत्रः रुद्रप्रपौत्रः इति श्रूयते। ग्रन्थस्य मंगलाचरणेन अन्तिमपद्येन च ज्ञायते यद् अस्य वंशः लौगाक्षि, भास्करश्च नाम। तत्त्वकौमुद्यामपि आत्मानं भास्करशर्मेऽति स्वयं प्रतिपादयति।

केचन विद्वांसः मङ्गलाचरणस्थेन वासुदेवपदेन रमापदेन च स्वीयौ पितरौ नमस्कृताविति वदन्ति। न्यायग्रन्थे तत्त्वकौमुद्याख्येऽपि विष्णुरमापदे प्रयुक्ते स्तः। परं नेदं सङ्गच्छते विष्णुरमापदेन देवस्मरणं कृतमनेन। लौगाक्षिभास्करस्य जन्मस्थानविषये मतद्वयं प्रवर्तते। मीमांसाकुसुमाञ्जलिकारः डो. उमेशमिश्रः अन्ये च आचार्या एतं दाक्षिणात्यं मन्वते। परं कीथः तत्त्वकौमुदीस्थमणिकर्णिकापदेन वाराणसीस्थोऽयमिति मनुते। अयं षोडशताब्ध्यां (१६००) समभवत् इति सर्वेषाम् ऐतिह्यविदां निर्णयः।

**कृतिः** - श्रीलौगाक्षिभास्करस्य मीमांसादर्शने अर्थसङ्ग्रहः, कणाददर्शने तत्त्वकौमुदी इत्थं द्वावेव ग्रन्थाववाप्येते।

### ७. श्रीकृष्णयज्वा

श्रीकृष्णयज्वा मीमांसापरिभाषानामकग्रन्थस्य कर्ता वर्तते। एतस्य श्रीकृष्णयज्वनः मातापित्रोः नाम सूर्यनारायणत्रिपुरसुन्दरी वर्तेते। तदेव ग्रन्थस्य मङ्गलपद्ये कीर्तितम्। मीमांसापरिभाषानामकः ग्रन्थः अत्यन्तसरलः। मीमांसायां ज्ञानमवाप्तुं विद्यार्थिभिरिदं पुस्तकम् अधीयते। अत एव श्रीकृष्णयज्वा मीमांसकसम्प्रदाये प्रसिद्धः।

## स्वाध्यायः

**१. रिक्तस्थानं पूरयत।**

(१) मीमांसादर्शनस्य आदिमः प्रवर्तकः ........ अस्ति। (जैमिनिः, व्यासः, पतञ्जली)

(२) मीमांसादर्शने वार्तिककारः ........ विद्यते। (कुमारिलः, लौगाक्षिभास्करः, मण्डनमिश्रः)

(३) कृष्णयज्वा ........ ग्रन्थं रचितवान्। (मीमांसापरिभाषा, मध्यटीका, बृहट्टीका)

(४) वेदार्थविचारः ........ दर्शने विहितः। (न्याय, मीमांसा, वेदान्त)

(५) शाबरभाष्यं ........ आचार्येण रचितम्। (कुमारिल, मण्डनमिश्र, शबरस्वामी)

(६) लौगाक्षिभास्करेण ........ ग्रन्थः रचितः। (मीमांसापरिभाषा, अर्थसंग्रहः, द्वादशलक्षणी)

(७) प्रभाकरगुरोः समयः ........ शताब्द्यां वर्तते। (अष्टम, नवम, दशम)

(८) मीमांसादर्शनस्य ........ सूत्रग्रन्थः अस्ति। (ब्रह्मसूत्रम्, द्वादशलक्षणी, महभाष्यम्)

(९) कुमारिलभट्टः ........ शताब्द्यां आसीत्। (नवम, अष्टम, सप्तम)

(१०) विभ्रमविवेकः इत्यस्य रचयिता ........ अस्ति। (प्रभाकरगुरुः मण्डनमिश्रः, कृष्णयज्वा)

**२. एकवाक्येन उत्तरं लिखत।**

(१) मण्डनमिश्रस्य एकस्य ग्रन्थस्य नाम लिखत।

(२) मीमांसादर्शनस्य सूत्रकारः कः?

(३) मीमांसादर्शनसूत्रग्रन्थस्य भाष्यं केन रचितम्?

(४) मीमांसापरिभाषाया कर्ता कः?

(५) भावनाविवेकस्य कर्ता कः?

(६) द्वादशलक्षण्यां कति आध्यायाः सन्ति?

**३. द्वित्रवाक्यैः उत्तरं लिखत।**

(१) कुमारिलभट्टस्य शिष्यः कः?

(२) द्वादशलक्षण्यां नवमाध्याये कः विषयः निरूपितः?

(३) द्वादशलक्षण्यां द्वादशाध्याये कः विषयः निरूपितः?

(४) अर्थसंग्रहस्य कर्ता कः?

(५) मीमांमासूत्रभाष्यं कति अध्यायात्मकं वर्तते?

**४. टिप्पणीं लिखत।**

(१) द्वादशलक्षणी।

(२) मण्डनमिश्रः।

(३) जैमिनिः।

**५. निबन्धात्मकम् उत्तरं लिखत :**

(१) द्वादशलक्षणीं परिचाययत।

(२) मीमांसादर्शनस्य विषयम् उपपादयत।

(३) कृष्णयज्वानं परिचाययत।

●

# ३ धर्माधर्मनिरूपणम्

**प्रस्तावना**

मीमांसासूत्राणां सम्यगर्थावबोधाय गच्छता कालेन भट्टमतानुयायिभिः। अनेके ग्रन्थाः निर्मिताः। तेन सम्प्रदायोऽयं भूयान् प्रसरितः जातः। एतस्य भाट्टमतस्य ज्ञानाय शास्त्रदीपिकाद्याः बह्वः निबन्धग्रन्थाः सन्ति, परन्तैते सुकुमारमतीनाम् अपि तु ग्रन्थेषु प्रथमतृतीयपञ्चमषष्ठदशमाध्यायानां केचनैवांशाः चर्चिताः सन्ति तेन अपूर्णाः। आचार्यः कृष्णयज्वा क्षतिमिमामेव पूरयितुं मीमांसापरिभाषानामकं लघुकायं प्रकरणग्रन्थं रचयामास। तस्यैव ग्रन्थराजस्य इदानीं प्रारम्भः क्रियते।

- **मङ्गलाचरणम्**

**सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम्।**
**गुरूनधिगतार्थांश्च निरन्तरमहं भजे॥**

विघ्नपरिसमाप्त्यर्थं कृष्णयज्वा सुधीः ग्रन्थारम्भे ग्रन्थं मङ्गलेन निबध्नाति। मङ्गलेनानेन सूर्यनारायणः त्रिपुरसुन्दरी च नमस्क्रियेते। अत्र श्लेषालङ्कारेण स्वजनकं सूर्यनारायणं, सकललोकप्रणम्यं श्रीसूर्यदेवञ्च, त्रिपुरसुन्दरीं स्वजननीं, त्रीणि पुराणि ब्रह्मविष्णुशिव-शरीराणि यस्मिन् सः त्रिपुरः परशिवः तस्य सुन्दरीं ललितादेवीं वा अहं कृष्णयज्वा वन्दे। न केवलं तावदेव अपितु स्वगुरून् अर्थात् अधिगताविज्ञानार्थाः मीमांसाशास्त्रीयपदार्थाः यैः तान् श्रेष्ठान् जैमिनिप्रभृतीन् मीमांसाशास्त्रप्रबन्धकान् इति निरन्तरं सततं अहं कृष्णयज्वा भजे प्रणामाध्ययनादिद्वारा सेवे।

पूर्वमीमांसादर्शनस्य 'सदाचारप्रामाण्याधिकरण' अनुसारं शिष्यशिक्षार्थे सदाचाराय च मङ्गलं निबध्यते। महाभाष्यकारः प्रमाणयति यद् 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि भवन्ति, आयुष्मत् पुरुषाणि चाऽध्येतारः सिद्धार्था यथा स्युः।' इति-

मङ्गलानन्तरं द्वितीयेन श्लोकेन प्रकरणग्रन्थप्रणयनं प्रतिजानीते...

**बालानां शास्त्रसिद्धान्तलेशबोधाय धीमताम्।**
**मीमांसा-परिभाषेयं क्रियते कृष्णयज्वना॥**

धीमतां प्रशस्तमतिशालिनां किन्तु बालानाम् अधीतसर्वशास्त्राणामपि अनधीतमीमांसाशास्त्राणां, शास्त्रसिद्धार्थानां मीमांसाशास्त्रीयसिद्धान्तीभूतपदार्थानां लेशबोधाय, लेशेन सूक्ष्मतया बोधाय मीमांसा-परिभाषेऽयं, मीमांसा वेदार्थविचारकस्य शास्त्रस्य परिभाषा इयं स्फुटार्थविवृतिः क्रियते, कृष्णयज्वना कृष्णयज्वाभिधानेन ग्रन्थकृता विरच्यते।

अत्र,

**अधिकारी च सम्बन्धो विषयश्च प्रयोजनम्।**
**ग्रन्थादावेव वक्तव्यमनुबन्धचतुष्टयम्॥**

इति नियमात् अधीतवेदः 'अधिकारी', मीमांसायाः स्फुटार्थविवरणं विषयः, 'सूक्ष्मबोधः' प्रयोजनम्, 'बोध्य-बोधकभावश्च' सम्बन्धो विज्ञेयः। मीमांसापरिभाषा नाम पूर्वमीमांसाशास्त्रस्य सङ्केतविशेषाभिधायको ग्रन्थः।

● **धर्माधर्मनिरूपणम्**

**मूलम्** – **'इह खलु जैमिनिना द्वादशलक्षणण्यां पूर्वमीमांसायां धर्माधर्माववेवानुष्ठानोपयोगितया विचारितौ। तत्र वेदबोधितेष्टसाधनताको धर्मः यथा यागादिः। वेदबोधिताऽनिष्टसाधनताकोऽधर्मः यथा कलञ्जभक्षणादिः। तयोश्च वेदः, स्मृतिः, आचारश्च प्रमाणम्, तत्र वेदः स्वतन्त्रं प्रमाणम्, इतरौ तु वेदमूलकतया।'**

**व्याख्या** – इह द्वादशलक्षण्यां पूर्वमीमांसायामित्यन्वयः। मीमांसासूत्रकृता महर्षिजैमिनिना 'अथाऽतो धर्मजिज्ञासा' इत्यारम्य 'अन्वाहार्ये च दर्शनात्' इत्यन्ता द्वादशलक्षणी द्वादशाध्यायी पूर्वमीमांसा प्रणीता। द्वादशलक्षण्याम् इत्यत्र लक्षण शब्दः अध्यायपरः। द्वादशानां लक्षणानाम् अध्यायानां समाहारः द्वादशलक्षणी, तस्यां द्वादशलक्षण्याम्। मीमांसाशास्त्रीयद्वादशाध्यायेषु द्वादशविषयाः निरूपिताः। ते च यथा –

(१) धर्मप्रमाण्।

(२) धर्माधर्मभेदौ।

(३) शेष-शेषिभावः।

(४) क्रत्वर्थ-पुरुषार्थयोर्भेदनिरूपणद्वारा प्रयोज्य-प्रयोजकविचारः।

(५) श्रुत्यर्थपाठादिक्रमबोधकप्रमाणानि।

(६) अधिकारविशेषः।

(७) सामान्यातिदेशः।

(८) विशेषातिदेशः।

(९) ऊहः।

(१०) बाधः।

(११) तन्त्रम्।

(१२) प्रसङ्गः।

इत्येवं रूपेण द्वादशलक्षणानि लक्षयतीति द्वादशलक्षणी। केचित् द्वादशाध्यायीत्यपि निगदन्ति। धर्माऽधर्मौ। अस्मिन् शास्त्रे 'धर्मः अनुष्ठेयः, अधर्मश्च त्याज्यः इति विचारितमस्ति। मीमांसाशास्त्रे 'यागादिरेव धर्मः' इत्युक्तत्वात् यागहोमदानानामेव धर्मत्वम्, कलञ्जभक्षणादीनाम् अधर्मत्वम्। अतः तयोः धर्माधर्मयोः अनुष्ठानोपयोगित्वं स्पष्टमेव। धर्माधर्मविचारस्योपयोगः धर्मस्य अनुष्ठाने अधर्मस्य त्यागे च भवति। अतस्तौ विचारितौ। मीमांसकेष्वपि प्रभाकरा नैयायिकवदेव यागजन्यमपूर्वमेव धर्मं मन्यते। तथाहि-

**विहितक्रियया साध्यो धर्मः पुंसां गुणो मतः।**
**प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म उच्यते॥**

किन्तु मीमांसापरिभाषाकारः कृष्णयज्वा भाट्टमतानुयायित्वाद् यागादिरेव धर्मः इति प्रतिजानीते। 'यथा यागादि'रित्यादिना। 'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते' इति कौमारिलडिण्डिमः। तत्र धर्माधर्मयोर्निरूपणे धर्मस्य लक्षणं तावत् 'वेदबोधितेष्टसाधनातोको धर्मः' इति। 'स्वर्गकामो यजेत' इत्यत्र शाब्दबोधः एवं भवति – 'स्वर्गफलं यागेन भावयेत्' सम्पादयेदित्यर्थः। अत्र यागस्य इष्टसाधनता वेदेन अवबोध्यत इति यागात्मके धर्मलक्षणसमन्वयः। धर्मलक्षणे इष्टसाधनत्वमात्रोक्तौ अन्नभक्षणे अतिव्याप्ति-वारणाय वेदबोधितपदस्य निवेशः। वेदबोधितत्त्वमात्रोक्तौ स्वर्गादौ अतिव्याप्तिः, तद्वारणाय 'इष्टसाधनते'ति। इत्येवं धर्मलक्षणं दोषत्रयशून्यम्।

को नाम अधर्मः? वेदबोधिताऽनिष्टसाधनताकः अधर्मः इति हि अधर्मलक्षणम्। यथा कलञ्जभक्षणादिः। अस्मिन् लक्षणे अनिष्टसाधनत्वमात्रोक्तौ विषभक्षणादौ अपथ्यसेवने च अतिव्याप्तिः। विषभक्षणेन, अपथ्यसेवनेन च अनिष्टमुत्पद्यते। तन्निवारणार्थं लक्षणे 'वेदबोधितत्वम्' इत्यंशो निवेश्यते। 'वेदबोधितत्व' मात्रोक्तौ नरकादौ अतिव्याप्तिः। नरकः स्वयमेव-अनिष्टरूपः, न हि अनिष्टसाधनरूपः। **कलञ्जभक्षणादिरिति।** अत्र आदिपदेन सुरापानादिकं बोद्धव्यम्। 'न कलञ्जं भक्षयेत्' इत्यनेन कलञ्जभक्षणं निषिध्यते। 'कलञ्जम्' नाम विषलिप्तशस्त्रहत मृगमांसम्। केचन 'तम्बाकू' इति मन्यन्ते, लौकिकाश्च रक्तलशुनमिति वदन्ति। 'कलञ्जभक्षणम्' अनिष्टसाधनम् इति प्रतिपादितम्। अतः कलञ्जभक्षणम् अधर्मः।

तयोः धर्माधर्मयोः ज्ञानविषये श्रुतिः, स्मृतिः, शिष्टाचारश्च प्रमाणम्। अत्र आचारपदेन शिष्टाचारः ग्राह्यः। तत्र श्रुति-स्मृति-सदाचारेषु श्रुतिः स्वतन्त्रं प्रमाणम्। इतरयोः स्मृत्याचारयोः प्रामाण्यं तु श्रुतिमूलकत्वेन मन्तव्यम्। स्मृतिर्नाम श्रुत्यर्थमवबुध्य विरचितो ग्रन्थः।

- **वेदद्वैविध्यम्**

**मूलम् - तत्र वेदो द्विविधः - मन्त्ररूपो ब्राह्मणरूपश्चेति। तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। प्रयोगोऽनुष्ठानं तत्कालीनेत्यर्थः। विधायकवाक्यं ब्राह्मणम्। तच्छेषोऽर्थवादः। तस्य विधेयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते।**

तत्र श्रुतिस्मृतिसदाचारात्मकेषु त्रिषु प्रमाणेषु श्रुतिरूपं यत् प्रथमं स्वतन्त्रं प्रमाणम् तस्याः श्रुतेः द्वौ विभागौ मन्त्रब्राह्मणरूपौ वर्तेते। तत्र 'अनुष्ठानकाले अनुष्ठेयस्य अर्थस्य स्मारणमेव मन्त्राणाम् उपयोगः' वक्ष्यति च ग्रन्थकारः अग्रे यद् 'प्रयोगसमवेतार्थस्मारका मन्त्रा इति मन्त्रनिरूपणकाले' मूलोक्तप्रयोगकालीनशब्दस्यार्थः यथा-प्रयोगः अनुष्ठानम्, तत्कालीने तस्मिन् समये इत्यर्थः। अन्यैः प्रमाणैः अज्ञातस्य अर्थस्य यद् विधानं करोति, तद्वाक्यं 'ब्राह्मणम्' इत्युच्यते।

विधायकवाक्यरूपस्य ब्राह्मणस्य यः शेषः सः अर्थवादो विज्ञेयः। अर्थवादवाक्यानां ब्राह्मणे एवान्तर्भाव इत्यर्थः। इदम् अर्थवादवाक्यं विधिप्रतिपादितस्य अर्थस्य प्राशस्त्यं विज्ञाप्य विधिवाक्येन सह एकवाक्यतां प्राप्नोति, अतः तस्य अर्थवादवाक्यस्य प्रामाण्यं भवतीति अग्रे वदिष्यति ग्रन्थकारः।

## स्वाध्यायः

**१. रिक्तस्थानं पूरयत।**

(१) मीमांसापरिभाषा .......... शास्त्रस्य प्रकरणग्रन्थः। (मीमांसा, न्याय, वेदान्त)

(२) कृष्णयज्वनः पितुः नाम .......... अस्ति। (देवनारायणः, लक्ष्मीनारायणः, सूर्यनारायणः)

(३) मीमांसा .......... लेशबोधाय निर्मिता। (बटूनाम्, प्रौढानाम्, बालानाम्)

(४) .......... एव धर्मः। (कलञ्जभक्षणादिः, पूजादिः, यागादिः)

(५) .......... एव अधर्मः। (कलञ्जभक्षणादिः, पूजादिः, यागादिः)

(६) वेदः .......... प्रमाणम्। (स्वतन्त्रं, परतन्त्रं, उभयतन्त्रम्)

(७) .......... अवबुध्य विरचितः ग्रन्थः स्मृतिः। (पुराणार्थं, आगमार्थं, श्रुत्यर्थं)

(८) प्रयोगसमवेतार्थस्मारकः ..........। (अर्थवादः, ब्राह्मणम्, मन्त्रः)

(९) अर्थवादः …….. अन्तर्भवति। (मन्त्रवाक्ये, श्लोके, ब्राह्मणवाक्ये)

(१०) …….. आचारोऽपि धर्मः। (शिष्टः, अशिष्टः, अन्यथा)

**२. एकवाक्येन उत्तरं लिखत।**

(१) मीमांसापरिभाषायाः कर्तुः नाम किम्?

(२) किमर्थं परिभाषेयं निर्मिता?

(३) कः अर्थवादः?

(४) कलञ्जं नाम किम्?

(५) कः धर्मः?

(६) द्वादशलक्षणी केन रचिता?

(७) कः अधिकारी?

**३. द्वित्रवाक्यैः उत्तरं लिखत।**

(१) मीमांसापरिभाषायाः मङ्गलं लिखत।

(२) कृष्णयज्वनः मातापित्रोः नाम लिखत।

(३) द्वादशलक्षण्यां कति अध्यायाः?

(४) किन्नाम अनुबन्धचतुष्टयम्?

(५) कृष्णयज्वा आदौ कान् वन्दते?

**४. टिप्पणीः लिखत।**

(१) अनुबन्धचयतुष्टयम्।

(२) धर्मः।

(३) वेदः

**५. निबन्धात्मकम् उत्तरं लिखत :**

(१) द्वादशलक्षणीं परिचाययत।

(२) धर्माधर्मयोः लक्षणानि विवेचयत।

(३) वेदस्य द्वैविध्यम् उपवर्णयत।

●

# ४ ब्राह्मणवाक्यभेदाः ॥

**प्रस्तावना**

'मन्त्रब्राह्मणात्मको वेदः' इत्ययं विषयः पूर्वं प्रोक्तः। वेदः मन्त्रब्राह्मणवाक्यैः युक्तो भवति। वेदे ब्राह्मणवाक्यानां नैके प्रकाराः सन्ति। कानिचन वाक्यानि कर्मोत्पत्तिविषये उपपादयन्ति। कानिचन कर्मणि विद्यमानं गुणं वदन्ति। कानिचन कर्मणः फलविषये चर्चां कुर्वन्ति इत्येवं रूपेण विषयभेदेन ब्राह्मणवाक्येषु भेदः समुदेति। पाठेऽस्मिन् तेषां वाक्यानां स्वरूपविशेषं मीमांसापरिभाषानुसारेण विचारयामः।

**ब्राह्मणवाक्यभेदाः**

**ब्राह्मणवाक्यानि**

| कर्मोत्पत्तिवाक्यम् | गुणवाक्यम् | फलवाक्यं | फलायगुणवाक्यं | सगुणकर्मोत्पत्तिवाक्यं | सफलकर्मोत्पत्तिवाक्यं |
|---|---|---|---|---|---|
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| अग्निहोत्रं जुहोति | दध्ना जुहोति | स्वर्गकामोयजेत | दध्नेन्द्रियकामस्य जुडेयात | सोमेन यजेत् | उद्भिदायजेत पशुकामः |

**मूलम् - ब्राह्मणवाक्यं च अनेकविधम् - कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्, फलाय गुणवाक्यम्, सगुणकर्मोत्पत्तिवाक्यमित्यादि भेदात्।**

ब्राह्मणग्रन्थस्य वाक्यं ब्राह्मणवाक्यम्। तस्य ब्राह्मणवाक्यस्य अनेके प्रकाराः सन्ति। तत्र कर्मोत्पत्ति-वाक्यरूपं ब्राह्मणवाक्यम्, गुणवाक्यरूपं ब्राह्मणवाक्यम्, फलवाक्यरूपं ब्राह्मणवाक्यम्, फलनिमित्तकगुणवाक्यरूपं ब्राह्मणवाक्यम्, सगुणकर्मोत्पत्तिवाक्यरूपं ब्राह्मणवाक्यमिति बहुविधं ब्राह्मणवाक्यं भवति। इदानीम् एकैकमपि विस्तरेण चर्च्यते।

- **कर्मोत्पत्तिवाक्यम्।**

**मूलम् - तत्र येन वाक्येन - 'इदं कर्म कर्तव्यम् इति बोध्यते, तत्कर्मोत्पत्तिवाक्यम्। यथा-' 'अग्निहोत्रं जुहोति' इति। अत्र अग्निहोत्रहोमः कर्तव्यतया विधीयते इति कर्मोत्पत्तिवाक्यमिदम्।**

अनेकविधेषु ब्राह्मणवाक्येषु येन वाक्येन केवलम् 'इदं कर्म कर्तव्यम्' इत्येवं प्रतिपाद्यते, अर्थात् फलसम्बन्धादिकम् अन्यत् किमपि न प्रतिपाद्यते, तद्वाक्यं 'कर्मोत्पत्तिवाक्यम्' इति उच्यते। यथा 'अग्निहोत्रं जुहोति' इत्यनेन वाक्येन 'अग्निहोत्रसंज्ञको होमः कर्तव्यः' इति विधीयते, किन्तु सः किमर्थं कर्तव्यः इत्यादिकं किमपि न प्रतिपाद्यते। अनेन वाक्येन केवलं कर्मण एव ज्ञानं भवति, कर्मण एव उत्पत्तिः भवति, अतः इदं वाक्यं कर्मोत्पत्तिवाक्यम् इत्युच्यते।

- **गुणवाक्यम्।**

**मूलम् - विहिते कर्मणि तदङ्गतया द्रव्यदेवतादिविधायकं वाक्यं गुणवाक्यम्। यथा - 'दध्ना जुहोति' इति। अत्र होममुद्दिश्याङ्गतया दधि विधीयते इति गुणवाक्यमिदम्। कर्माङ्गतया विहितत्वमेव दध्यादेर्गुणत्वम्।**


प्रमाणान्तरेण प्राप्तं कर्म उद्दिश्य अङ्गरूपेण द्रव्यस्य देवताया वा विधानं येन वाक्येन क्रियते तद् वाक्यं गुणवाक्यम् इत्युच्यते। यथा 'दध्ना जुहोति' इत्यनेन वाक्येन, 'अग्निहोत्रं जुहोतीति वाक्येन विहितमग्निहोत्र-होममुद्दिश्य' दधि रूपस्य गुणस्य, अङ्गस्य विधानं क्रियते, इत्यतः 'दध्ना जुहोति' इति वाक्यं गुणवाक्यम् इत्युच्यते। किञ्चित्कर्म उद्दिश्य, अङ्गत्वेन यद् विधीयते, तद् गुणशब्देन उच्यते। अतः उक्तवाक्ये विहितो 'दधि' इत्याख्यो द्रव्यपदार्थः, अग्निहोत्रनामकहोमस्य 'गुणः' (अङ्गम्) अस्ति।

**मूलम् – अत्र होमस्योद्देश्यत्वं नाम मानान्तरप्राप्तत्वे सति विधेयान्वितया निर्देश्यत्वम्। तस्यैव मानान्तरप्राप्तस्य पुनः कथ्यमानरूपत्वमनुवाद्यत्वम्, दध्यादिगुणान्वितया प्राधान्यञ्च।**

अत्र होमस्य उद्देश्यत्वं नाम प्रमाणान्तरावगतस्य पदार्थस्य पुनः अन्येन विधेयेन सह सम्बन्धं कर्तुं निर्देशः इति उद्देश्यस्य स्वरूपम्। 'दध्ना जुहुयात्' अत्र वाक्ये धात्वर्थो होमस्तादृशोऽस्तीति तस्य उद्देश्यत्वम्। प्रमाणान्तरेण ज्ञातस्य पदार्थस्य पुनर्वाक्यान्तरेण कथनं नाम अनुवादः इति अनुवादस्य स्वरूपम्। यथा 'अग्निहोत्रं जुहोति' इति वाक्येन ज्ञातस्य होमस्य, दध्ना जुहुयात् इति वाक्यान्तरेण पुनः अभिहितत्वात् 'दध्ना जुहोतीति' वाक्ये होमः अनुवाद्यो भवति। पुनः तस्यैव होमस्य दध्यादिगुणैः सह सम्बन्धः इति प्रधानस्य स्वरूपम्। अर्थात् विधेयस्य गुणस्यान्वयो यस्मिन् भवति तत्प्रधानमित्युच्यते। यथा 'दध्ना जुहुयात्' इत्यत्र दध्यात्मकगुणस्य अन्वयो होमक्रियायां भवतीति होमः प्रधानम्। अतः 'दध्ना जुहुयात्' इत्यस्मिन् वाक्ये 'होमः' उद्देश्यम्, अतः तत्र (१) उद्देश्यत्वम्, (२) अनुवाद्यत्वम्, (३) प्राधान्यं चेति त्रयो धर्माः सन्ति। मीमांसाशास्त्रे इमे त्रयो धर्माः 'उद्देश्यगतं त्रिकम्' इत्युच्यते।

**मूलम् – दध्यादेर्मानान्तराप्राप्तत्वादत्रैव विधेयत्वम्, होमसाधनत्वाच्च होमापेक्षया गुणत्वम्, पुरुषेणानुष्ठीयमानत्वाच्च उपादेयत्वञ्च। अत्र मानान्तराप्राप्तत्वं मानान्तराज्ञातत्वम्, अप्राप्तत्वञ्चाज्ञातत्वमिति बोध्यम्।**

केनाप्यन्येन प्रमाणेन दध्नः अप्राप्तत्वात् 'दध्ना जुहोति' इत्यस्मिन् वाक्ये 'दध्नः' विधेयत्वम्, तच्च दधि, होमसाधनत्वात् तत्र होमनिरूपितं 'गुणत्वम्' अस्ति। होमकर्ता च होमानुष्ठानार्थं तद् दधि स्वीकरोति, अतः दध्नः 'उपादेयत्वं' भवति। अज्ञातज्ञाप्यत्वं विधेयत्वम् 'अनवगतः पदार्थो येन वाक्येन अभिधीयते, सः तस्य वाक्यस्य 'विधेयो' भवति। यश्च विधेयो भवति, तत्र 'विधेयत्व' धर्मस्तिष्ठति।




'दध्ना जुहुयात्' इति वाक्यात् पूर्वं 'दधि' होमसाधनम् इत्यनवगतमासीत्। 'दध्ना जुहुयात्' इति वाक्यदर्शनेनैव दध्नः होमसाधनत्वमवगम्यते। 'उपकारकत्वं गुणत्वम्' यो यस्योपकारको भवति, स तस्य गुणो भवति, तत्र च गुणत्वं धर्मः। 'दध्ना जुहुयात्' इति वाक्ये दध्नि, होमनिरूपितं गुणत्वं तिष्ठति, यतो हि दधि, होमोपकारकमस्ति। 'अनुष्ठीयमानत्वमुपादेयत्वम्' कञ्चित्पदार्थमुद्दिश्य यस्य पदार्थस्य अनुष्ठानं क्रियते स पदार्थः उपादेयो भवति, तत्र च उपादेयत्वधर्मः तिष्ठति। अतोऽत्र 'दधि' उपादेयम् अस्ति। अस्मिन् वाक्ये दधिपदार्थे (१) विधेयत्वं, (२) गुणत्वं, (३) उपादेयत्वञ्च इति त्रयो धर्माः सन्तीति इमे धर्माः 'विधेयगतत्रिकम्' इति शब्देन उच्यन्ते।

- **फलवाक्यनिरूपणम्।**

**मूलम् – उत्पन्नस्य कर्मणः फलाकाङ्क्षायां फलसम्बन्धबोधको विधिः फलविधिः। यथा – 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति।**

अत्र 'यः स्वर्गं कामयते सः तत्साधनत्वेनाग्निहोत्रनामकं होमं भावयेत् – कुर्यात्' इति अग्निहोत्रवाक्योत्पन्नस्य कर्मणः फलसम्बन्धो बोध्यत इति फलवाक्यमिदम्।

उत्पत्तिवाक्यादवगतस्य कर्मण: फलजिज्ञासायां सत्यां तस्य कर्मण: फलेन सह सम्बन्धमभिधीयमानो विधि: 'फलविधि:' इत्युच्यते। यथा 'अग्निहोत्रं जुहुयात् स्वर्गकाम:', 'अनेन वाक्येन' य: स्वर्गमिच्छति, स: स्वर्गप्राप्तिसाधनभूतमग्निहोत्रं कुर्यात् इति रीत्या 'अग्नहोत्रं जुहुयात्' इति वाक्यावगतस्य कर्मण: स्वर्गफलेन सह सम्बन्ध: प्रतिपादित:। अत: इदं फलवाक्यम् इत्युच्यते।

- **फलाय गुणवाक्यम्**

**मूलम् - प्राप्तं कर्माश्रित्य फलाय गुणविधौ फलाय गुणवाक्यम्। यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इति। अत्राग्निहोत्रवाक्योत्पन्नं होममाश्रित्येन्द्रियफलाय दधिरूपो गुण: विधीयते - 'होमाश्रितेन दध्ना इन्द्रियरूपं फलं भावयेत्' इति होमाश्रितेन होमकारणीभूतेनेत्यर्थ:। अयमेव गुणफलविधि: गुणकामविधिरिति च उच्यते।**

चतुर्थं फलाय गुणवाक्यं प्रतिपादयति। प्राप्तं कर्म आश्रित्य फलोद्धेशेन गुणस्य (अङ्गस्य) विधायकं वाक्यं 'फलाय गुणवाक्यम्' इत्युच्यते। यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र 'अग्निहोत्रं जुहुयात्' इत्यग्निहोत्रहोमविधायकेन वाक्येन विहितं होममाश्रित्य इन्द्रियरूपफलोद्धेशेन दधिरूपस्य गुणस्य (अङ्गस्य) विधानं कृतमस्ति। तेन 'दध्नेन्द्रियकामस्य जुहुयात्' इति वाक्यस्यायमर्थ: सम्पन्न: - 'होमाश्रितेन (होमस्य साधनीभूतेन) दध्ना इन्द्रियरूपं फलं सम्पादयेत्।' इदं फलाय गुणवाक्यमेव 'गुणफलविधि:' अथवा 'गुणकामविधि:' इत्युच्यते।

- **सगुणकर्मोत्पत्तिवाक्यम्**

**मूलम् - द्रव्यदेवतादिगुणविशिष्टकर्मविधायकं वाक्यं सगुणकर्मोत्पत्तिवाक्यम्। यथा - 'सोमेन यजेत' इति। अत्र सोमलताविशिष्टयागो विधीयते। विशिष्टविधावपि विशेषणस्य अर्थाद्विधि:।**

पञ्चमं सगुणकर्मोत्पत्तिवाक्यं प्रतिपादपति। यस्मिन् वाक्ये द्रव्य-देवतादिगुणै: विशिष्टस्य कर्मण: विधानं भवति, तद् वाक्यं 'सगुणकर्मोत्पत्तिवाक्यम्' इत्युच्यते। गुणेन सह वर्तते इति सगुणम्, सगुणं च तत् कर्म च सगुणकर्म, सगुणकर्मण: उत्पत्ति: सगुणकर्मोत्पत्ति:, तस्या: प्रतिपादकं वाक्यं सगुणकर्मोत्पत्तिवाक्यम्। यथा 'सोमेन यजेत' इति वाक्येन सोमलतारूपद्रव्ययुक्तस्य यागस्य विधानं क्रियते। विशिष्टस्य विधाने सति विशेषणस्य विधानमर्थादेव सिध्यति। विशेषणस्य विधानार्थं कस्यापि भिन्नवाक्यस्य आवश्यकता न भवति। अयमभिप्राय: यद् 'सोमेन यजेत' इत्यत्र सोमविशिष्टस्य यागस्य विधानमस्ति, तेन विशेषणरूपस्य सोमस्यापि विधानं स्वत एव जातम्।

- **सफलकर्मोत्पत्तिवाक्यम्।**

**मूलम् - क्वचित् कर्मोत्पत्तिवाक्यमेव फलसम्बन्धबोधकम् अपि भवति। यथा - 'उद्भिदा यजेत पशुकाम:' इति। अत्रोद्भिन्नामको यागो वाक्यान्तराविहित एव पशुकामस्य पशुफलाय विधीयते इत्येकमेवेदं वाक्यं फलसाधनयागविधायकम्।**

कुत्रचित् कर्मोत्पत्तिवाक्यमेव, फलसम्बन्धबोधकमपि भवति, तच्च 'सफलकर्मोत्पत्तिवाक्यम्' इत्यपि व्यवह्रियते। पूर्वं ब्राह्मणवाक्यविभाजनावसरे ग्रन्थकृता 'इत्यादिभेदात्' इत्युक्तम्, तत्र 'आदि' शब्देन किं तत् वाक्यं स्वीकार्यं इति जिज्ञासायां सत्यामत्र 'क्वचित्' इति ग्रन्थेन प्रतिपादितमस्ति।

यथा - 'उद्भिदा यजेत पशुकाम:' अस्मिन् 'उद्भिद्संज्ञकस्य यागस्योत्पत्तिवाक्यं, पशुरूपफलस्य सम्बन्धोऽपि बोधितोऽस्ति।' अत इदं वाक्यं पशुरूपफलसहितस्य यागस्य विधायकं वर्तते। 'उद्भिद्' इति नाम यस्य स: उद्भिन्नामक:। अयं याग: एतद्वाक्यातिरिक्तेन अन्येन केनापि वाक्येन विहितो नास्ति। पशुरूपं फलं पशुफलं तस्मै पशुफलाय इति विग्रह:। फलसाधनयागविधायकमिति। फलप्राप्ते: साधनतया यागस्य विधायकमित्यर्थ:। केवलं याग एव न विधीयते, अपितु फलसाधनविशिष्टो यागो विधीयते इति तात्पर्यम्।

## स्वाध्यायः

### १. रिक्तस्थानपूर्तिं कुरुत।

(१) तत्र येन वाक्येन 'इदं कर्म कर्तव्यम्' इति बोध्यते, तत् .........।
(कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्)

(२) मन्त्रब्राह्मणात्मको .........। (वेदः, आगमः, ग्रन्थः)

(३) 'दध्ना जुहोति' इति ......... वाक्यम्। (कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्)

(४) 'अग्निहोत्रं जुहोति' इति ......... वाक्यम्। (कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्)

(५) 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति ......... वाक्यम्। (कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्)

(६) फलसम्बन्धबोधको विधिः .........। (गुणविधिः, फलविधिः, कर्मविधिः)

(७) फलोद्देशेन गुणस्य विधायकं वाक्यं .........। (कर्मणे गुणवाक्यम्, फलाय गुणवाक्यम्, गुणवाक्यम्)

(८) ब्राह्मणवाक्यम् ......... विधम्। (एक, द्वि, अनेक)

(९) 'सोमेन यजेत' इति ......... वाक्यम्। (गुणवाक्यम्, सगुणकर्मोत्पत्तिवाक्यम्, फलवाक्यम्)

(१०) द्रव्यदेवतादिविधायकं वाक्यं ..........। (कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्)

### २. एकैकवाक्येन उत्तरं लिखत।

(१) ब्राह्मणवाक्यं कतिविधम्?

(२) कर्मोत्पत्तिवाक्यस्य उदाहरणं लिखत।

(३) 'दध्ना जुहोति' इति कस्य उदाहरणम्?

(४) गुणवाक्यस्य लक्षणं लिखत।

(५) कर्मोत्पत्तिवाक्यस्य लक्षणं ब्रूत।

(६) 'दध्नेन्द्रियकामस्य जुहुयात्' इति कस्य उदाहरणम्?

(७) कः स्वर्गकामः?

### ३. द्वित्रवाक्यैःउत्तरं लिखत।

(१) फलवाक्यनिरूपणस्य व्याख्यां कुरुत।

(२) फलाय गुणवाक्यं निरूपयत।

(३) सगुणकर्मोत्पत्तिवाक्यं निरूपयत।

(४) 'उद्भिदा यजेत पशुकामः' इति कीदृशं वाक्यम्?

(५) ब्राह्मणवाक्यं कतिविधम्?

### ४. टिप्पणीः लिखत।

(१) गुणवाक्यम्।

(२) सफलकर्मोत्पत्तिवाक्यम्।

(३) ब्राह्मणवाक्यम्।

### ५. निबन्धात्मकम् उत्तरं लिखत।

(१) ब्राह्मणवाक्यं परिचाययत।

(२) फलाय गुणवाक्यस्य स्वरूपं स्पष्टयत।

(३) सगुणकर्मोत्पत्तिवाक्यम् उपपादयत।

●

# ५ प्रयोगविधिः

**प्रस्तावना**

अस्मिन् मीमांसाशास्त्रे चत्वारो विधयः निर्दिष्टाः सन्ति। तत्र (१) उत्पत्तिविधिः, (२) विनियोगविधिः, (३) अधिकारविधिः, (४) प्रयोगविधिः इति। तत्र कर्मस्वरूपमात्रप्रकाशकः 'अग्निहोत्रं जुहोति' इत्याकारकः उत्पत्तिविधिः। अङ्गताप्रकाशकं 'दध्ना जुहोति' इति वाक्यं विनियोगविधिः। कर्मानुष्ठाने कर्तुः अधिकारप्रकाशकं 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति वाक्यं अधिकारविधिः। तत्र कर्मोत्पत्तिवाक्यं, सगुणकर्मोत्पत्तिवाक्यं, सफलकर्मोत्पत्तिवाक्यं च उत्पत्तिविधिरेव। गुणवाक्यं, फलाय गुणवाक्यं च विनियोगविधिरेव। फलवाक्यं च अधिकारविधिरित्येवं ज्ञातव्यम्। ग्रन्थकृता निर्दिष्टानां चतुर्विधविधिवाक्यानां मध्ये चतुर्णां स्वरूपस्य तत्तदुल्लिखितेषु स्पष्टत्वात् अवशिष्टस्य प्रयोगविधेः निरूपणं करोति।

**प्रयोगविधिः**

**मूलम् - प्रधानविधिरेवाङ्गविधिभिः एकवाक्यतया महावाक्यतामापन्नः सन् सर्वाङ्गविशिष्टप्रधानप्रयोगविधायकत्वात् प्रयोगविधिरित्युच्यते। यथा - 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति। अत्र 'अग्निहोत्रहोमेन स्वर्गं भावयेत्' इत्यर्थः प्रतीयते। भावयेत्-उत्पादयेत्, कुर्यात् इति यावत्। अत्र 'कथमनेन होमेन स्वर्गं' कुर्यात् इति - कथम्भावाकाङ्क्षा जायते। यथा 'कुठारेण द्वैधीभावं कुर्यात्' इत्युक्ते भवत्याकाङ्क्षा 'कथमनेन द्वैधीभावं कुर्यात्' इति। तत्र 'उद्यमननिपातनादिसहायेन' इति गम्यते।**

तद्वदत्रापि 'अग्निं प्रणयति', 'अग्निषु समिध आदधाति' इत्याद्यङ्गविधिविहितप्रणयनसमिदाधानायतनशोधनादिकाङ्ग-कलापजनितोपकारसहितेन अग्निहोत्रहोमेन स्वर्गं कुर्यात् इति प्रकरणकल्पितेन होमवाक्येन स्वर्गाय साङ्गोऽग्निहोत्रप्रयोगो विधीयत इत्येतादृशः प्रयोगविधिः।

अङ्गजातमेवेय्यम्भाव इति, इतिकर्तव्यता इति च उच्यते। अत्र अग्निहोत्र-होमः प्रधानं, प्रणयनादिकं सर्वम् अङ्गम्।

प्रधानस्य कर्मणो विधिः प्रधानविधिरित्युच्यते। प्रधानकर्मोपकारकस्योपकरणस्य विधिः अङ्गविधिरित्युच्यते। अङ्गविधिवाक्यैः सह एकवाक्यतामवाप्य महावाक्यतां लभमानः प्रधानविधिरेव सम्पूर्णाङ्गविशिष्टस्य प्रधानकर्मणो विधायको भवतीति कृत्वा स एव 'प्रयोगविधिः' इत्युच्यते। यथा - 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यस्मात्प्रधानविधिबोधकात् वाक्यात् 'अग्निहोत्रहोमेन स्वर्गं सम्पादयेत्' इत्यर्थः प्रतीयते। इत्यर्थप्रतिपादनेनेदं सूचितं यत् प्रधानविधिवाक्यस्य अङ्गविधिवाक्येन सह एकवाक्यताकरणे आकाङ्क्षा आवश्यकी भवति।

**व्याख्याः** शङ्का - फलविधेः उदाहरणप्रदर्शनावसरे उपर्युक्तस्यैव वाक्यस्य 'स्वर्गं कामयमानेन पुरुषेण अग्निहोत्रहोमः कर्तव्य इत्यर्थो वर्णितः, किन्तु अत्र तावत् 'अग्निहोत्रहोमेन अर्थात् अग्निहोत्रहोममनुष्ठाय स्वर्गः सम्पादनीयः इत्यर्थः कथं वर्ण्यते?'

**समाधानम्** - वस्तुतः अयमेवार्थः समुचितः, यतः 'स्वर्गकाम' पदस्य लक्षणया केवलं 'स्वर्ग' इत्येवार्थः कर्तव्योऽस्ति। 'स्वर्गकामः' इति प्रथमान्तं पदं 'स्वर्गकामम्' इति द्वितीयार्थे, 'अग्निहोत्रम्' इति द्वितीयान्तं पदं च 'अग्निहोत्रेण' इति तृतीयार्थे विहितोऽयम्। पूर्वं तावत् बालानां सुखावबोधार्थं केवलं शब्दार्थो विज्ञापित आसीत्। 'भावयेत्' इत्यस्यार्थः, उत्पादयेत्, कुर्यात् इत्यवगन्तव्यः। उभावपि शब्दौ समानार्थकौ स्तः। प्रायः आख्यातार्थस्य भावनापदेन प्रतिपादनं क्रियते मीमांसकैः। प्रकृतमनुसरामः-होमेन स्वर्गः कथं सम्पादनीयः? इत्याकारिका 'आकाङ्क्षा' एव 'कथंभावाकांक्षा

अथवा इति कर्तव्यताकांक्षा' इत्युच्यते। यथा 'कुठारेण द्वैधीभावं कुर्यात्' इत्युक्ते सति केन प्रकारेण द्वैधीभावं कुर्यात् इति जिज्ञासा उत्पद्यते। तदा 'कुठारस्य उद्यमनं निपातनं च कृत्वा' द्वैधीभावः कर्तव्यो भवतीति ज्ञायते। तथैवात्र अग्निहोत्रप्रकरणे 'गार्हपत्यात्' आहवीय-दक्षिणाग्निकुण्डयोः अग्निः आग्नेयः, 'अग्नौ च समिधः प्रक्षेपणीयाः' इत्यादिभिः पठितैः अङ्गविधिभिः येषां विधानं कृतमस्ति, एतादृशैः अग्निप्रणयन-समिदाधानाऽयतनशोधनादीनां अङ्गानां साहाय्येन अग्नौ होमस्य अनुष्ठानं सम्पाद्य स्वर्गः सम्पादनीयः। एतादृशस्य प्रधानकर्मणः इतिकर्तव्यताकांक्षावशात् कल्पितामेक-वाक्यतामवलम्ब्य स्वर्गार्थं सर्वाङ्गयुक्तस्य अग्निहोत्रकर्मणः विधानं भवतीति कृत्वाऽयम्प्रयोगविधिरित्युच्यते। प्रधानकर्मणः अङ्गसमूह एव 'इत्थंभाव' शब्देन इतिकर्तव्यताशब्देन वा उच्यते। अत्र स्थले अग्निहोत्रं प्रधानं कर्म, अग्निप्रणयनादिकं च तस्यैव प्रधानकर्मणः अङ्गभूतं विद्यते। मूले - उद्यमननिपातनादिसहायेन इत्यस्य अग्रे 'कुठारेण द्वैधीभावं कुर्याद्' इत्यध्याहारः कर्तव्यः। तथैव इति शब्दस्याग्रे 'महावाक्यम्' इति अध्याहारः कल्पनीयः। एवञ्च 'कुठारेण द्वैधीभावं कुर्यात्' इति प्रधानवाक्यस्य 'कुठारमुद्यच्छतीति', 'कुठारं निपातयति' इत्यादिभिः अङ्गवाक्यैः आकांक्षाबलेन परस्परान्वये सति एकवाक्यतायां सत्यां 'उद्यमन-निपातनादिक्रियायुक्तेन कुठारेण काष्ठस्य द्वैधीभावं कुर्यात्' इति महावाक्यं निष्पद्यते। कथंभावाकांक्षायां सत्यां प्रधानविधिसमीपस्थितैः अङ्गविधिभिः सहैवैकवाक्यता भवति। अन्यप्रकरणस्थितैरङ्गविधिवाक्यैः सह एकवाक्यता न भवतीत्यर्थः।

**विधिः**

↓

- उत्पत्तिविधिः
- विनियोगविधिः → फलाय गुणवाक्यम्
- अधिकारविधिः → फलवाक्यम्
- प्रयोगविधिः → कर्मोत्पत्तिवाक्यम्, सगुणकर्मोपत्तिवाक्यम्, सफलकर्मोपत्तिवाक्यम्

- **फलापूर्वकल्पना**

**मूलम् - नन्विदमनुपपन्नम्। आशुतरविनाशिनां कर्मणां कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्तेः इति चेन्नैव। विहितनिषिद्धकर्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते आशुतरविनाशिनां कर्मणां कालान्तरभाविफलसाधनत्वोपपत्यर्थमन्तरा पुण्यपापरूपमपूर्वं कल्प्यते। ततच्च यागादेरपूर्वद्वारा स्वर्गसाधनत्वं, न साक्षात्। तदेव फलापूर्वम्। तत्करणत्वञ्च प्राच्योदीच्याङ्गविशिष्टस्य प्रधानस्य भवति, न प्रधानमात्रस्य, प्रधानमात्रादेव फलापूर्वजनने फलस्यापि तत एव सिद्धेः अङ्गानामानर्थक्यापत्तेः।**

**शङ्का** - यागादिकर्मणां क्षणिकत्वात् कालान्तरे स्वर्गनरकादीनां प्राप्तौ तत्कथं कारणं भवेत्? यतो हि 'कार्यनियतपूर्ववृत्तिकारणम्' इति नियमात् स्वर्गप्राप्तिरूपकार्यस्य पूर्वं यागादिरूपकर्म न दृश्यते।

**समाधानम्** - अत्र कर्मफलयोर्मध्ये पुण्यरूपस्य पापरूपस्य वा कस्यचित् अपूर्वस्य कल्पना क्रियते। अपूर्वस्य कल्पना करणेन यागादिकर्माणि क्षणिकान्यपि स्वजन्यापूर्वद्वारा फलसाधनानि भवन्ति, न साक्षात्। तेन साध्यसाधनभावसम्बन्धः सूपपादो भवति। इदमपूर्वमेव फलापूर्वशब्देनोच्यते। साङ्गं प्रधानकर्मैव फलापूर्वजनकं भवति, तत्फलापूर्वद्वारैव क्षणिकान्यपि कर्माणि फलसाधनानि भवन्तीति सिध्यति। यथा घटरूपकार्यसिद्धये अदृश्यमानः दण्डः अपि कारणरूपो भवति तदनुष्ठितस्य यागस्य फलं स्वर्गरूपं कालान्तरे प्राप्यते।

- **उत्पत्यपूर्वकल्पना**

**मूलम् - ननु सर्वाङ्गविशिष्टस्य प्रधानस्याऽपूर्वजनकत्वम् उक्तम्। तच्चाशुतरविनाशिनः**

**प्रधानस्याङ्गसाहित्याभावान्न सम्भवतीति चेन्न। प्रधानकर्मणः स्वरूपेणाङ्गसाहित्याभावेऽपि उत्पत्त्यपूर्वद्वारा साहित्यसम्भवात्। प्रधानस्य सर्वाङ्गसाहित्यसिध्यर्थं प्रधानकर्म-परमापूर्वयोर्मध्ये प्रधानमात्रजन्यमुत्पत्तिनामकं किञ्चिदपूर्वमस्तीत्यङ्गीकारात्। एवमङ्गानामपि परस्परसहितानामेव प्रधानोपकारकत्वात्तेषां स्वरूपेण साहित्याभावात् तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं बोध्यम्। अङ्गानां प्रधानोपकारकत्वं नाम प्रधानस्य फलापूर्वजननसामर्थ्योन्मुखीकरणमेव।**

अत्र शङ्कते – सम्पूर्णं अङ्गसहितात् प्रधानकर्मणः सकाशात् अपूर्वोत्पत्तिर्भवतीति तन्न सम्भवति। शीघ्रतरविनाशिनः प्रधानस्य, अङ्गानाञ्च साहित्यमेव न सम्भवति। समवायेन, संयोगेन च साहित्यं न सम्भवति। ध्वस्तानां प्राच्याङ्गानां प्रधानसाहित्यं ध्वस्तस्य प्रधानस्य उदीच्याङ्गसाहित्यं न सम्भवतीति तात्पर्यम्।

पूर्वपक्षिणा एवं न मन्तव्यमिति सिद्धान्ती समाधत्ते। प्रधानकर्मणा अङ्गकर्मसाहित्यं यद्यपि स्वरूपतो न लभ्यते, तथापि प्रधानकर्म उत्पत्त्यपूर्वद्वारा अङ्गकर्मसाहित्यं लभते। यतो हि अङ्गकर्मसाहित्यलाभार्थं, प्रधानकर्मफलापूर्वयोर्मध्ये केवलं प्रधानकर्मणः सकाशादुत्पन्नं 'उत्पत्ति' संज्ञकमपूर्वं भवतीतिमीमांसकसिद्धान्तः। तद्वत् अङ्गकर्माण्यपि परस्पर सन्निहितानि भूत्वैव प्रधानकर्मणः उपकारकाणि भवन्ति। अतः तत्तदङ्गकर्मभ्यः एकैकम् उत्पत्यपूर्वं प्रकल्प्य तदपूर्वद्वारा सर्वेषाम् अङ्गकमर्णां परस्परं प्रधानकर्मणा सह सान्निध्यं भवतीति विज्ञेयम्। अङ्गकर्मणां प्रधानोपकारकत्वं नाम प्रधानकर्मणि फलापूर्वनिर्माणसामर्थ्यं विधाय तत्सम्मुखीकरणम्।

- **दर्शपूर्णमासयोर्विशेषः**

**मूलम् – यदाग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पौर्णमास्याञ्चाच्युतो भवति इत्याग्नेययागो विहितः, 'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्राचच्छत्' इत्यग्नीषोमीययागो विहितः, 'उपांशुयाजमन्तरा यजति' इति उपांशुयागः 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौणमास्यां यजन्' इति वाक्यात् पौर्णमास्यां विहितः। एतानि पौर्णमास्यां प्रधानानि। एषामाग्नेयाग्नीषोमीयोपांशुयागानां तत्तद्वाक्यावगतपौर्णमासी कालसम्बन्धंनिमित्तीकृत्य 'य एवं विद्वान् पौर्णमासीं यजते' इति विद्वद्वाक्ये पौर्णमासीपदेन एकवचनान्तेन समुदायरूपेणानुवादः तेन वेदे यत्र यत्र पौर्णमासीशब्दः तत्राग्नेयादिसमुदायोपस्थितिः।**

उपर्युक्तस्सन्निध्यपेक्षया दर्शपूर्णमासयागे विशेषं प्रतिपादयति। तत्र 'यदाग्नेय' इति वाक्येन 'आग्नेय' संज्ञको यागो विधीयते। 'ताभ्यामेतं' इति वाक्येन 'अग्नीषोमीययागो' विधीयते। तथा 'उपांशुयाज.' इति वाक्येन 'उपांशु' संज्ञको यागो विधीयते। तस्य चोपांशुयागस्य 'तावब्रूता.' इति वाक्येन पौर्णमास्यां विधानं क्रियते। एवं च पौर्णमास्यां तिथौ त्रयः प्रधानयागाः भवन्ति। अग्नीषोमीयोपांशुयागसंज्ञकानां त्रयाणां यागानां 'यदाग्नेय.' इत्यादि तत्तद्वाक्यैः अवगतो यः पौर्णमासकालेन सम्बन्धः तमनुलक्ष्य 'य एवम्.' इत्यादिविद्वत्पदघटितवाक्ये प्रयुक्तेन 'पौर्णमासीम्' इत्येकवचनान्तेन पदेन यागत्रयात्मकस्य समुदायस्यानुवादः क्रियते। तेन वेदे यागप्रकरणे यत्र क्वापि प्रयुक्तेन 'पौर्णमासी' पदेन आग्नेयादियागसमुदायस्यैव ग्रहणं वेदितव्यम्। दर्शपूर्णमासयागकर्मणि नवसंख्याकानि अपूर्वाणि भवन्ति। यथा षट्संख्यकानि उत्पत्यपूर्वाणि, द्विसंख्याकानि समुदायापूर्वाणि, एकसंख्याकं परमापूर्वम् इति मिलित्वा नवसंख्यकानि अपूर्वाणि भवन्ति। 'यदाग्नेय' इति वाक्ये 'यद्' शब्दस्यार्थः अविवक्षितः। 'अग्निः देवतास्य' इति व्युत्पत्या 'आग्नेय' शब्दो देवतातद्धितप्रत्ययान्तः। अष्टसु कपालेषु संस्कृतः पुरोडाशः 'अष्टाकपाल' शब्देनोच्यते। तथा एकादशकपालेषु संस्कृतः पुरोडाशः एकादशकपाल-शब्देनोच्यते।

- **यजिपदाश्रवणेऽपि यागविधानम्।**

**मूलम् – ननु 'यदाग्नेय' इति वाक्ये यागवाचकपदस्याश्रवणात् कथं यागविधायकत्वमिति चेत्, मैवम्। 'अग्निदेवता अस्य पुरोडाशस्य इत्यर्थे विहितदेवतातद्धितान्त आग्नेयशब्दः। तस्य पुरोडाशपदसामान्याधिकरण्याद् द्रव्य-देवतासम्बन्धोऽवगतः। स च यागमन्तरा न सम्भवति, द्रव्यदेवतासम्बन्धस्य यागादन्यत्र क्रियायामसम्भवात्,**

**इति यागक्रियायामेव सम्बन्धो वाच्यः। देवतोद्धेशेन द्रव्यत्यागस्य यागरूपत्वाङ्गीकारात्। अतः श्रुतद्रव्यदेवतासम्बन्धानुमितो यागो यजेतेति कल्पितेन पदेन विधीयते - अग्निदैवत्वपुरोडाशद्रव्यकामावा-स्यादिकालकर्तव्ययागेन अदृष्टं भावयेदिति। एवं यत्र यत्र द्रव्य-देवतासम्बन्धमात्रं श्रूयते, 'सौ र्यंचरुं निर्वपेत्' इत्यादौ, तत्र सूर्यदेवताचरुद्रव्यसम्बन्धानुमितो यागो विधीयते इति न कश्चिद्दोषः।**

अत्रैवमाशङ्कते 'यदाग्नेय' इत्यादिवाक्ये यागवाचकपदस्याऽभावात् वाक्यमिदं यागस्य विधानं कथं कुर्यात्? मैवं शङ्कनीयम्। 'अग्निरस्ति देवता यस्य पुरोडाशस्येत्यर्थे विहितो देवतातद्धितो 'ढक्' प्रत्ययो यस्यान्ते, एतादृशोऽयमाग्नेयशब्दोस्ति। तस्याग्नेय-शब्दस्य 'अष्टाकपालपुरोडाश' शब्देन सह एकार्थावबोधकत्व-रूपसामानाधिकरण्यात् द्रव्य-देवतयोः सम्बन्धावगमो 'यदाग्नेय' इति वाक्येन भवति। स च सम्बन्धो यागं विना न सम्भवति। द्रव्यदेवतयोः सम्बन्धो यागातिरिक्तायां कस्यामपि क्रियायां न सम्भवति, तेन स च सम्बन्धो यागक्रियायामेव स्वीकर्तव्यः। यतो हि देवतामुद्धिश्य क्रियमाणस्य द्रव्यत्यागस्यैव यागपदार्थत्वात्। अत आग्नेयादिशब्दैः अवगतस्य द्रव्यदेवता-सम्बन्धस्योपपत्यर्थं कल्पितेन 'यजेत' इति पदेन यागो विधीयते। यथा अग्निदेवतामुद्धिश्य पुरोडाशद्रव्येण अमावास्यादिकाले कर्तव्येन यागेन इष्टं भावयेत्। एवमेव यत्र यत्र केवलं द्रव्यदेवतासम्बन्धः श्रुतो भवति तत्र तत्र द्रव्यदेवतासम्बन्धेनानुमितस्य यागस्य विधिर्ज्ञातव्यः। यथा 'सौर्यं चरुं निर्वपेत् इत्यत्र सूर्यदेवताचरुद्रव्ययोः सम्बन्धेन यागो विधीयते। अतः 'यदाग्नेय' इति वाक्ये प्रत्यक्षं यजेः अश्रवणेऽपि यागो विधीयत इति न कोऽपि दोषः।

- **लिङादिप्रत्ययाद्यभावेऽपि विधिकल्पना**

**मूलम् - ननूपांशुयागवाक्ये यजेः श्रवणेऽपि विधिप्रत्ययलिङादेः अभावात् कथं विधायकत्वमिति चेत् मैवम्। यजतीत्यस्य यजेतेति विपरिणामेन विधायकत्वसम्भवात्। एवं यत्र लिङ्गादिर्नश्रूयते 'व्रीहीन् प्रोक्षति' 'समिधो यजति' इत्यादावपि विपरिणामो बोध्यः। केचित्तु यजतीत्यस्य पञ्चमलकारत्वाङ्गीकाराद् विधायकत्वसम्भव - इत्याहुः।**

तथा - 'ऐन्द्रं दध्यमावास्यायाम्' 'ऐन्द्रं पयोऽमावास्यायाम्' इति वाक्यविहितौ सान्नाय्ययागौ, 'यदाग्नेय' इति वाक्यविहिताग्नेयागश्चामावास्यायां प्रधानानि। एषां त्रयाणां 'य एवं विद्वानमावास्यां यजते 'इति वाक्ये अमावास्यायामिति नाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः। तेन वेदे यत्र दर्शशब्दोऽमावास्या-शब्दो वा श्रुतस्तत्र यागसमुदायोपस्थितिः। त्रिकस्य त्रिकस्यामावास्यापौर्णमासीशब्दाभ्यां समुदायरूपेण विद्वद्वाक्येऽनुवादस्य प्रयोजनन्तु 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादौ द्विवचनोपपत्तिः। अन्यथा षण्णामाग्नेयादियागानां बहुत्वात् दर्शपूर्णमासैः इति बहुवचनं स्यात्। मानान्तरेण प्राप्तस्यार्थस्य पुनः श्रवणमनुवादः।

तथा फलवदाग्नेयादिसन्निधौ आम्नातानि प्रयाजाज्यभागानुयाजादीनि षण्णां यागानाम् अङ्गभूतानि।

**सरलार्थः** - पूर्वपक्षी पुनः शंकते - 'उपांशुयाग' वाक्ये प्रत्यक्षं यजते विद्यमानत्वेऽपि विधिबोधकलिङ्गादि-प्रत्ययस्य प्रयोगाभावात् तेन वाक्येन उपांशुयागस्य विधानं कथं भवितुमर्हति?

सिद्धान्ती समाधते। यजतीत्यस्य पदस्य 'यजेत' इति विभक्तिविपरिणामं विधाय 'उपांशु.' इति वाक्यस्य यागविधायकत्वं सम्भविष्यति। एवमेव 'व्रीहीन् प्रोक्षति', 'समिधो यजति' इत्यादिस्थलेष्वपि विपरिणामो विज्ञेयः। केचनविद्वांसः 'यजतीत्यादि' स्थलेषु 'यजति' इति रूपं 'लेट्' लकारस्य आमनन्ति। तेषां मतेन एतादृशानां वाक्यानां विधायकत्वे न काचिदपि संशीतिः।

'तथे'ति पदं 'पौर्णमास्यां प्रधानानि' इत्यत्र अन्वेति। यथा पौर्णमास्यां तिथौ त्रयः प्रधानयागाः प्रतिपादिताः, तथैव 'ऐन्द्रं दधि', 'ऐन्द्रम्पयः', इति वाक्याभ्यां विहितौ द्वौ सान्नाय्ययागौ, अथ च 'यदाग्नेय-अष्टाकपालोऽमावास्यायां यो पौर्णमास्यां चाच्युतो भवति' इति वाक्येन विहितः आग्नेययागः इति त्रयो यागा अमावास्यातिथौ प्रधानाः सन्ति। एतेषां त्रयाणां यागानां समुदायस्य 'य एवम्' इत्यादि वाक्ये 'अमावास्याम्' इति द्वितीयैकवचनान्तेन अनुवादः कृतोऽस्ति।

'यदाग्नेय' इति वाक्ये कालद्वयस्य उल्लेखो वर्तते। किन्त्वेकमेव कर्म वर्तते। आवृत्तिं विना कालद्वये तस्य अनुष्ठानं न कर्तुं शक्यते। अतः पौर्णमास्यामनुष्ठितस्याग्नेययागस्य पुनश्चामावास्यायामपि अनुष्ठानं कर्तव्यम्। वेदे यत्र क्वापि 'दर्श' पदम् 'अमावास्या' पदं वा श्रुतं भवेत्, तत्र त्रयाणां यागानां समुदाय एवोपस्थितो भवति। 'य एवं विद्वान् पौर्णमासीम्' 'अमावस्याम्' इति द्वाभ्यां पदाभ्यां प्रत्येकं एकैकस्य त्रिकस्य समुदायरूपेण योऽनुवादः कृतोऽस्ति, तस्य प्रयोजनं दर्शयति 'दर्शपूर्णमासाभ्यामिति' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यघटकीभूतदर्शपूर्णमासाभ्यामिति द्विवचनोपपत्यर्थमयमनुवाद इति विज्ञेयम्। अन्यथा तत्रानुष्ठीयमानानामाग्नेयादिषण्णां यागानां अनेकत्वात् 'दर्शपूर्णमासैः' इति बहुवचनेन भाव्यम्। किन्तु भगवती श्रुतिस्तथा न वदति, सा तु 'दर्शपूर्णामासाभ्यां' मिति द्विवचनान्तमेव पदं प्रत्युङ्कते। अनुवादस्य स्वरूपं प्रदर्शयति - 'मानान्तरेणेति'। केनापि अन्येन प्रमाणेन ज्ञातस्य अर्थस्य पुनः श्रवणमनुवादः। यथा तत्तद्यागवाक्यैर्विहिता आग्नेयादिषड्यागाः प्राधान्यं भजन्ते, तथा फलवतां प्रधानयागानां सन्निधौ तत्तद्वाक्यैर्विहितानि प्रयाजानुयाजाज्यभागादीनि फलरहितानि यानि कर्माणि, तानि तेषां प्रधानयागानामंगभूतानि।

- **त्रिकापूर्वाद्युत्पत्तिः**

**मूलम् - एवं स्थिते 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यस्यायमर्थः दर्शपूर्णमासाभ्यां समुदायाभ्यां परस्परसहिताभ्यां स्वर्गापूर्वं कुर्यादिति। तत्र कथं कालद्वयवर्तिनोः समुदाययोः परस्परसाहित्यमित्याकाङ्क्षायां स्वरूपेण साहित्याभावेऽपि त्रिकात्-त्रिकादेकैकमपूर्वं जायते, तद्द्वारा द्वयोः समुदाययोः साहित्यमित्युच्यते। एककैस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथमित्याकाङ्क्षायां प्रयाजानुयाजादिपूर्वोत्तराङ्गकलापविशिष्टस्य एकैकस्य त्रिकस्य समुदायापूर्वजनकत्व-मुच्यते। एकैकस्य त्रिकस्य सर्वाङ्गसाहित्यं स्वरूपेण न सम्भवतीति त्रिभिर्यागैस्त्रीण्युत्पत्यपूर्वाणि जायन्ते। तद्द्वारा सर्वाङ्गसाहित्यम्। अङ्गानामपि प्रयाजादीनां स्वरूपेण प्रधानसाहित्याभावात् तत्तदुत्पत्यपूर्वद्वारा साहित्यं वाच्यम्। तथा च प्रधानजन्योत्पत्यपूर्वाणां प्रयाजादिजन्योत्पत्यपूर्वैः साहित्यं यदस्ति तदेव प्रधानानामङ्गविशिष्टत्वरूपं साङ्गत्वम्।**

एवञ्च पौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्यपूर्वसचिवैः समुदायापूर्वमेकं जन्यते, तथा दर्शेऽपि आग्नेयद्वयजन्यैस्त्रिभिरपूर्वैरङ्गोत्पत्यपूर्वजन्यैरेकैकं त्रिकापूर्वं जन्यते, ताभ्यां त्रिकापूर्वाभ्याम् आग्नेयाद्युत्पत्य पूर्वत्रितयद्वयजन्याभ्यां फलजनकीभूतं महापूर्वं, फलापूर्वनामकं जन्यते, ततश्च फलमिति। तथा च सर्वाङ्गोपकृताभ्यां दर्शपूर्णमासाभ्यामपूर्वद्वारा स्वर्गं कुर्यादिति फलापूर्वनिष्पत्तये साङ्गप्रधानकर्तव्यताबोधको विधिः प्रयोगविधिरिति सिद्धम्।

**सरलार्थः** - 'दर्श' पदेन, 'पूर्णमास' पदेन च यागानां त्रिकं-त्रिकं ग्राह्यमिति निश्चिते सति 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यस्यायमर्थो निष्पद्यते - परस्परसंयुक्ताभ्यां दर्शसमुदाय - पूर्णमाससमुदायाभ्यामिति द्वाभ्यां समुदायाभ्यां स्वर्गजनकमपूर्वं सम्पादनीयम्।

शंका - भिन्न - भिन्नकालस्थितयोः यागसमुदाययोः परस्परं सान्निध्यं कथं सम्भवितुमर्हति?

समाधानम् - तयोः समुदाययोः स्वरूपतः सान्निध्याभावेऽपि एकैकस्मात् यागत्रिकात् एकैकमपूर्वमुत्पद्यते। तदपूर्वद्वारा द्वयोरपि यागसमुदाययोः सान्निध्यमुपपद्यते। त्रयाणां यागानां समूहः एकं त्रिकम् इत्युच्यते।

शंका - एकैकस्मात् त्रिकात् 'त्रिकापूर्वं' कथमुत्पद्यते?

समाधानम् - प्रधानयागानुष्ठानात् पूर्वमनुष्ठितैः प्रयाजानुयाजाद्यङ्गैः, अथ च प्रधानयागानुष्ठानोत्तरमनुष्ठीयमानै; अङ्गैः सहितात् एकैकस्मात् यागत्रिकात् समुदायापूर्वम् उत्पद्यते। एकैकस्मिन् यागत्रिके सर्वेषामङ्गानां सान्निध्यं न सम्भवति त्रिभ्यो यागेभ्यस्त्रीणि उत्पत्यपूर्णाणि भवन्ति, तद्वारा चैकैकयागत्रिकं सर्वाङ्गसाहित्यं लभते। प्रयाजाद्यङ्गानामपि स्वरूपतः प्रधानयागसान्निध्याऽसंभवेऽपि तत्तदुत्पत्यपूर्वैरेव सान्निध्यं वेदितव्यम्। एवञ्च प्रधानयागोत्पन्नस्य उत्पत्यपूर्वस्य, प्रयाजाद्यङ्गत्रयरूपोत्पत्यपूर्वैः सह सान्निध्यं तदेव प्रधानयागानामङ्गविशिष्टत्वरूपं साङ्गत्वं विज्ञेयम्।

तद्वारा चैकैकं यागत्रिकं सर्वाङ्गसाहित्यं लभते। प्रयाजाद्यङ्गनामपि स्वरूपतः प्रधानयागसान्निध्याऽसंभवेऽपि तत्तदुत्पत्यपूर्वैरेव सान्निध्यं वेदितव्यम्। एवञ्च प्रधानयागोत्पन्नस्य उत्पत्यपूर्वस्य, प्रयाजाद्यङ्गत्रयरूपोत्पपूर्वैः सह सान्निद्य तदेव प्रधानयागानामङ्गविशिष्टत्वरूपं साङ्गत्वं विज्ञेयम्।

पौर्णमास्यामनुष्ठीयमानेभ्यः त्रिभ्यः आग्नेयादिप्रधानयागेभ्यः उत्पन्नानाम् पूर्वाणाम् अथ च प्रयाजादिभ्योङ्गेभ्य उत्पन्नानामुत्पत्यपूर्वाणाञ्च साहित्येन एकं समुदायजन्यमपूर्वमुत्पद्यते। तथैव दर्शयागेऽपि त्रिभ्यः (१) आग्नेय (२) ऐन्द्रंदधि (३) ऐन्द्रपयोयागेभ्य उत्पन्नानां त्रयाणमपूर्वाणाम् अथ च तदङ्गेभ्य उत्पन्नानामपूर्वाणां साहित्येन एकंसमुदाय जन्यमपूर्वेण **त्रयाणाम**पूर्वाणामेकैकः समुदायो भवति। इति त्रिकद्वययोः द्वे त्रिकापूर्वे भवतः। ताभ्यां उभाभ्यां त्रिकापूर्वाभ्यां एकं फलापूर्वसञ्ज्ञकं महापूर्वं निष्पद्यते। तस्माच्च फलमुत्पद्यते। इदं फलापूर्वं यागकर्तुरात्मनि तावत्तिष्ठति यावत् फलं न सम्पद्यते। अनेनैव महापूर्वेण यागकर्तुः फललाभो भवति।

एवञ्च 'समस्ताङ्गसमन्विताभ्यां दर्शपूर्णमासाभ्यामपूर्वद्वारा स्वर्गः सम्पादनीयः' एवंम्प्रकारकः फलापूर्वनिष्पत्यर्थं सर्वांगसहितस्य प्रधानकर्मणः कर्तव्यताबोधको यो विधिः सः प्रयोगविधिरितिसिध्यति।

## स्वाध्यायः

**१. रिक्तस्थानपूर्तिं कुरुत।**

(१) मीमांसाशास्त्रे ......... विधयः। (त्रयः, चत्वारः, पञ्च)

(२) कर्मस्वरूपमात्रप्रकाशकः .........। (उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः)

(३) गुणवाक्यं, फलायगुणवाक्यं च ......... विधिः। (उत्पत्ति, विनियोग, अधिकार)

(४) फलवाक्यं ......... विधिः। (उत्पत्ति, विनियोग, अधिकार)

(५) अग्निहोत्रहोमेन ......... भावयेत्। (मोक्षं, अपवर्गं, स्वर्गं)

(६) प्रधानस्य कर्मणो विधिः ......... विधिः। (अप्रधान, प्रधान, गुण)

(७) कर्मफलयोर्मध्ये पुण्यस्य पापस्य वा कस्यचित् अपूर्वस्य कल्पना क्रियते सा .........। (उत्पत्यपूर्वकल्पना, फलापूर्वकल्पना, अन्यकल्पना)

(८) कर्मानुष्ठाने कर्तुः अधिकारप्रकाशकं वाक्यं ......... विधिः। (उत्पत्ति, विनियोग, अधिकार)

(९) दर्शपूर्णामासाभ्यां ......... यजेत। (मोक्षकामः, स्वर्गकामः, धनकामः)

(१०) सर्वाङ्गसहितस्य प्रधानकर्मणः कर्तव्यताबोधको यः विधिः सः .........। (प्रयोगविधिः, उत्पत्तिविधिः, अधिकारविधिः।)

**२. एकैकवाक्येन उत्तरं लिखत।**

(१) कः विनियोगविधिः ?

(२) मीमांसाशास्त्रे कति विधयः ?

(३) किं वाक्यं अधिकारविधिसूचकम् ?

(४) 'भावयेत्' इत्यस्य कोऽर्थः ?

(५) कथंभावाकांक्षा इत्यस्य कोऽर्थः ?

(६) यजिपदाश्रवणे यागः विधीयते उत न?

(७) 'एकादशकपाल' इत्यस्य कोऽर्थः?

**३. द्वित्रवाक्यैःउत्तरं लिखत।**

(१) 'कुठारेण द्वैधीभावं कुर्यात्' इत्यस्य कोऽभिप्रायः?

(२) कः अङ्गविधिः?

(३) फलापूर्वकल्पनायां का शङ्का?

(४) उत्पत्यपूर्वकल्पनायां संशयः कः?

(५) उपांशुयागवाक्यं किम्?

**४. टिप्पणीः लिखत।**

(१) फलापूर्वकल्पना।

(२) उत्पत्यपूर्वकल्पना।

(३) प्रयोगविधिः।

**५. निबन्धात्मकम् उत्तरं लिखत।**

(१) 'दर्शपूर्णमासयोर्विशेषः' इत्यत्र कः विशेषः?

(२) 'त्रिकापूर्वाद्युत्पत्तिः' इमीमं विशदयत।

(३) प्रयोगविधिं विस्तरेण परिचाययत।

●

# ६ विधेस्त्रैविध्यम्


**प्रस्तावना**

वेदबोधितधर्माधर्मनिरूपणाय प्रवृत्ते मीमांसादर्शने वेदस्य स्वरूपानुरोधेन विधिमन्त्रनामधेयनिषेधार्थवादभेदेन पञ्चधा विभागः दृश्यते। तत्र विधिर्नाम अज्ञातार्थज्ञापको वेदभागः। स च विधिः प्रयोजनवदर्थविधायकत्वेन अर्थवान् भवति। अयं विधिः प्रमाणान्तरेण अज्ञातस्य अलौकिकश्रेयस्साधनीभूतस्य यागादेः विधायकः भवति। यागादिरेव धर्मः इति विधेः धर्मबोधकत्वे प्रामाण्यं सिद्धम्। अस्य विधेः लिङ्-लेट्-लोट्-तव्य-अनीयरित्यादिप्रत्ययैः विधानं दृश्यते। विधिश्चायम् अपूर्व-उत्पत्ति-विनियोग-गुण-विशिष्ट-प्रयोग-अधिकार-नियम-परिसंख्याभेदात् बहुविधः भवति। अस्मिन् पाठे '**विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र प्राप्तौ परिसङ्ख्येति गीयते।**' इति भट्टपादचूडामणिमहाभागैः न्यायसिद्धान्तमञ्जर्याम् तन्त्रवार्तिके उक्तदिशा अपूर्व-नियम-परिसंख्याविधीनां वर्णनं प्रस्तुतमस्ति।

---

**मूलम् - पुनरपि विधिस्त्रिविधः - अपूर्वविधिः नियमविधिः, परिसंख्याविधिश्चेति।**

व्याख्या - पूर्वं ब्राह्मणवाक्यानि विधिमन्त्रादिभेदेन पञ्चधा विभक्तानि, इदानीं विधिभागस्य त्रैविध्यम् उच्यते। तिस्त्रो विधा यस्य सः त्रिविधः। विधा नाम प्रकारविशेषः। ''**विधिरत्यन्तमप्राप्तौ**'' इति वार्तिकानुसारेण विधेः त्रैविध्यम् अस्ति - (१) अपूर्वविधिः, (२) नियमविधिः, (३) परिसंख्याविधिः चेति।




- **अपूर्वविधिः**

**मूलम् - तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति सोऽपूर्वविधिः। यथा दर्शपूर्णमासप्रकरणे ''व्रीहीन् प्रोक्षति'' इति। एतद्विध्यभावे दर्शपौर्णमासीयव्रीहीषु प्रोक्षणं कथमपि न प्राप्नोति। एतद्विधिसत्त्वे तु तत्सम्बन्धिव्रीहीषु प्रोक्षणं प्राप्नोत्येव इति अत्यन्ताऽप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः।**

**व्याख्या** - अत्यन्ताप्राप्तविषयप्रापको विधिः अपूर्वविधिः। यो विधिः प्रमाणान्तरेण अत्यन्तमप्राप्तस्य अर्थस्य प्रापको भवति सः विधिः अपूर्वविधिः इत्यर्थः। ''विधिरत्यन्तमप्राप्ते'' इति तन्त्रवार्तिकम्। अप्राप्तप्रापकत्वञ्च प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वम्, प्रमाणान्तरजन्यप्रतीत्यविषयविषयकप्रतीतिजनकत्वं वा। ततश्च यस्य यदर्थत्वं लिलक्षयिषितविधिवाक्यव्यतिरिक्तेन वाक्यान्तरेण प्रत्यक्षादिप्रमाणान्तरेण च अप्राप्तं तस्य तदर्थत्वेन यो विधिः सः अपूर्वविधिः। यथा 'यजेत स्वर्गकामः', 'अग्निहोत्रं जुहुयात् स्वर्गकामः', 'व्रीहीन् प्रोक्षति' इत्यादिविधिः अपूर्वविधिः। यथा दण्डसत्त्वे घटसत्त्वम, दण्डाभावे घटाभावः इत्येवमन्वयव्यतिरेकाभ्यां घटस्य दण्डस्य च कार्यकारणभावो लोकतः

एव सिद्धो भवति न तथा स्वर्गयागयोः कार्यकारणभावो लोकतः अवगन्तुं शक्यते। नापि 'यजेत स्वर्गकामः' इत्यादिवाक्यव्यतिरिक्तेन वाक्यान्तरेण ज्ञायते, किन्तु अनेनैव विधिना यागस्वर्गयोः कार्यकारणभावो ज्ञायते इति भवति अपूर्वविधिः अत्र।

अपूर्वविधेः उदाहरणं यथा दर्शपूर्णमासप्रकरणे पठितं 'व्रीहीन् प्रोक्षति' इति प्रोक्षणवाक्यम्। यदि अस्मिन् वाक्ये अयं विधिः न भवेत् तर्हि दर्शपूर्णमासयागीयव्रीहीणां प्रोक्षणं केनचिदपि अन्येन प्रमाणभूतेन विधिवाक्येन प्राप्तं नासीत्, किन्तु 'व्रीहीन् प्रोक्षति' इति विधिवाक्ये सति दर्शपूर्णमासयागे व्रीहीणां प्रोक्षणं प्राप्यते। अतः इदं वाक्यम् अत्यन्तम् अप्राप्तस्य प्रोक्षणस्य विधानं करोति तस्मात् अस्मिन् वाक्ये अपूर्वविधिः भवति।

- **नियमविधिः**

**मूलम् - यश्च पक्षेऽप्राप्तमर्थं नियमयति स नियमविधिः। यथा तत्रैव 'व्रीहीन् अवहन्ति' इति। एतिद्वध्यभावे दर्शपौर्णमासिकेषु व्रीहिषूत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुल-निष्पत्त्यनुकूलवैतुष्यकार्याय अवहननवत् कदाचित् नखविदलनमपि प्राप्नुयात् इति। तस्मिन् पक्षेऽवहननस्य प्राप्तेरभावात् कार्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात्। सति त्वस्मिन् विधौ अवहननेनैव वैतुष्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्तते इति नियमविधिरयम्।**

**व्याख्या** - नानासाधनसाध्यक्रियायाम् एकसाधनप्राप्तौ अप्राप्तस्यापरसाधनस्य प्रापको विधिः नियमविधिः। पक्षे प्राप्तस्य अप्राप्तस्यापरसाधनस्य प्रापको विधिः नियमविधिः। पक्षे प्राप्तस्य अप्राप्तांशपूरणफलो विधिः नियमविधिः इत्यर्थः। 'नियमः पाक्षिके सति' इति तन्त्रवार्तिकवचनात् पक्षे प्राप्तस्याप्राप्तांशपूरणफलको विधिर्नियमविधिः। अर्थात् पाक्षिकाप्राप्तप्रापकत्वं नियमविधित्वम्। नियमविधिः अनेकसाधनमध्ये अप्राप्तिपक्षं नियमयति। एकैकस्य प्राप्तौ सत्यां तादृशानेकसाधनमध्ये यदेकं किञ्चिदिष्टं तस्य साधनस्य यो विधिः स नियमविधिः। तत्र च यदिष्टं तदेव यदि कदाचित् स्वभावत एव कर्ता गृह्णाति तदा नियमविधेर्न किञ्चित् कृत्यम्। किन्तु तादृशेष्टसाधनव्यतिरिक्तं किञ्चित् साधनं ग्रहीतुं प्रवर्तते तदा अयं विधिः उपस्थितो भूत्वा इष्टं साधनं तदानीमप्राप्तं ग्राहयति। तदा अनिष्टस्य साधनस्यार्थिकी निवृत्तिर्भवति। एवञ्च अनिष्टं साधनं नियमयन्नयं नियमविधिरुच्यते। यथा 'व्रीहीन् अवहन्ति', 'समे यजेत' इत्यादिवाक्यम्।

'व्रीहीन् अवहन्ति' इत्यत्र व्रीहीषु नखविदलनमुसलावहननयोः प्राप्तौ मुसलावहननमेव नियम्यते। 'व्रीहीन् अवहन्ति' इति विध्यभावे दर्शपूर्णमासादिकेषु व्रीहीषु उत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्त्यनुकूलवैतुष्यकार्याय अवहननवत् कदाचिन्नखविदलनमपि प्राप्नुयादिति तस्मिन् पक्षे अवहननस्य प्राप्त्यभावात् कार्यान्यथोपपत्तेः अवहननस्य पाक्षिकी प्राप्तिः स्यात्। सत्यस्मिन् विधौ अवहननेनैव वैतुष्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्तत इति नियमविधिरयम्। अवघातेनैव वैतुष्यकरणनिष्पन्नैः तण्डुलैः पुरोडाशप्रणाल्या यागानुष्ठाने किञ्चित् धर्माभिधम् अपूर्वापरपर्यायम् अदृष्टं जायते नान्यथा।

नियमविधेः अपरमुदाहरणम् अस्ति - 'समे यजेत' इति। 'दर्शपूर्णमासाभ्यां यजेत' इति यागः कर्तव्यतया विहितः। स च देशमन्तरा कर्तुमशक्यः इत्यर्थादेव देशविशेषः कश्चित् प्राप्नोति एव। स च देशविशेषः समो विषमश्चेति द्विविधः। तत्र यदा यजमानः साहजिकतया समे एव देशे यष्टुम् आरभते तदा 'समे यजेत' इति वचनमुदासीनमेवावतिष्ठते। यदा तु यजमानः कदाचित् विषमे देशे यष्टुम् आरभते तदा वचनबोधितस्य समदेशस्य अग्रहणात् तद्बोधनार्थं वाक्यमिदं प्रवर्तते। ततश्च विषमदेशनिवृत्तिः आर्थिकी सिद्धा भवति। अत्र नियमविध्यभावे यजमानेन विषमदेशे यागः कृतश्चेत् स यागो यथाशास्त्रम् अनुष्ठितो न भवति। यथाशास्त्राननुष्ठितत्वात् तत्र अदृष्टं नोत्पद्यते। तस्मात् 'समे यजेत' इत्यत्र नियमविधेः सार्थकत्वम्।

**मूलम् – न च वैतुष्यस्य नखविदलनेनापि सम्भवात् अवहनननियमो व्यर्थः, प्रयोजनाभावादिति वाच्यम्। अवघातेनैव वैतुष्यकरणे किञ्चिददृष्टं जन्यते इति नियमादृष्टाङ्गीकारात्। नियमेन दृष्टकार्याऽलाभेऽपि अदृष्टस्योत्पत्तेः। तच्चापूर्वं यागोत्पत्त्यपूर्वद्वारा फलापूर्वे उपयुज्यते, तेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यते इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम्। एवं सोमक्रयादिनियमेऽपि बोध्यम्।**

**व्याख्या** – अत्रैवम् आशङ्का भवितुमर्हति यत् तण्डुलनिष्पत्त्यनुकूला वितुषीकरणक्रिया नखविदलनेनापि यदा सम्भवति, तदा 'अवघातेनैव वितुषीकरणक्रिया कर्तव्या' इति नियमकरणं व्यर्थमेव। यतो हि तस्य किमपि प्रयोजनं न दृश्यते। एतस्याः शङ्कायाः उत्तरं दीयते यत् यतो हि अवहननक्रिययैव वितुषीकरणे सति एकम् अदृष्टं निष्पद्यते, इति नियमजन्यम् अदृष्टं स्वीकृतमस्ति। अवहननस्य नियमकरणेन यद्यपि दृष्टं प्रयोजनं किमपि नास्ति, तथापि तादृशेन नियमेन एकम् अदृष्टम् उत्पद्यते। एतादृशनियमाभावे तादृशम् अदृष्टं न जायते। एतच्च नियमाऽदृष्टं यागजन्यस्य उत्पत्त्यपूर्वस्य सहायकं सत् फलाऽपूर्वोपकारकं भवति। एवञ्च नियमाऽदृष्टस्य नियमापूर्वस्य वा अभावे फलाऽपूर्वमेव नोत्पद्येत इति कल्पनया नियमापूर्वं न व्यर्थं भवति। अतो नियमकरणं सप्रयोजनमस्ति। अतः तस्य वैयर्थ्यं न शङ्कनीयम्। एवमेव सोमलताक्रयणविषयेऽपि अवगन्तव्यम्।

- **परिसंख्याविधिः**


**मूलम् – द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलको विधिः परिसंख्याविधिः। यथा चयनप्रकरणे 'इमामगृभ्णन् रशनामृतस्य' इत्यश्वाभिधानीमादत्ते, इत्यश्वरशनाग्रहणाङ्गत्वेन मन्त्रविधिः। एतिद्वध्यभावे हि रशनाग्रहणप्रकाशको मन्त्रो रशनाऽऽदानप्रकाशनसामर्थ्यरूपात् लिङ्गात् अश्वरशनाऽऽदाने इव गर्दभरशनाऽऽदानेऽपि नियमेन प्राप्नुयात्। सत्यस्मिन् विधौ अनेन मन्त्रेण अश्वरशनामेवाददीत, न तु गर्दभरशनाम्। सा तु तुष्णीमेव ग्राह्येति गर्दभरशनायां मन्त्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलकत्वादयं परिसंख्याविधिः। एवं 'पञ्च पञ्चनखा भक्ष्या' इत्यादावपि बोध्यम्।**

**व्याख्या** – द्वयोः समुच्चित्य प्राप्तौ इतरनिवृत्तिफलकः अर्थात् उभयत्र नियतप्राप्तौ एकनिवृत्तिरूप-परिसङ्ख्याफलको विधिः। एकस्मिन् अङ्गिनि उभयोरङ्गयोः, अङ्गिद्वये एकस्य वा अङ्गस्य समुच्चित्य प्राप्तौ इतरनिवर्तको विधिः '**तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते**' इति तन्त्रवार्तिकवचनात् परिसङ्ख्याविधिः। परिसंख्या – वर्जनम्, तद्बोधको विधिः परिसंख्याविधिः। तस्मात् एकस्मिन् प्रधाने नियतप्राप्तस्य अङ्गद्वयस्य एकस्मिन् अङ्गे नियतप्राप्तस्य प्रधानद्वयसम्बन्धस्य अन्यतरनिवृत्तिफलको विधिः परिसंख्याविधिः इति वक्तव्यम्। अनेन नियमपरिसंख्याविध्योः भेदोऽपि स्फुटः। नियमविधौ नियमो विधेयः, स च नियमः अप्राप्तांशपूरणात्मा, अप्राप्तांशपूरणं फलम्, इतरव्यावृत्तिस्तु न विधेया, तस्या विप्रकृष्टत्वात्। परिसंख्याविधौ तु साधनद्वयस्य नित्यप्राप्तत्वेन नियमस्य फलत्वायोगात् इतरनिवृत्तिरेव विधेया, सैव फलमिति उभयोः भेदः सिध्यति। 'इमामगृभ्णन् रशनामृतस्य इत्यश्वाभिधानीमादत्ते', 'गृहमेधीये आज्यभागौ यजति', 'अत्र ह्येवावपन्ति', 'पञ्च पञ्चनखा भक्ष्या' इत्यादीन्युदाहरणानि परिसंख्याविधेः।

यथा अग्निचयनप्रकरणे श्रूयते 'इमामगृभ्णन् रशनामृतस्य इत्यश्वाभिधानीमादत्ते' इति। अत्र अश्वरशनाग्रहणम्, गर्दभरशनाग्रहणञ्चेति द्वयमनुष्ठेयम्। एतद्विध्यभावे हि रशनाग्रहणप्रकाशको मन्त्रः रशनाऽऽदानप्रकाशनसामर्थ्यरूपात् लिङ्गात् अश्वरशनाऽऽदाने इव गर्दभरशनादानेऽपि प्राप्नुयात्। सत्यस्मिन् विधौ तु अनेन मन्त्रेण अश्वरशनामेव आददीत न तु गर्दभरशनाम्। सा तु तूष्णीमेव ग्राह्येति गर्दभरशनायां मन्त्रनिवृत्तिर्भवतीति इतरनिवृत्तिर्भवति।

इयं परिसंख्या द्विविधा भवति – श्रौती परिसंख्या लाक्षणिकी परिसंख्या चेति। यत्र वाक्ये इतरनिवृत्तिबोधकं पदं श्रूयते सा श्रौती परिसंख्या। यत्र तु इतरनिवृत्तिबोधकं पदं न श्रूयते, तत्र लाक्षणिकी परिसंख्या विज्ञेया। लाक्षणिकीपरिसंख्यायां त्रैदोष्यं सम्भवति। श्रुतहानिः, अश्रुतकल्पना, प्राप्तबाधश्चेति। लाक्षणिकीपरिसंख्यायाः उदाहरणं यथा 'पञ्च पञ्चनखा भक्ष्या' इति। श्रीमद्रामायणे श्रीरामं प्रति बालिनः उक्तिरियम्। अत्र पञ्च पञ्चनखाः प्राणिनः भक्ष्या इयमार्थी

परिसंख्या। पञ्चनखा - सेधा-गोधा-कच्छप-शल्यक-शशाख्या: प्राणिन: भक्ष्या इत्यस्य वाक्यस्य पञ्चनखभक्षणमर्थ:। स चात्र रागत: एव प्राप्तत्वात् विधातुं न शक्यते। पक्षे प्राप्त्७यभावाच्च न नियम:। अतस्तद्वाक्यं व्यर्थम्। किञ्चात्र अपञ्चनखभक्षणनिवृत्तौ वक्तु: तात्पर्यम्। तच्चात्र न तस्माद्वाक्याद् अवबुध्यते। तथा च तात्पर्यानुपपत्त्या पञ्चनखपदस्य पञ्चनखभिन्नेऽर्थे लक्षणा स्वीकार्या भवति। भक्ष्या इत्यस्य अभक्ष्या इत्यर्थे लक्षणा स्वीक्रियते। तेन अभक्ष्या पञ्चनखभिन्ना इत्यर्थे सति वक्तु: तात्पर्यार्थ: सिद्धो भवति। वाक्यवैयर्थ्यंञ्च परिहृतो भवति। ततश्च पञ्चनखातिरिक्त प्राणिन: अभक्ष्या इत्यर्थ: वाक्यस्यास्य पर्यवस्यति।




अस्मिन् लाक्षणिकपरिसंख्याविधौ त्रयो दोषा: भवन्ति। विधिघटितवाक्यस्य हि विधानं व्यापार:। स त्यज्यते इति श्रुतहानि:। वर्जनबोधनञ्च नञ्घटितवाक्यस्य व्यापार:। सोऽत्र स्वीक्रियते इति अन्यार्थस्य कल्पना इति अश्रुतकल्पना। रागत: प्राप्तस्य अपञ्चनखभक्षणस्य बाधनं क्रियते इति प्राप्तबाधश्चेति दोषत्रयम्। यदुक्तम्-

**श्रुतार्थस्य परित्यागादश्रुतार्थप्रकल्पनात्।**
**प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा॥ इति।**

तत्र श्रुतहानि: अक्षु श्रुतकल्पना इति प्रथमद्वितीयदोषौ शब्दनिष्ठौ, प्राप्तबाध इति तृतीयस्तु अर्थनिष्ठ: भवति।

## स्वाध्याय:

**१. रिक्तस्थानपूर्तिं कुरुत।**

(१) ......... प्रयोजनवदर्थविधायकत्वेन अर्थवान् भवति। (वेद:, विधि:, मन्त्र:)

(२) मीमांसादर्शने वेद: ......... विभज्यते। (द्विधा, त्रिधा, पञ्चधा)

(३) 'विधिरत्यन्तमप्राप्ते' इति वचनम् अस्ति .........। (जैमिने:, तन्त्रवार्तिकस्य, शाबरभाष्यस्य)

(४) 'दध्ना जुहोति' इति वाक्यस्य वाक्यार्थ: वर्तते .........।
(दधिमता यागेन स्वर्गं भावयेत्, दध्ना होमं भावयेत्, दध्ना होमेन च स्वर्गं भावयेत्)

(५) ......... अङ्गानां क्रमबोधको विधि:। (प्रयोगविधि:, उत्पत्तिविधि:, परिसंख्याविधि:)

(६) 'व्रीहीन् अवहन्ति' इत्यत्र ......... विधि:। (अधिकार, नियम, गुण)

(७) यागस्वर्गयो: मध्यवर्तिव्यापार: ......... उच्यते। (धर्म:, अपूर्वम्, अदृष्टम्)

(८) परिसंख्या ......... भवति। (एकविधा, द्विविधा, त्रिविधा)

(९) यागजन्यस्वर्गफलस्य भोक्तृत्वं ......... भवति। (यजमानस्य, वेदस्य, होमस्य)

(१०) धर्माधर्मविचारशास्त्रम् ......... अस्ति। (सांख्यशास्त्रम्, मीमांसाशास्त्रम्, न्यायशास्त्रम्)

२. **एकैकवाक्येन उत्तरं लिखत।**

(१) मीमांसादर्शनस्य प्रवर्तकः कः?

(२) मीमांसादर्शने कः धर्मः?

(३) 'व्रीहीन् प्रोक्षति' इत्यत्र कः विधिः?

(४) अङ्गाङ्गिभावसम्बन्धं कः विधिः बोधयति?

(५) किं नाम कर्मजन्यफलस्वाम्यत्वम्?

(६) कः ज्योतिष्टोमेन यजेत?

(७) अदृष्टस्य अपरं नाम किम्?

३. **द्वित्रवाक्यैःउत्तरं लिखत।**

(१) मीमांसाशब्दस्य व्युत्पत्तिं लिखत।

(२) 'समे यजेत' इति वाक्यस्य वाक्यार्थः कः?

(३) अग्निचयनप्रकरणे कः मन्त्रः श्रूयते? तस्य कः अर्थः?

(४) परिसंख्याविधेः दोषत्रयं प्रतिपादयत।

(५) नियमविधि-परिसंख्याविध्योः भेदं स्पष्टयत।

४. **टिप्पणीः लिखत।**

(१) 'पञ्च पञ्चनखा भक्ष्या' इत्यत्र पञ्चनखाः के सन्ति?

(२) वेदस्य पञ्चविभागान् प्रदर्शयत।

(३) विधिलक्षणं विलिखत।

५. **निबन्धात्मकम् उत्तरं लिखत।**

(१) अपूर्वविधिं सोदाहरणं प्रतिपादयत।

(२) नियमविधिं विमृशत।

(३) परिसंख्याविधिं निबध्नीत।

●

#  ७ | अङ्गत्वग्राहकप्रमाणानि

**प्रस्तावना**

अङ्गप्रधानसम्बन्धबोधको विधिः विनियोगविधिः। अङ्गत्वं नाम परोद्देशप्रवृत्तकृतिव्याप्यत्वम्। तस्य विनियोगविधेः अङ्गप्रधानसम्बन्धबोधने सहकारिभूतानि अङ्गत्वग्राहकानि प्रमाणानि धर्माङ्गताबोधकप्रमाणानि इत्युच्यन्ते। तानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि षट्। तथा च जैमिनिसूत्रम् - ''श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्'' इति। एतदन्यतमप्रमाणसहकृतेन अनेन विनयोगविधना अङ्गत्वं बोध्यते। अस्मिन् पाठे विनियोगविधेः अङ्गत्वग्राहकषट्प्रमाणानां सोदाहरणं निरूपणं क्रियते।

---

**मूलम् - पूर्वं दर्शपूर्णमासाङ्गत्वं प्रयाजादीनामुक्तम्। तत्राङ्गत्वबोधकप्रमाणानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्याभेदेन षट्।**

**व्याख्या** - पूर्वं तावत् अङ्गिनः दर्शपूर्णमासयागस्य अङ्गत्वेन प्रयाजादियागाः निरूपिताः तत्र अङ्गत्वबोधकप्रमाणानि षट् भवन्ति। तद्यथा - (१) श्रुतिः, (२) लिङ्गम्, (३) वाक्यम्, (४) प्रकरणम्, (५) स्थानम्, (६) समाख्या चेति।

- **श्रुतिप्रमाणम्**

**मूलम् - तत्र 'दघ्ना जुहुयात्' इत्यत्राग्निहोत्रवाक्यप्राप्तं होमं जुहुयात् इत्यनेनोद्दिश्य तत्करणत्वेन तृतीयाश्रुत्या दधि विधीयते इति श्रुत्या दध्नोऽङ्गत्वम्।**

**व्याख्या** - विनियोगविधिसहकारिभूतेषु षट्प्रमाणेषु प्रथमं प्रमाणमस्ति श्रुतिः। ''निरपेक्षो रवः श्रुतिः''। यः शब्दः कस्यचित् क्वचित् अङ्गत्वबोधे विनियोगे कर्तव्ये वा स्वोत्तरवर्तिलिङ्गादिप्रमाणपञ्चकमध्ये किमपि प्रमाणान्तरं नापेक्षते स शब्दः श्रुतिरित्यर्थः। द्वितीया-तृतीयादयो विभक्तयः स्वार्थबोधने अन्यत् किञ्चिदनपेक्षमाणाः कर्मत्वकरणत्वादिकं स्वार्थं झटिति अवबोधयन्ति। तत्र तृतीयया साक्षादेव अङ्गत्वमुच्यते। द्वितीयया कर्मत्वमवबोध्य तत्समभिव्याहृतस्य अङ्गत्वम् आक्षिप्यते।

यथा 'दघ्ना जुहोति' इत्यत्र 'अग्निहोत्रं जुहोति' इति अग्निहोत्रहोमविधायकेन वाक्येन प्राप्तं होमं 'जुहुयात्' इत्यनेन पदेन उद्दिश्य, तत्करणत्वेन रूपेण 'दघ्ना' इति तृतीया श्रुत्या 'दधि' विधीयते, अतः तृतीयाश्रुतिप्रमाणेन दघ्नः होमाङ्गत्वं निश्चीयते।

या श्रुतिः त्रिविधा भवति - विधात्री, अभिधात्री, विनियोक्त्री च। विधात्री - विधानकर्त्री। लिङ्लेट्लोडादिरूपा। अभिधात्री - अभिधानकर्त्री। व्रीह्यादि नामाभिधानि श्रुतिः। विनियोक्त्री - विनियोगकर्त्री। यस्य च शब्दस्य श्रवणादेव शेषशेषिणोः सम्बन्धः प्रतीयते सा विनियोक्त्री श्रुतिः। सा च विनियोक्त्री श्रुतिः त्रिविधा भवति - विभक्तिरूपा, एकाभिधानरूपा, एकपदरूपा चेति।

**अङ्गत्वग्राहकप्रमाणानि**

- श्रुतिः
  - विधात्री
  - अभिधात्री
  - विनियोक्त्री
    - विभक्तिरूपा
    - एकाभिधानरूपा
    - एकपदरूपा
- लिङ्गम्
- वाक्यम्
- प्रकरणम्
- स्थानम्
- समाख्या

- **लिङ्गप्रमाणम्-**

**मूलम् - लिङ्गं नाम सामर्थ्यम्। तच्च द्विविधम् - अर्थगतं शब्दगतं चेति। आद्यं यथा - 'स्रुवेणावद्यति' इत्यवदानसामान्यशेषत्वावगमेऽपि स्रुवस्य सामर्थ्यरूपात् लिङ्गात् आज्यसान्नाय्यादिद्रवद्रव्यस्यावदान-विशेषाङ्गत्वम्। स्रुवेण पुरोडाशाद्यवदानस्य कर्तुमशक्यत्वात्।**

**शब्दगतं तु लिङ्गमर्थप्रकाशनसामर्थ्यम्। यथा - ''अग्नये त्वा जुष्टं निर्वपामि'' इति मन्त्रस्य निर्वापप्रकाशनसामर्थ्यरूपात् लिङ्गान्निर्वापाङ्गत्वम्। यस्य मन्त्रस्य यत्प्रकाशनसामर्थ्यं तस्य तदङ्गत्वम्।**

शब्दसामर्थ्यं लिङ्गम्। समर्थस्य भावः सामर्थ्यम्। तदुक्तम् ''सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते'' इति। इदं सामर्थ्यं द्विविधम् - अर्थगतं शब्दगतं चेति। अर्थगतं सामर्थ्यं यथा ''स्रुवेण अवद्यति'' इति वाक्ये ''अवद्यति'' पदं दृष्ट्वा स्रुवस्य अवदानमात्राङ्गत्वं, यद्यपि ज्ञायते तथापि अर्थगतसामर्थ्यरूपेण लिङ्गप्रमाणेन आज्यसान्नाय्यादिद्रवद्रव्याणामवदाने एव स्रुवः अङ्गं भवति। यतः स्रुवाख्येन यज्ञीयपात्रेण पुरोडाशादिकठिनद्रव्यादानं नैव शक्यम्।

शब्दगतं तु लिङ्गम् अर्थप्रकाशनसामर्थ्यम्। शब्दः स्वनिष्ठसामर्थ्येन अर्थं बोधयति। अतः शब्दगतं लिङ्गं नाम अर्थप्रकाशनशक्तिः। शब्दगतं सामर्थ्यं यथा - ''अग्नये त्वा जुष्टं निर्वपामि'' इति मन्त्रः निर्वापरूपार्थप्रकाशने समर्थः। अतः अस्य मन्त्रस्य दर्शपूर्णमाससम्बन्धितया अवगतस्य निर्वापप्रकाशनसामर्थ्यरूपात् लिङ्गात् निर्वापाङ्गत्वम् ज्ञायते। यतो हि यस्य मन्त्रस्य यत्प्रकाशनसामर्थ्यं तस्य तदङ्गत्वम्।

- **वाक्यप्रमाणम्-**

**मूलम् - पदान्तरसमभिव्याहारो वाक्यम्। यथा - ''इषे त्वेति छिनत्ति'' इति। अत्र छेदनाङ्गत्वेन ''इषे त्वा'' इति मन्त्रो वाक्येन विधीयते। यद्वा ''अग्नये जुष्टम्'' इत्यत्रैव अग्नये जुष्टमित्यादिपदानां निर्वपामीत्यनेनैकवाक्यतापन्नत्वात् निर्वापाङ्गत्वम्।**

**व्याख्या** - पदान्तरसमभिव्याहारो वाक्यम्। समभिव्याहारश्चात्र शेषशेषिवाचकपदयोः सहोच्चारणम्। तच्च शब्दयोर्वाक्ययोर्वा उच्चारणक्रियाद्वारा सम्भवति। तेन अर्थप्रकाशनयोग्यानां पदानां अव्यवधानेन उच्चारणम् इति वाक्यप्रमाणस्य लक्षणं फलितम्। यथा ''इषे त्वा इति छिनत्ति'' अत्र छेदनक्रियायाः अङ्गत्वेन रूपेण ''इषे त्वा'' इति मन्त्रस्य विधानं वाक्यप्रमाणेन क्रियते। मूलग्रन्थे ''यद्वा'' इत्यनेन अपरमपि उदाहरणं दीयते - ''अर्थैकत्वादेकं वाक्यं साकांक्षं चेत् विभागे स्यात्'' इति एकवाक्यत्वलक्षणानुसारेण ''अग्नये त्वा जुष्टं निर्वपामि'' अत्र ''अग्नये'' ''त्वा'' ''जुष्टम्'' इत्येषां पदानां ''निर्वपामि'' इत्यनेन पदेन सह एकवाक्यतया अयं मन्त्रः निर्वापप्रक्रियायामङ्गं भवति।

- **प्रकरणप्रमाणम्-**

**मूलम् - प्रकरणं नाम परस्पराकाङ्क्षा। यथा ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इति दर्शपूर्णमासाभ्यां स्वर्गापूर्वं कुर्यात् इत्युक्ते भवत्याकाङ्क्षा कथमाभ्यां स्वर्गापूर्वं कर्तव्यमिति। तथा फलवदाग्नेयादिसन्निधौ ''समिधो यजति'', ''तनूनपातं यजति'', ''आज्यभागौ यजति'' इत्यादिभिः प्रयाजादयः फलरहिताः श्रुताः, तेषां स्ववाक्येषु फलाश्रवणात् भवति प्रयोजनाकाङ्क्षा, किमेतेषां प्रयोजनमिति। ततश्च प्रयाजादीनां प्रयोजनाकाङ्क्षायां दर्शपूर्णमासयोः कथम्भावाकाङ्क्षालक्षणेन प्रकरणेन प्रयाजादीनां सर्वेषां दर्शपूर्णमासाङ्गत्वं निश्चीयते।**

**व्याख्या** - अङ्गाङ्गिनोः उभयोः परस्परम् आकाङ्क्षा प्रकरणम्। यथा ''समिधो यजति'' इत्यादिषु प्रयाजेषु फलविशेषस्य निर्देशाभावात् फलाकाङ्क्षा साध्याकाङ्क्षा वा जायते। समिद्यागेन भावयेत् इति बोधानन्तरं किमिति साध्याकाङ्क्षा भवति। ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इति दर्शपूर्णमासप्रधानवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत् इति बोधानन्तरं उपकारकाकाङ्क्षा इतिकर्तव्यताकाङ्क्षा वा भवति - इत्युक्ते ताभ्यां दर्शपूर्णमासाभ्यां स्वर्गापूर्वं कथमुत्पादयेत्? इत्याकारिका आकाङ्क्षा उत्पद्यते। तथा स्वर्गादिफलसाधनत्वेन अवगतानां आग्नेयादिवाक्यानां समीपे

एव 'समिधो यजति' इत्यादिवाक्यैः फलरहितानि प्रयाजादीनि श्रुतानि सन्ति। प्रयाजादीनां तद्बोधकवाक्येषु फलं न श्रुतमस्ति। तस्मात् प्रयाजादीनां किं फलमिति आकाङ्क्षा उत्पद्यते। एवञ्च प्रयाजादीनां यागानां, फलाकाङ्क्षा यथा भवति, तथा दर्शपूर्णमासयोः इतिकर्तव्यताकाङ्क्षा उत्पद्यते। तेन उभयाकाङ्क्षारूपेण प्रकरणप्रमाणेन फलरहितानां सर्वेषां प्रयाजादीनां दर्शपूर्णमासाङ्गता निश्चीयते। अतः प्रयाजादयः दर्शपूर्णमासकर्मणि अङ्गमिति प्रकरणप्रमाणेन ज्ञायते।

इदं प्रकरणं द्विविधम् - महाप्रकरणम् अवान्तरणप्रकरणं चेति। तत्र मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणम्। यस्यां भावनायां फलं मुख्यं भवति तत्साधनेतिकर्तव्यताकाङ्क्षा ययोर्द्वयोस्तत्र प्रकरणबलात् एकवाक्यता अङ्गाङ्गिभावश्च ज्ञायते। ततश्च मुख्यभावानासम्बन्धि फलभावानासम्बन्धि वा प्रकरणं महाप्रकरणम्। इदं महाप्रकरणं प्रकृतियागे एव सम्भवति न तु विकृतियागेषु। विकृतौ तु अतिदेशप्राप्तैः प्राकृतैः क्लृप्तोपकारकैः अङ्गैरेव अङ्गाकाङ्क्षा शान्ता भवति, न तत्र उभयाकाङ्क्षा भवति। महाप्रकरणेन प्रयाजादीनां दर्शपूर्णमासाङ्गत्वं सिध्यति।

अङ्गभावनासम्बन्धिप्रकरणम् अवान्तरप्रकरणम्। अङ्गविधायकवाक्येषु आख्यातप्रतिपाद्या या अङ्गभावना तत्सम्बन्धि प्रकरणम् अवान्तरप्रकरणम्। यथा दर्शपूर्णमासयोः प्रयाजसमीपे श्रूयमाणम् ''अभिक्रामं जुहोति'' इति वाक्यम् अवान्तरप्रकरणप्रमाणेन प्रयाजहोमाङ्गतां प्राप्नोति। अभिक्रमणादीनां प्रयाजाङ्गत्वं सन्दंशेनैव ज्ञायते। सन्दंशो नाम लाकृतिवत् लोहशलाकाद्वयरूपः उष्णपात्रग्रहणयोग्यः साधनविशेषः। सन्दंशाभावे प्रकरणस्य एकत्वेन समानत्त्वात् प्रयाजादीनामभिक्रमणादीनां च इतिकर्तव्यतारूपेण दर्शादिप्रधानाङ्गत्वं स्यात्।

इदं प्रकरणं क्रियायां एव साक्षाद्विनियोजकम्। द्रव्यगुणयोः क्रियाद्वारा प्रकरणविनियोगः। तद्यथा ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यत्र प्रधानफलभावनायाः इतिकर्तव्यताकाङ्क्षायां सन्निधिपठितानि अश्रूयमाणफलकानि क्रियारूपाणि अङ्गानि इतिकर्तव्यात्वेन अन्वीयन्ते।

- **स्थानप्रमाणम्-**

**मूलम् - स्थानं नाम सन्निधिः। यथा सान्नाय्यपात्रसन्निधौ 'शुन्धध्वम्' इति मन्त्रस्य पाठात् सन्निधानात् सान्नाय्यपात्रप्रोक्षणाङ्गत्वम्।**

**व्याख्या** - स्थानं नाम सन्निधिः देशसामान्यं वा। स्थानं क्रमश्चेत्यनर्थान्तरम्। यथाह पार्थसारथिः - ''**स्थानं क्रमो योगबलं समाख्या**'' इति। स्थानं द्विविधम् - पाठसादेश्यम् अनुष्ठानसादेश्यं चेति। पाठसादेश्यं पुनः द्विविधम् - यथासङ्ख्यपाठः सन्निधिपाठश्चेति। यदाहुः-

**तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः।**
**पाठानुष्ठानसादेश्याद्विनियोगस्य कारणम्॥ इति**

**देशसामान्यम् (स्थानम्)**

- पाठसादेश्यम्
  - सन्निधिपाठः
  - यथाङ्ख्यपाठः
- अनुष्ठानसादेश्यम्

स्थानप्रमाणस्य उदाहरणं यथा - ''शुन्धध्वं दैव्याय कर्मणे देवयज्यायै'' इति। पौरोडाशिककाण्डे सान्नाय्यपात्रसन्निधौ अयं पात्रसंशोधनमन्त्रः पठ्यते। अयं मन्त्रः सन्निधिरूपस्थानप्रमाणेन कुम्भीशाखापवित्रादिसान्नाय्यपात्रशोधने विनियुज्यते, न तु पुरोडाशादिपात्रसंशोधने। तदिदं पाठसादेश्यम् इत्युच्यते।

सन्निधिपाठस्य उदाहरणं तु सान्नाय्यपात्रशोधनविधौ समाम्नातस्य ''शुन्धध्वम्'' इत्यादिमन्त्रस्य तदङ्गत्वम्। जलपूरिते प्रोक्षणीपात्रे उदगग्राभ्यां पवित्राभ्याम् उत्पवनं विधाय ततस्तेन जलेन शुन्धत्वमित्यादिमन्त्रेण त्रिः पात्रप्रोक्षणं शुन्धनं विधीयते। तच्च शुन्धनं शोधनीयपात्रेषु वस्तुषु वा साधारणं भासते। तत्र सान्नाय्यपात्राणि कुम्भीशाखापवित्रादीनि अनन्तरेषु ''मातरिश्वन'' इत्यादिमन्त्रेषु अवभासन्ते इति सन्निधिना तत्पात्रप्रोक्षणे शुन्धध्वमिति मन्त्रो विनियुज्यते।

- **समाख्याप्रमाणम्-**

**मूलम् - समाख्या संज्ञा। यथा अध्वर्युकाण्डप्रतिपादिते कर्मजाते आध्वर्यवसमाख्यावशात् अध्वर्योः कर्तृत्वेनाङ्गत्वम् तथा 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इत्यादिषु काम्येष्टिसमाख्यातेषु ऐन्द्राग्नादियागेषु काम्येष्टियाज्यानुवाक्याकाण्डसमाख्यावशात् 'उभा वामिन्द्राग्नी' इत्यादीनां याज्यानुवाक्यत्वेन विनियोगः। विनोयोगो नाम अङ्गत्वेनान्वयः।**

सम्यगाख्यायते अनेन इति व्युत्पत्त्या समाख्या यौगिकः शब्दः। शब्दः चतुर्विधः - यौगिकः रूढः योगरूढः यौगिकरूढश्चेति। तत्र आध्वर्ययम्, पाचकः इत्यादयः यौगिकाः शब्दाः समाख्या इति कथ्यन्ते। क्रियाकर्तृसम्बन्धार्थत्वात् समाख्यापि विनियोजिका भवति। ''**यौगिकी या समाख्या सा सम्बन्धप्रतिपादिनी। सोऽपि बुद्धावुपस्थाप्य शेषसम्बन्धबोधकः**'' इति तन्त्रवार्तिकवचनम्। समाख्या द्विविधा - वैदिकी लौकिकी च। अपौरुषेये वेदे श्रुता वैदिकी, याज्ञिकैः परिकल्पिता लौकिकी इति भेदः। ''होतृचमसः'' इत्यत्र होतुः चमसभक्षणाङ्गत्वं वैदिकसमाख्यया। भक्षणस्य क्रियात्मकत्वेन प्राधान्यात् तत्कर्तृहोतृ-भक्षणाङ्गं भवति। ''आध्वर्यवम्'' इति लौकिकसमाख्यया अध्वर्योः तत्तत्पदार्थाङ्गत्वं सिध्यति।

**समाख्या**

↓

| वैदिकी | लौकिकी |
|---|---|
| ↓ | ↓ |
| वेदेश्रुता | याज्ञिकैः परिकल्पिता |
| उदा. होतृचमसः | उदा. आध्वर्यम् |

इत्थं प्रमाणषट्कसहकृतेन विनियोगविधिना अङ्गानि प्रधाने विनियुज्यन्ते। एतानि अङ्गानि द्विविधानि - सिद्धरूपाणि क्रियारूपाणि चेति। तत्र सिद्धानि जातिद्रव्यसंख्यादीनि। जातिः पश्वादिः, द्रव्यं व्रीह्यादिरूपम्, संख्या एकत्वादिः। तेषां यागस्वरूपोपकारकत्वेन दृष्टार्थत्वमेव। क्रियारूपाणि द्विविधानि - गुणकर्माणि, प्रधानकर्माणि चेति। कर्माङ्गभूतद्रव्यादेः संस्कारकराणि क्रियाविशेषणरूपाणि गुणकर्माणि। एतानि सन्निपत्योपकारकाणि इति कथ्यन्ते। प्रधानस्य फलापूर्वस्य उपकारकाणि प्रधानकर्माणि प्रयाजादीनि। एतानि आरादुपकारकाणीति कथ्यन्ते।

## स्वाध्यायः

**१. रिक्तस्थानपूर्तिं कुरुत।**

(१) अङ्गत्वग्राहकानि ......... प्रमाणानि सन्ति। (त्रीणि, चत्वारि, षट्)

(२) ......... अङ्गप्रधानसम्बन्धबोधको विधिः उच्यते। (गुणविधिः, प्रयोगविधिः, विनियोगविधिः)

(३) पाचकः इति शब्दः ......... वर्तते। (यौगिकः, रूढः, यौगिकरूढः)

(४) यस्य शब्दस्य श्रवणादेव शेषशेषिणोः सम्बन्धः प्रतीयते, सा ......... श्रुतिः।
(एकपदरूपा, विनियोक्त्री, अभिधात्री)

(५) व्रीहिभिः इति तृतीयाश्रुत्या ......... यागाङ्गत्वम्। (यागानाम्, व्रीहीणाम्, यजमानानाम्)

(६) 'व्रीहीन् प्रोक्षति' इत्यत्र ......... प्रोक्षणस्य व्रीह्यङ्गत्त्वम्। (प्रथमाश्रुत्या, द्वितीयाश्रुत्या, तृतीयाश्रुत्या)

(७) यजेत इत्यत्र तप्रत्ययस्य ......... शाब्दीभावना बोध्यते। (आख्यातत्त्वाङ्गेन, लिङ्त्वाङ्गेन, पुरुषत्वाङ्गेन)

(८) शब्दसामर्थ्यं ......... उच्यते। (श्रुतिः, वाक्यम्, लिङ्गम्)

(९) अङ्गाङ्गिनोः उभयोः परस्परम् आकाङ्क्षा ......... उच्यते। (प्रकरणम्, स्थानम्, समाख्या)

(१०) ''शुन्धध्वं दैव्याय कर्मणे देवयज्यायै'' अयं मन्त्रः ......... उदाहरणम्।

(अनुष्ठानसादेश्यस्य, सन्निधिपाठस्य, यथासंख्यपाठस्य)

**२. एकैकवाक्येन उत्तरं लिखत।**

(१) किं नाम अङ्गत्वम्?

(२) धर्माङ्गताबोधकप्रमाणानि कानि उच्यन्ते? कानि च तानि?

(३) श्रुतिप्रमाणं प्रमाणान्तरं किमर्थं नापेक्षते?

(४) ''पशुना यजेत'' इत्यत्र पशोः कथं यागाङ्गत्वम्?

(५) प्रोक्षणस्य व्रीह्यङ्गत्वं किं साधनत्वप्रयुक्तम्?

(६) ''अग्नये त्वा जुष्टं निर्वपामि'' इत्यत्र कीदृशं सामर्थ्यम्?

(७) किं नाम वाक्यम्?

**३. द्वित्रवाक्यैःउत्तरं लिखत।**

(१) अङ्गत्वग्राहकप्रमाणविषये जैमिनिसूत्रं स्पष्टयत।

(२) लिङ्गप्रमाणं स्पष्टयत।

(३) पर्णताया जुह्वङ्गत्वं कथं सिध्यति?

(४) पाठसादेश्यं स्थानप्रमाणं च स्पष्टयत।

(५) द्विविधानि अङ्गानि प्रतिपादयत।

**४. टिप्पणीः लिखत।**

(१) विभक्तिरूपाश्रुतिः।

(२) महाप्रकरणम्।

(३) चतुर्विधः शब्दः।

**५. निबन्धात्मकम् उत्तरं लिखत।**

(१) वाक्यप्रमाणं लिखत।

(२) श्रुतिप्रमाणं सोदाहरणं प्रतिपादयत।

(३) समाख्याप्रमाणं निरूपयत।

●

# ८ श्रुत्यादिबलाबलविचारः

**प्रस्तावना**

विनियोगविधेः सहकारिभूतेषु श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या इति धर्मबोधकप्रमाणेषु एकत्र समावेशे पूर्वपूर्वस्य प्राबल्यम्, उत्तरोत्तरस्य च दौर्बल्यम्। तथा च जैमिनिसूत्रम् - ''श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्'' इति। अस्मिन् पाठे श्रुत्यादीनां प्राबल्यदौर्बल्यविचारं कृत्वा अङ्गत्वलक्षणम्, सन्निपत्योपकारकाङ्गम्, आरादुपकारकाङ्गं च निरूप्यते।

- **श्रुतिप्राबल्यम्-**

**मूलम् - श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यम्, उत्तरोत्तरस्य दौर्बल्यम्। यथा ''कदाचन स्तरीरसि इत्यैन्द्र्या गार्हपत्यमुपतिष्ठते'' इत्यग्निहोत्रप्रकरणे श्रूयते। तत्र मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यरूपात् लिङ्गात् इन्द्रोपस्थानाङ्गत्वे प्राप्ते, ऐन्द्र्या इति तृतीयाश्रुत्या गार्हपत्यमिति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधानात् लैङ्गिक-इन्द्रोपस्थानाङ्गत्वे प्राप्ते, ऐन्द्र्या इति तृतीयाश्रुत्या गार्हपत्यमिति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधानात् लैङ्गिक इन्द्रोपस्थाने विनोयोगो बाध्यते। श्रुतिर्हि स्वतो विनियोजिका। लिङ्गं तु इन्द्रप्रकाशनसामर्थ्यमालोच्य ''ऐन्द्र्येन्द्रमुपतिष्ठते'' इति श्रुतिकल्पनाद्वारा विनियोजकमिति वाच्यम्। तच्चात्र न सम्भवति।**

श्रुत्यादिप्रमाणानाम् एकत्र समावेशे पूर्वपूर्वस्य प्राबल्यम्, उत्तरोत्तरस्य च दौर्बल्यम्। अतः इयं श्रुतिः लिङ्गादि-प्रमाणेभ्यः प्रबला। श्रुतिः प्रमाणान्तरनिरपेक्षत्वेन स्वतः विनियोजिका भवति। लिङ्गादिषु प्रत्यक्षः विनियोजकः शब्दः नास्ति, किन्तु कल्प्यः। यदा लिङ्गेन विनियोजकः शब्दः कल्प्यते तत्पूर्वमेव श्रुत्या विनियोगस्य कृतत्वेन कल्पकत्वशक्तिः क्षीणा भवति। यथा अग्निहोत्रप्रकरणे ''कदाचन स्तरीरसि इत्यैन्द्र्या गार्हपत्यमुपतिष्ठते'' इति मन्त्रः श्रूयते। तत्र मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यरूपात् लिङ्गाद् इन्द्रोपस्थानाङ्गत्वे प्राप्ते ऐन्द्र्या इति तृतीयाश्रुत्या, गार्हपत्यमिति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधानात् लैङ्गिके इन्द्रोपस्थाने विनियोगो बाध्यते। तस्मात् श्रुतिः लिङ्गापेक्षया प्रबला इति।

यथोक्तं भाट्टदीपिकाकारेण - ''अत्र हि सर्वत्र उत्तरोत्तरस्य पूर्वपूर्वकल्पकत्वेन प्रामाण्यस्य तत्तन्निरूपणावसरे स्थापितत्वाद् उत्तरोत्तरस्य श्रुतिकल्पनं यावद् अवगतस्यैव पूर्वपूर्वेण शेषशेषिणोः निराकाङ्क्षत्वापादनेन बाधः'' इति।

**मूलम् - यत्र श्रुतिविनियोगो नास्ति ''अग्नये त्वा जुष्टं निर्वपामि'' इत्यादौ, तत्र मन्त्रस्य निर्वापप्रकाशनसामर्थ्यमालोच्य ''अनेन मन्त्रेण निर्वापं कुर्यात्'' इति श्रुतिकल्पनाद्वारा लिङ्गं विनियोजकं भवत्येव। श्रुतिकल्पनाप्रतिबन्धकाभावात्।**

**व्याख्या** - यत्र ''अग्नये त्वा जुष्टं निर्वपामि'' इत्यादौ साक्षात् श्रुतिविनियोगो नास्ति, तत्र मन्त्रस्य निर्वापप्रकाशनसामर्थ्यम् आलोच्य ''अनेन मन्त्रेण निर्वापं कुर्यात्'' इति श्रुतिकल्पनाद्वारा श्रुतिकल्पनाप्रतिबन्धकाभावात् लिङ्गं विनियोजकं भवत्येव।

● **लिङ्गादिप्राबल्यम् -**

**मूलम् - तथा ''स्योनं ते सदनं कृणोमि'' ''तस्मिन् सीद'' इत्यत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभानात् वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति, लिङ्गेन भिन्नमन्त्रत्वं भाति। आद्यस्य सदनप्रकाशनसामर्थ्यात्, ''तस्मिन् सीद'' इत्यस्य सादनप्रकाशकत्वात्। तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्यात् वाक्यं बाधित्वा लिङ्गेन ''स्योनं ते'' इत्यस्य सदनाङ्गत्वम्, ''तस्मिन् सीद'' इत्यस्य सादनाङ्गत्वमिति निर्णयः।**

**''स्योनं ते'' इत्यस्य ''तस्मिन् सीद'' इत्यनेनैकवाक्यत्वबलात् यथाकथञ्चित् सादनसामर्थ्यरूपं लिङ्गं कल्पयित्वा ''अनेन विशिष्टमन्त्रेण सादनं कुर्यात्'' इति श्रुतिः कल्पनीया। सदनप्रकाशनरूप्रत्यक्षलिङ्गेन कल्पितया ''स्योनं ते'' इत्यनेन ''सदनं कुर्याद्'' इति श्रुत्या ''स्योनं ते'' इत्यस्य शीघ्रं सदने विनियोगे सति तेनैव मन्त्रस्य नैराकाङ्क्ष्यात् वाक्यप्रमाणात् लिङ्गं कल्पयित्वा श्रुतिकल्पना प्रतिबध्यते विलम्बितत्त्वादिति लिङ्गेन वाक्यस्य बाधः।**

**व्याख्या** - इदं लिङ्गं वाक्यादिभ्यो बलवत्। अत एव **''स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं परिकल्पयामि, तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान''** इति। अत्र ''स्योनं ते सदनं कृणोमि'' इति मन्त्रांशः पुरोडाशसदनसम्बन्धः। ''तस्मिन् सीदाऽमृते प्रतितिष्ठ'' इति मन्त्रांशः पुरोडाशस्थापनसम्बद्धः। अत्र ''तस्मिन् सीदामृते'' इत्यत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभावाद् वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति, परं लिङ्गप्रमाणेन तु भिन्नमन्त्रत्वं भाति। यतो हि आद्यस्य सदनप्रकाशनसामर्थ्यात् ''तस्मिन् सीद'' इत्यस्य सादनप्रकाशकत्वात्। तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्याद् वाक्यं बाधित्वा लिङ्गेन ''स्योनन्ते'' इत्यस्य सदनाङ्गत्वं ''तस्मिन् सीद'' इत्यस्य सादनाङ्गत्वमिति निर्णयः।

**मूलम् - एवं वाक्येन प्रकरणस्य, प्रकरणात् क्रमस्य, क्रमात् समाख्याया बाधो वेदितव्यः। तथा श्रुत्या वाक्यादेरपि बाधः। तदेवमङ्गताबोधकप्रमाणानि श्रुत्यादीनि निरूपितानि।**

**व्याख्या** - एवमेव वाक्यप्रमाणं प्रकरणाद्यग्रिमप्रमाणापेक्षया प्रबलम्। यथा ''इन्द्राग्नी इदं हविः'' इति एकवाक्यत्वात् दर्शाङ्गत्वम्, न तु प्रकरणप्रमाणात् दर्शपूर्णमासाङ्गत्वम्। प्रकरणापेक्षया वाक्यस्य प्रबलत्वात्। प्रकरणप्रमाणं स्थानसमाख्ययोः अपेक्षया प्रबलम्। अत एव अक्षैर्दीव्यति, राजन्यं जिनातीति विदेवनादीनि अङ्गानि राजसूये अभिषेचनीयसंज्ञकसोमयागसन्निधौ पठितान्यपि स्थानात् न अभिषेचनीयसोमयागस्य अङ्गानि। किन्तु प्रकरणात् समग्रराजसूययागस्य अङ्गानि इति प्रकरणस्य स्थानापेक्षया प्राबल्यम्।

● **अङ्गत्वलक्षणम्-**

**मूलम् - तच्चाङ्गत्वं शेषत्वं - पारार्थ्यमिति यावत्। परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं पारार्थ्यम्। प्रयाजादीनां दर्शपूर्णमासोद्देशेन प्रवृत्तकृतिविषयत्वाभावात् नातिव्याप्तिः। केवलप्रयाजादीनुद्दिश्य कस्यचिदपि पुरुषस्याप्रवृत्तेः।**

अङ्गत्वं नाम शेषत्वम्, पारार्थ्यमिति यावत्। परस्मै इदं परार्थम्, तस्य भावः पारार्थ्यम्। परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं पारार्थ्यम्। अर्थात् प्रधानयागम् उद्दिश्य यः यागः आनुषङ्गिकरूपेण क्रियते सः पारार्थः। यथा दर्शपूर्णमासयागम् उद्दिश्य प्रयाजादिकं विधीयते तत् अङ्गम् इत्युच्यते। प्रयाजादिषु अङ्गत्वलक्षणस्य सङ्गतिः भवति।

दर्शपूर्णमासयागः प्रधानकर्मत्वात् मुख्यः, प्रयाजादियागः मुख्यकर्मसहायकत्वात् गौणः, उभयोः मुख्यगौणसम्बन्धः। दर्शपूर्णमासयागं निमित्तीकृत्य प्रयाजादिकर्म अनुष्ठीयते। तस्मादत्र लक्षणसमन्वयः। दर्शादियागेषु अङ्गत्वलक्षणस्य न समन्वयो भवति।

**मूलम् - तान्यङ्गानि द्विविधानि - सन्निपत्योपकारकाणि, आरादुपकारकाणि चेति।**

इदम् अङ्गत्वं द्विविधम् - सन्निपत्योपकारकाङ्गम्, आरादुपकारकाङ्गं चेति। सन्निपत्यं यदुपकारकं तत् सन्निपत्योपकारकम्। यानि अङ्गानि जीवात्मनि अपूर्वम् उत्पाद्य स्थापयन्ति तानि आरादुपकारकाणि अङ्गानि इत्युच्यन्ते।

**अङ्गानि**

↓

सन्निपत्योपकारकाणि | आरादुपकारकाणि

- **सन्निपत्योपकारकाङ्गम्-**

**मूलम् - यान्यङ्गानि साक्षात्परम्परया वा प्रधानयागशरीरं निष्पाद्य तद्वारा तदुत्पत्त्यपूर्वोपयोगीनि तानि सन्निपत्योपकारकाणि। यथा व्रीह्यादिद्रव्याणि, तत्संयुक्तावहननप्रोक्षणादीनि, अग्न्यादिदेवतातत्संयुक्त-याज्यानुवाक्यावचनादीनि च। अत्र प्रोक्षणादेः व्रीहिगतातिशयद्वारा, अवहननादेः तुषविमोकादिरूपदृष्टद्वारा, व्रीह्यादीनां पिष्टद्वारा पुरोडाशनिष्पादकत्वं, तद्वारा यागशरीरतदुत्पत्त्यपूर्वोपयोगित्वं च। याज्यानुवाक्यादेः देवतासंस्कारद्वारा देवतायाश्च साक्षाद्यागशरीरनिर्वर्तकत्वं, तद्वारा यागशरीरतदुत्पत्त्यपूर्वोपयोगित्वं च। यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात्। द्रव्यदेवते हि यागस्वरूपम्। इति सिद्धान्ताच्च। एतान्येव सामवायिकानि इत्युच्यन्ते।**

**व्याख्या** - कर्माङ्गद्रव्योद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्। यानि अङ्गानि साक्षात् परम्परया वा विहितफलसाधनप्रधानयागशरीरं निष्पाद्य तद्वारा तदुत्पत्त्यपूर्वोपयोगीनि भवन्ति तानि सन्निपत्योपकारकाणि इत्यर्थः। तच्च अवघातप्रोक्षणपेषणादिकम्। यथा व्रीह्यादिद्रव्याणि तत्संयुक्तावहननप्रोक्षणादीनि, अग्न्यादिदेवतातत्संयुक्त-याज्यानुवाक्यादिवचनानि चेति सन्निपत्योपकारकाङ्गानि उच्यन्ते। अत्र प्रोक्षणादेः व्रीहिगतातिशयद्वारा, अवहननादेः तुषविमोकादिरूपदृष्टद्वारा, व्रीह्यादीनां पिष्टद्वारा पुरोडाशनिष्पादकत्वं सम्पाद्य प्रधानयागशरीरं निष्पादयन्ति। तेन उत्पत्त्यपूर्वम् उत्पद्यते, येन स्वर्गप्राप्तिर्भवति।

एवमेव याज्यानुवाक्यादिमन्त्रादेः देवतासंस्कारद्वारा, देवतायाश्च साक्षाद्यागशरीरनिर्वर्तकत्वम्, तद्वारा तत्तदपूर्वोत्पत्तिः भवति, तदपूर्वं स्वर्गरूपफलप्राप्त्यर्थम् उपयोगि भवति। इदं सन्निपत्योपकारकाङ्गं सामवायिकम् उच्यते।

सन्निपत्योपकारकाङ्गं त्रिविधं भवति - दृष्टार्थम्, अदृष्टार्थम्, दृष्टादृष्टार्थञ्चेति। दृष्टार्थम् यथा अवघातादि। अत्र तण्डुलनिष्पत्तिरूपम् दृष्टं प्रयोजनम्। अदृष्टं यथा प्रोक्षणादि। व्रीहीणां प्रोक्षणमन्तरा व्रीहिभिः सम्पादितस्य यागस्य अपूर्वजनकत्वं नाङ्गीक्रियते। दृष्टादृष्टार्थं पशुपुरोडाशयागादि। तत्र द्रव्यत्यागांशेन अदृष्टम्, देवतास्मरणं च दृष्टं भवति। इमानि सन्निपपत्त्योपकारकाणि अङ्गानि एव ''सामवायिक'' शब्देन उच्यन्ते। द्रव्यादिषु सन्निपत्त्य = सम्बध्य यानि अङ्गानि उपकुर्वन्ति तानि सन्निपत्त्योपकारकाणि।

**सन्निपत्योपकारकाङ्गम्**

↓

| दृष्टार्थम् | अदृष्टार्थम् | दृष्टादृष्टार्थम् |
|---|---|---|
| (अवघातादि) | (तण्डुलनिष्पत्तिरूपम्) | (पशुपुरोडाशयागादि) |

- **आरादुपकारकाङ्गम्-**

**मूलम् - आत्मसमवेतापूर्वजनकानि आरादुपकारकाणि। यथा प्रयाजाज्यभागानुयाजादीनि। एतानि द्रव्यगतं देवतागतं वा संस्कारं न जनयन्ति, किन्तु आत्मगतम् अदृष्टं जनयन्ति इति आरादुपकारकाणि उच्यन्ते।**

**व्याख्या** - यागाङ्गद्रव्याद्यनुद्दिश्य केवलम् अपूर्वार्थं विधीयमानं कर्म आरादुपकारकम् इत्यर्थः। आरादुपकारकम् आत्मसमवेतपरमापूर्वोत्पत्तौ एव उपयुज्यते। सन्निपत्योपकारकाङ्गानि तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽपि उपयुज्यन्ते। ''आरात्'' शब्दस्य दूरमित्यर्थः। अर्थात् आरादुपकारकाणाम् अङ्गानां परमापूर्वोत्पत्तौ एव उपयोगः। सन्निपत्योपकारकाङ्गानां तु उभयत्र उपयोगः इति फलति। अस्य आश्रयिकर्म इति व्यवहारः। द्रव्यदेवतादिरूपाश्रयोऽस्यास्तीति आश्रयि। सामान्यतः कर्म द्विविधम् - अर्थकर्म गुणकर्म चेति। प्रधानकर्म एव अर्थकर्म इति निगद्यते। प्रधानकर्माणि अदृष्टजनकानि भवन्ति, अतः एतान्यारादुपकारकाङ्गानि उच्यन्ते।

**स्वाध्यायः**

**१. रिक्तस्थानपूर्तिं कुरुत।**

(१) वाक्यप्रमाणं ......... प्रमाणात् प्रबलम् अस्ति। (श्रुतिः, लिङ्गम्, स्थानम्)

(२) ''कदाचनस्तरीरसि'' इति मन्त्रः ......... श्रूयते। (पशुयागप्रकरणे, दर्शपूर्णमासप्रकरणे, अग्निहोत्रप्रकरणे)

(३) दर्शपूर्णमासयागे प्रयाजादिकं ......... भवति। (अङ्गम्, अङ्गि, उभयम्)

(४) लिङ्गप्रमाणं ......... दुर्बलं भवति। (वाक्यात्, प्रकरणात्, श्रुतेः)

(५) परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं ......... उच्यते? (व्याप्यत्वम्, व्यापकत्वम्, अङ्गत्वम्)

(६) निरपेक्षो रवः इति ......... उच्यते। (श्रुतिः, लिङ्गम्, वाक्यम्)

(७) अङ्गत्वग्राहकश्रुत्यादिप्रमाणेषु प्रबलं प्रमाणं ......... अस्ति। (श्रुतिः, लिङ्गम्, वाक्यम्)

(८) मीमांसामते स्वर्गप्राप्तिः ......... भवति। (यागक्रियया, द्रव्यत्यागेन, अदृष्टेन)

(९) सन्निपत्योपकारकाङ्गं ......... भवति। (एकविधम्, द्विविधम्, त्रिविधम्)

(१०) आत्मसमवेतापूर्वजनकानि ......... उच्यन्ते। (सन्निपत्योपकारकाणि, आरादुपकारकाणि, अर्थकर्माणि)

**२. एकैकवाक्येन उत्तरं लिखत।**

(१) श्रुत्यादीनां पूर्वपूर्वप्रबलप्रमाणविषये जैमिनिसूत्रं किम् अस्ति?

(२) किं नाम अङ्गत्वम्?

(३) अङ्गत्वं कतिविधं भवति?

(४) किं नाम सन्निपत्योपकारकाङ्गत्वम् ?

(५) दृष्टादृष्टार्थं सन्निपत्योपकारकाङ्गत्वं किम् अस्ति ?

(६) सन्निपत्योपकारकाङ्गानि कथं यागस्वरूपे उपयुज्यन्ते ?

(७) किं नाम प्रधानं कर्म ?

**३. द्वित्रवाक्यैःउत्तरं लिखत।**

(१) किं नाम पारार्थ्यम् ?

(२) लिङ्गं श्रुतिप्रमाणापेक्षया दुर्बलं किमर्थम् ?

(३) वाक्यादिभ्यो लिङ्गप्रमाणं किमर्थं बलवत् ?

(४) दर्शपूर्णमासयागप्रयाजादियागयोः कथं व्याप्यव्यापकभावसम्बन्धः ?

(५) आत्मगतम् अदृष्टं के जनयन्ति ?

**४. टिप्पणीः लिखत।**

(१) आरादुपकारकाङ्गम्।

(२) सन्निपत्योपकारकाङ्गम्।

(३) दर्शपूर्णमासयागः।

**५. निबन्धात्मकम् उत्तरं लिखत।**

(१) श्रुत्यादिप्रमाणानां प्राबल्यदौर्बल्यविचारं निबघ्नीत।

(२) सन्निपत्योपकारकाङ्गत्वं निरूपयत।

(३) अङ्गत्वलक्षणं विमृश्य तद्भेदान् प्रतिपादयत।

●


# ९ | कर्मभेदविचारः १

**प्रस्तावना**

मीमांसादर्शने यागादिरेव धर्मः इति स्वीक्रियते। यागादिजन्यं स्वर्गादिजनकं फलैकनाश्यं कञ्चन गुणविशेषम् अपूर्वमिति मीमांसासिद्धान्तः। इदम् अपूर्वं यागहोमादिधात्वर्थानुष्ठानजन्यम्। एकस्मिन् प्रकरणे पठितानामपि यजेत, जुहोति, ददाति इत्यादीनां विभिन्नाख्यातानां कर्मभेदात् भावनाभेदबोधकत्वम्। अस्मिन् पाठे मीमांसामतानुसारं प्रतिपत्तिकर्मस्वरूपम्, प्रतिपत्तिभेदाः, यागहोमशब्दविचारः, उपयोक्ष्यमाणसंस्कारभेदाः इत्यादिविषयाः प्रस्तूयन्ते।

**मूलम् - तत्र सामान्यतः कर्म द्विविधम् - अर्थकर्म, गुणकर्म चेति। तत्र आत्मगतापूर्वजनकं कर्म अर्थकर्म। यथा - अग्निहोत्रदर्शपूर्णमासप्रयाजादिकम्। गुणकर्म संस्कार-जनकम्। तच्च द्विविधम् - उपयुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकं चेति।**

**व्याख्या** - ब्राह्मणवाक्यप्रतिपादितं कर्म सामान्यतः द्विविधम् - अर्थकर्म गुणकर्म चेति। प्रधानकर्म एव अर्थकर्म इति निगद्यते। यत्कर्म आत्मगतम् अपूर्वम् उत्पादयति तत् अर्थकर्म उच्यते। यथा अग्निहोत्रदर्शपूर्णमासप्रयाजादिकम्। प्रधानयागेषु प्रयाजादियागाः आत्मगतम् अपूर्वं जनयन्ति। संस्कारजनकं गुणकर्म। यथा व्रीहीणां प्रोक्षणम्। गुणकर्म द्विविधम् - उपयुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकं चेति। उपयुक्तसंस्कारः इत्यत्र उपयुक्तस्य संस्कारो यस्मादिति यौगिकव्युत्पत्त्या व्यधिकरणबहुव्रीहिः।




- **प्रतिपत्तिकर्मस्वरूपम्**

**मूलम् - तत्र उपयुक्तसंस्कारकं प्रतिपत्तिकर्म। उपयुक्तस्य आकीर्णकरस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्तिरिति लक्षणात्। यथा इडाभक्षणकृष्णविषाणप्रासनचतुरवत्तहोमादिकम्।**

**व्याख्या** - आकीर्णकरस्य द्रव्यस्य विहितप्रदेशे वेदोक्तविधानेन प्रक्षेपणं प्रतिपत्तिकर्म। आकीर्णकरं नाम ''**कृतामपि तु द्रव्यम् आकीर्णकरमुच्यते**'' इति शास्त्रदीपिकाकारः। यथा च श्राद्धादिकर्मणि प्रदत्तस्य हविर्द्रव्यस्य कुशमयब्राह्मणपक्षे जलादौ निक्षेप एव प्रतिपत्तिः। आहोस्वित् खण्डितपूजितप्रतिमादीनां जलादौ प्रक्षेपः अपि प्रतिपत्तिः इत्यभिधीयते। प्रतिपत्तिकर्मणः मीमांसोक्तम् उदाहरणं यथा - इडाभक्षणम्, कृष्णविषाणाप्रासनम्, चतुरवत्तहोमादि च। ''**पञ्चमाः इडां भक्षयन्ति**'' इति वाक्येन प्रधानयागे यदा पुरोडाशस्य उपयोगानन्तरम् आकीर्णकरं पुरोडाशद्रव्यम् इडा इत्युच्यते। तस्य पुरोडाशद्रव्यस्य वेदोक्तविधानेन चतुर्भिः अध्वर्युभिः सह यजमानेन भक्षणं प्रतिपत्तिकर्म उच्यते। प्रतिपत्तिकर्मणः अन्यानि उदाहरणानि यथा दर्शपूर्णमासकर्मणि इडाभक्षण्, ज्योतिष्टोमयागे कृष्णविषाणाप्रासनम्, दर्शपूर्णमासयागकर्मण्येव चतुरवत्तहोमादिकम्। हुतशेषं हविर्द्रव्यं भक्षणार्थं यस्मिन् पात्रविशेषे स्थाप्यते तत् ''इडा'' शब्देनोच्यते। किन्त्वत्र ''इडा'' शब्देन पात्रगतं पुरोडाशखण्डरूपं द्रव्यं विवक्षितमस्ति। ''कृष्णविषाणया कण्डूयते'' इति वाक्येन यजमानस्य कण्डूयनाङ्गत्वेन विहितस्य कृष्णमृगशृङ्गस्य नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति इति वाक्यविहितः प्रक्षेपः ''कृष्णविषाणाप्रासन'' शब्देनोच्यते।

**मूलम् - नन्विडाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकरपुरोडाशद्रव्यप्रक्षेपात्मकत्वात् प्रतिपत्तित्वं युक्तम्। होमस्य तु यागोपयुक्तद्रव्यसंस्कारकत्वाभावात् कथं प्रतिपत्तित्वम्? होमस्य यागसमानकालीनत्वेन होमसंस्कार्यस्य चतुरवत्तादेः उपयुक्तत्वाभावादिति चेत्।**

**अत्राहुः - उपयुक्तसंस्कारमात्रं प्रतिपत्तिः, न तु प्रधानयागोपयुक्तत्वम्। तथा सति पशोर्विशसनानन्तरं वपाहृदयाद्युद्धरणकालकर्त्तव्यस्य लोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसङ्गात्, यागोपयुक्तद्रव्य-प्रक्षेपरूपत्वाभावात्।**

**तथा कृष्णविषाणाप्रासनस्यापि प्रतिपत्तित्वं न स्यात्, ''यागाङ्गभूतकण्डूयनोपयुक्तत्वेऽपि योगोपयुक्तत्वाभावात्। अतो यत्र क्वचनोपयोगमात्रं विवक्षितम्। यत्र क्वचिदुपयोगस्त्वत्राप्यस्ति। वपाहृदयाद्युद्धरणेनोपयुक्तस्य पशोः सम्बन्धिनः शकृल्लोहितस्य आकीर्णकरस्य प्रतिपत्त्यपेक्षत्वात्। एवं यथाकथञ्चित् उपयोगो होमस्थलेऽप्यस्ति।''**

**व्याख्या** - इडाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकरपुरोडाशद्रव्यप्रक्षेपात्मकत्वात् प्रतिपत्तित्वं युक्तं परं चतुरवत्तहोमस्य योगोपयुक्तद्रव्यसंस्कारकत्वाभावात् कथं प्रतिपत्तित्वम्? चतुरवत्तहोमस्य यागसमकालीनत्वेन होमसंस्कार्यस्य चतुरवत्तादेः उपयुक्तत्वाभावात् इति चेत् - उपयुक्तसंस्कारमात्रं प्रतिपत्तिः, न तु प्रधानयागोपयुक्तत्वम्। तथा सति पशोः विशसनानन्तरं वपाहृदयादीनां यज्ञनिमित्तम् उपयोगानन्तरम् अवशिष्टस्य लोहितशकृन्निरसनस्य यागोपयुक्तद्रव्यप्रक्षेपरूपत्वाभावात् प्रतिपत्तित्वाभावप्रसङ्गात्।

अपि च ज्योतिष्टोमयागे इत्थं श्रूयते यत् ''कृष्णविषाणया कण्डूयति नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्राप्स्यति'' इति। अर्थात् यजमानप्रदतां दक्षिणां गृहीत्वा सर्वेष्वपि ऋत्विग्जनेषु निजकरधारितं, कण्डूयनोपयोगि तत् खलु कृष्णमृगशृङ्गं द्रव्यं चात्वाले, चात्वालाभिधानके गर्ते प्रक्षिप्यताम्। तस्मात् यागाङ्गभूतकण्डूयनोपयुक्तत्वेऽपि यागोपयुक्तत्वाभावात् कृष्णविषाणाप्रासनस्यापि प्रतिपत्तित्वं न स्यात्। तस्मात् क्वचनोपयोगमात्रम्, अत्र प्रतिपत्तिलक्षणं विविक्षितम्। एतेन यागोपयोगित्वाभावेऽपि यागाङ्गभूतकण्डूयनोपयोगित्वं दर्शितम्।

- **प्रतिपत्तिभेदाः**

**मूलम् - तथा हि प्रतिपत्तिस्त्रिधा - प्रधानोत्तरकाला, प्रधानसमकाला, प्रधानपूर्वकाला चेति। तत्र आद्या - इडाभक्षणादिका, द्वितीया होमादिका। तथा हि दर्शपूर्णमासप्रकरणे श्रूयते - ''सकृदुपस्तृणाति'', ''द्विर्हविषोऽवद्यति'', ''सकृदभिघारयति'', ''चतुरवत्तञ्जुहोति''। तत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्यं तत्साधनत्वेन न विधीयते, होमस्याप्राप्तत्वेनानुवादासम्भवात्।**

**व्याख्या** - इयं प्रतिपत्तिः त्रिधा - प्रधानोत्तरकालिका प्रतिपत्तिः, प्रधानसमकालिका प्रतिपत्तिः, प्रधानपूर्वकालिका प्रतिपत्तिः चेति। यत् प्रतिपत्तिकर्म प्रधानयागानुष्ठानान्तरं क्रियते तत् प्रधानोत्तरकालीनं प्रतिपत्तिकर्म। यथा इडाभक्षणादिकम्। चतुरवत्तहोमादिकं प्रधानसमकालिकं प्रतिपत्तिकर्म। ''शकृत्सम्प्रविध्यति'', ''लोहितं निरस्यति'' इति शकृत्सम्प्रवेधनं लोहितनिरसनं चेति उदाहरणं प्रधानपूर्वकालिकं प्रतिपत्तिकर्म।

सकृदुपस्तरणम्, द्विरवदानम्, सकृदभिधारणम्, इति समुदितमेतच्चतुष्टयं चतुरवत्तमुच्यते। चतुरवत्तशब्दार्थं स्पष्टं कर्तुं ग्रन्थकारः कानिचन वाक्यानि प्रदर्शयति। यथा दर्शपूर्णमासप्रकरणे ''सकृदुपस्तृणाति'', ''द्विर्हविषोऽवद्यति'', ''सकृदभिघारयति'', ''चतुरवत्तञ्जुहोति'' चेति चत्वारि वाक्यानि पठितानि सन्ति। तत्र होमपात्रस्य घृतेन लेपनम् ''उपस्तरणम्'' इत्युच्यते। हविर्द्रव्यात् द्विवारं विभज्य ग्रहणम् ''हविषो द्विरवदानम्'' इत्युच्यते। हविर्द्रव्ये

घृतेन सेचनम् ''अभिधार'' इत्युच्यते। ''चतुरवत्तं जुहोति'' इति वाक्ये ''चतुरवत्त'' शब्देन ''संस्कृतः पुरोडाशः'' एवोच्यते। स च संस्कारः उपस्तरणेन, अभिधारणेन द्विवारं, विभागेन च क्रियते। चतुरवत्तवाक्ये ''जुहोति'' पदेन होममनूद्य तत्साधनत्वेन चतुरवत्तद्रव्यं विधातुं न शक्यते। यतो हि पूर्वं होमः अप्राप्तः, तेन तस्य अनुवादो न शक्यः।

अत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्यस्य तत्साधनत्वेन विधानं कर्तुं न शक्यते। अस्मिन् वाक्ये होमस्य अप्राप्तत्वेन अनुवादासम्भवात्। एतस्याः शङ्कायाः समाधानार्थम् अत्र यागहोमशब्दार्थविचारः प्रस्तूयते।

- **यागहोमशब्दविचारः**

**मूलम् - न च यदाग्नेयवाक्याद्धोमप्राप्तिः, तद्वाक्यस्य यागविधायकत्वात्। न च यागहोमयोरभेद इति वाच्यम्, देवतोद्देशेन द्रव्यत्यागस्य यागशब्दार्थत्वात्। प्रक्षेपविशिष्टस्य यागस्य होमशब्दार्थत्वात्। तत्राग्नेयचोदनया यागस्य प्राप्तत्वेऽपि प्रक्षेपांशस्य शक्त्याऽप्राप्तत्वेनानुवादासम्भवात्। किन्तूपस्तरणद्विरवदानाभिधारणवाक्यैः प्राप्तं चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो जुहोतीत्यनेन विधीयते। स च संस्कारः प्रतिपत्तिरूप एव। ''अग्नये जुष्टमभिघारयामि'' इत्यादिनिर्देशैर्यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथञ्चित् उपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षतया तदवयवद्विवदानकर्मकप्रक्षेपस्य प्रतिपत्तिकर्मत्वौचित्यात्।**

**व्याख्या** - अत्र कश्चन एवं वदेत् यत् ''यदग्नये जुष्टमभिघारयामि'' इति वाक्येन होमस्य प्राप्तिः, तदेव चतुरवत्तवाक्येन अनूद्यते इति चेत् न। ''यदग्नये'' इति वाक्ये यागः विधीयते, न तु होमः। न च पूर्वपक्षिणा यागहोमयोः अभेदः वाच्यम्। तत्र ''देवतोद्देश्येन द्रव्यत्यागो यागः।'' स च ''इन्द्राय इदं न मम'' इति स्वस्वत्वनिवृत्तिपूर्वकदेवतासम्बधापादनबोधकशब्दोच्चारणपूर्वको मानसिकव्यापारः। एवञ्च यागे भागद्वयं द्रव्यमिति एकोंऽशः, देवता इति अपरोंऽशः। स च यागः ''यजति'' इति चोदनाचोदितः। होमस्तु स्वस्वत्वनिवृत्तिपूर्वकदेवतासम्बन्धापादनबोधकस्वाहाशब्दोच्चारणपूर्वकः। स च ''जुहोति'' इति चोदनाचोदितः।

यद्यपि ''आग्नेयोऽष्टाकपालः'' इति आग्नेयविधिवाक्यात् यागस्य एव प्राप्तिर्भवति न तु होमस्य तथापि उपस्तरणद्विरवदानाभिघारणवाक्यैः प्राप्तं चतुरवत्तम् उद्दिश्य तत्संस्कारत्वेन प्रक्षेपो ''जुहोति'' इत्यनेन विधीयते। स च संस्कारः प्रतिपत्तिरूप एव।

''अग्नये जुष्टमभिधारयामि'' इत्यादिनिर्देशैः यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथञ्चित् उपयुक्तस्य पुरोडाशस्य प्रतिपत्यपेक्षया तदवयवद्विवदानकर्मकप्रक्षेपस्य प्रतिपत्तिकर्मत्वम् एव उचितम्।

**मूलम् - स च संस्कारः प्रधानसमकालः। होमो हि ''वषट्कृते जुहोति'' इति विधानात् वषट्कारोत्तरक्षणे अध्वर्युणा कर्त्तव्यः। यागोऽपि तस्मिन्नेव क्षणे, यागस्य स्मरणार्थेन वषट्कारेण स्मारितः सन् यजमानेनानुष्ठेय इति तयोर्यौगपद्यसम्भवात्। तदिदं सर्वप्रदानाधिकरणवार्त्तिके स्थितम्।**

**व्याख्या** - स च प्रक्षेपात्मकसंस्कारः प्रधानसमकालः। प्रधानयागादिकर्मकाले एव तस्य विधानात्। यतो हि ''वषट्कृते जुहोति'' इत्यनेन वाक्येन होमः विधीयते। स च होमः वषट्कारोच्चारणसमनन्तरमेव अध्वर्युणा कर्तव्योऽस्ति, तदानीमेव च यागस्य स्मरणार्थं विहितेन वषट्कारेण स्मारितो यागोऽपि वषट्कारोत्तरक्षणे एव अनुष्ठेयः भवति। यागस्य स्मरणार्थेन वषट्कारेण स्मारितः सन् यजमानेन अनुष्ठेयो भवति, इति तयोः यौगपद्यसम्भवात्। इत्थं होमयागयोश्च एकस्मिन्नेव काले अनुष्ठानं सम्भवति। सर्वोऽप्ययं विषयः सर्वप्रदानाधिकरणवार्तिके विस्तरेण वर्णितमस्ति। होमो नाम प्रक्षेपः। वषट्कारो नाम होतृसंज्ञेकेन ऋत्विजा क्रियमाणः वौषट्-शब्दोच्चारः। अध्वर्युसंज्ञकः ऋत्विक् प्रक्षेपं करोति, अतः प्रक्षेपकर्ता अध्वर्युः। यजमानश्च त्यागं करोति, अतः त्यागकर्ता यजमानः। तस्मात् प्रक्षेपत्यागयोर्भिन्नकर्तृकत्वात् समसामयिकमनुष्ठानं सम्भवति। यागहोमयोरनुष्ठानस्य तुल्यकालिकत्वात् सः प्रतिपत्त्याख्यः संस्कारः प्रधानसमकालोऽस्ति।

**मूलम् - प्रधानपूर्वकाला प्रतिपत्तिः यथा - ''शकृत्सम्प्रविध्यति'', ''लोहितं निरस्यति'' इति शकृत्सम्प्रवेधन-लोहितनिरसने। इदमपि ''पशावनालम्भात् लोहितशकृतोरकर्मत्वम्'' इत्यधिकरणे स्थितम्।**

**व्याख्या** - प्रधानयागात् पूर्वं क्रियमाणायाः प्रतिपत्तेः उदाहरणद्वयं ग्रन्थकारेण प्रदत्तम् - ''शकृत्सम्प्रविध्यति'', ''लोहितं निरस्यति'' इति च। उभाभ्यां वाक्याभ्यां विष्ठायाः बहिर्निःसारणं रुधिरस्य च निरसनमिति यथाक्रमं विहितमस्ति। अयं विषयः अपि मीमांसादर्शनस्य ''**पशावनालम्भात् लोहितशकृतोरकर्मत्वम्**'' इति अधिकरणे सविस्तरं प्रपञ्चितमस्ति।

- **उपयोक्ष्यमाणसंस्कारभेदाः**

**मूलम् - उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधः - साक्षाद्विनियुक्तसंस्कारः, साक्षाद्विनियुक्तसमये यदुपकारकं तत्संस्कारः, विनियोक्ष्यमाणसंस्कारश्चेति।**

**तत्र आद्यो यथा ''व्रीहीन् अवहन्ति'' इत्यादौ ''व्रीहिभिर्यजेत'' इत्यादिवाक्येन साक्षाद्विनियुक्तव्रीहीणाम-वहननसंस्कारोऽवघातादिरूपः। द्वितीयो यथा ''वत्समालभेत'' इति दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोद्रव्यस्य उपकारको यो वत्सः तत्संस्कारकमिदमालम्भनम्। तृतीयो यथा ''तप्ते पयसि दध्यानयति'' इति। अत्र ''सा वैश्वदेव्यामिक्षा'' इति वाक्येन तच्छब्देन निर्दिश्य वैश्वदेवयागाङ्गत्वेन विनियोक्ष्यमाणं यत् पयः, तत्संस्कारत्वाद् विनियोक्ष्यमाणसंस्कारकं दध्यानयनम्।**

**व्याख्या** - उपयोक्ष्यमाणसंस्कारः त्रिविधः - साक्षाद्विनियुक्तसंस्कारः, साक्षाद्विनियुक्तस्य यदुपकारकं तत्संस्कारः, विनियोक्ष्यमाणसंस्कारश्चेति। तत्र साक्षाद्विनियुक्तसंस्कारो यथा ''व्रीहीन् अवहन्ति'' इत्यादिस्थलेषु ''व्रीहिभिर्यजेत'' इत्यादिवाक्येन यागमुद्दिश्यैव साक्षाद्विनियुक्तव्रीहीणां ''व्रीहीन् अवहन्ति'' इति वाक्येन अवहननसंस्कारः अभिहितः।

साक्षाद्विनियुक्तोपकारकसंस्कारो यथा ''वत्समालभेत'' इति। दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोद्रव्यस्य उपकारको यो वत्सः तत्संस्कारम् इदम् स्पर्शस्वरूपम् आलम्भनम्। ''गां दोग्धि'' इति वाक्येन साक्षात् गोदोहनस्य उपकारको यो वत्सः तस्य स्पर्शरूपः संस्कारः।

विनियोक्ष्यमाणसंस्कारो यथा ''तप्ते पयसि दध्यानयति'' इति। अत्र ''**तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्**'' इति सम्पूर्णो मन्त्रः। चातुर्मास्येषु वैश्वदेवाख्ये प्रथमे पर्वणि श्रुतमिदं वाक्यम्। अत्र विश्वेदेवदेवता-आमिक्षाद्रव्यसम्बद्धः यागो विधीयते। द्वितीयेन वाक्येन वाजिनद्रव्यकं यागान्तरम्। अतितप्ते पयसि दधिप्रक्षेपे कृते तद् द्विधा भवति। तत्र घनीभूतं द्रव्यम् आमिक्षा इत्युच्यते। अन्यत् द्रवीभूतं तक्रसदृशं वाजिनम् इत्युच्यते। अत्र ''सा वैश्वदेव्यामिक्षा'' इति वाक्येन तच्छब्देन आमिक्षां निर्दिश्य वैश्वदेवयागाङ्गत्वेन विनियोक्ष्यमाणं यत्पयः तत्संस्कारत्वाद् विनियोक्ष्यमाणसंस्कारकं दध्यानयनम्।

**मूलम् - पशुपुरोडाशयागस्तु उपयुक्तोपयोक्ष्यमाणदेवतासंस्कारार्थः, त्यागांशे अदृष्टार्थश्च। अत्र तत्संस्कार्याग्नीषोमदेवताया वपायागे उपयुक्तार्थत्वात् हृदयाद्यङ्गयागेषु उपयोक्ष्यमाणत्वाच्च।**

**व्याख्या** - पशुपुरोडाशस्य यागस्तु उपयुक्ताया उपयोक्ष्यमाणायाश्च देवतायाः संस्कारार्थः। तथैव त्यागांशे अदृष्टसम्पादनार्थोऽपि। तथाहि अत्र यागेन संस्कार्या या अग्नीषोमीयाख्या देवता, सा वपायागे उपयुक्ता वर्तते। हृदयाद्यङ्गयागेषु च सा उपयोक्ष्यमाणा वर्तते। दीक्षागतामग्नीषोमदेवतामुद्दिश्य कर्तव्ये पशुयागे पशोर्विदारणानन्तरं तस्य वपां निष्कास्य प्रथमतः अग्नीषोमाख्यदेवतोद्देश्येन वपायागः अनुष्ठातव्यो भवति। ततः पशुयागस्य अङ्गभूतः पुरोडाशयागः तामेव अग्नीषोमाख्यां देवताम् उद्दिश्य अनुष्ठातव्योऽस्ति। तदनन्तरं पशोः हृदयजिह्वा-वक्षःप्रभृत्यवयवान् आदाय अग्नीषोमदेवतामेवोद्दिश्य यागः कर्तव्यो भवति। देवतामुद्दिश्य द्रव्यत्यागः एव याग इत्युच्यते। तदा यागगतो द्रव्यत्यागात्मकोंऽशः देवतासंस्कारकः कथं भवेदिति चेत् ग्रन्थकारः ''त्यागांशे अदृष्टार्थश्च'' इति वाक्येन समाधत्ते। यागे त्रयः अंशाः भवन्तिदेवतोद्देशः, द्रव्यत्यागः, द्रव्यप्रक्षेपश्चेति।


**मूलम् - स्विष्टकृद्यागे द्रव्यांशे देवतांशे चोपयुक्तसंस्कारार्थ:, त्यागांशे अदृष्टार्थश्च। सूक्तवाकसाधनं प्रहरणमपि तथैव। उत्तमप्रयाजो यक्ष्यमाणदेवतासंस्कारत्वात्तदंशे उपयोक्ष्यमाणसंस्कार:, इतरांशे अदृष्टार्थ:। हृदयादिहविर्यागात्पूर्वं क्रियमाणो वसाहोमोऽपि वसांशे प्रतिपत्तिरितरांशे अदृष्टार्थम् इत्याद्यूह्यम्।**

**व्याख्या** - स्विष्टकृद्यागो हि द्रव्यांशेन देवतांशेन च उपयुक्तस्य संस्कारार्थो भवति। त्यागांशेन च अदृष्टार्थोऽपि भवति। सूक्तवाकमन्त्रोच्चारणे क्रियमाणं प्रहरणमपि तथैवावगन्तव्यम्। अन्तिम: प्रयाज: अग्रे क्रियमाण: यागे उद्देश्यभूताया: देवताया: स्मारक: अर्थात् देवतास्मरणात्मकसंस्कारार्थ:। तेन देवतांशे स उपयोक्ष्यमाणस्य संस्कारार्थ इत्यभिप्राय:। त्यागात्मक: इतरांशश्च अदृष्टार्थोऽस्ति।

- **मतान्तरेण प्रतिपत्तिलक्षणम्**

**मूलम् - केचित्तु उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वं प्रतिपत्तिकर्मत्वम्। चतुरवत्तद्रव्यस्य होमेन भस्मीभूतस्य होमे उपयोक्ष्यमाणत्वाभावात् तद्भिन्नत्वं होमेऽस्तीति लक्षणसङ्गतिरित्याहु:।**

**व्याख्या** – मतान्तरेण केचित्तु मीमांसका: प्रतिपत्ते: लक्षणान्तरं वदन्ति। यथा ''उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वं प्रतिपत्तिकर्मत्वम्'' इति। अथवा ''फलरहितकर्माङ्गविशेष एव प्रतिपत्ति:'' इति। यथा श्राद्धप्रभृतिकर्मणि प्रदत्तद्रव्यस्य कुशमयब्राह्मणपक्षे जलादौ निक्षेप: प्रतिपत्ति: इति। तेषां मते प्रतिपत्तिकर्म उपयोक्ष्यमाणात् भिन्नम्। उपयोक्ष्यमाणस्य भविष्ये उपयोग: भवति, न तथा प्रतिपत्तिकर्मण: भविष्ये उपयोगो भवति। यथा होमे चतुरवत्तद्रव्यस्य उपयोगानन्तरं तद्भस्मीभूतं भवति, तस्मात् होमानन्तरं तस्य उपयोग: कर्तुं न शक्यते। तस्मात् तत् न उपयोक्ष्यमाणम्। चतुरवत्तहोम: उपयोक्ष्यमाणात् भिन्न: अस्ति। अत: ''उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वं प्रतिपत्तिकर्मत्वम्'' इति लक्षणे समन्वयो भवति।




## स्वाध्याय:

**१. रिक्तस्थानापूर्तिं कुरुत।**

(१) ......... आत्मगतापूर्वजनकं कर्म अस्ति। (गुणकर्म, अर्थकर्म, विधिकर्म)

(२) ......... प्रतिपत्तिकर्म अस्ति। (उपयुक्तसंस्कारकम्, विनियुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकम्)

(३) गुणकर्म .........। (एकविधम्, द्विविधम्, त्रिविधम्)

(४) इडाभक्षणम् ......... अस्ति। (आकीर्णकरम्, अवकीर्णकरम्, अवदानकारकम्)

(५) ......... प्रधानोत्तरकाला प्रतिपत्ति: अस्ति। (इडाभक्षणम्, होम:, द्रव्यत्याग:)

(६) कृष्णविषाणाप्रासनं ......... उदाहरणम्। (आपत्तिकर्मण:, विधीयमानकर्मण:, प्रतिपत्तिकर्मण:)

(७) ''कृष्णविषाणया कण्डूयति...'' इति वाक्यं ......... श्रूयते।

(अग्निहोत्रयागे, अग्निष्टोमयागे, ज्योतिष्टोमयागे)

(८) प्रतिपत्तिः .........। (एकविधा, द्विविधा, त्रिविधा)

(९) देवतोद्देश्यकद्रव्यत्यागः ......... उच्यते। (यागः, होमः, तपः)

(१०) साक्षाद्विनियुक्तसंस्कारस्य ......... इति उदाहरणम् अस्ति।

(व्रीहीन् प्रोक्षति, व्रीहीन् अवहन्ति, व्रीहिभिर्यजति)

२. **एकैकवाक्येन उत्तरं लिखत।**

(१) यागादिजन्यं स्वर्गादिजनकं फलैकनाश्यं कश्चन गुणविशेषः कः?

(२) प्रधानकर्म किं निगद्यते?

(३) उपयुक्तसंस्कारः इति पदस्य व्युत्पत्तिलभ्योऽर्थः कः?

(४) श्राद्धादिकर्मणि प्रदत्तहविर्द्रव्यस्य जलादौ निक्षेपः किम् उच्यते?

(५) का नाम प्रधानोत्तरकालिका प्रतिपत्तिः?

(६) ''जुहोति'' इति चोदनाचोदितः कः भवति?

(७) साक्षाद्विनियुक्तोपरकारकसंस्कारस्य उदाहरणं किम्?

३. **द्वित्रवाक्यैःउत्तरं लिखत।**

(१) प्रतिपत्तिः इति शब्दार्थं लिखत।

(२) उपयुक्तसंस्कारः इत्यस्य व्युत्पत्तिं लिखत।

(३) गुणकर्मणः स्वरूपं स्पष्टयत।

(४) प्रधानपूर्वकालिकम् उपयुक्तसंस्कारकं स्पष्टयत।

(५) उपयोक्ष्यमाणसंस्कारभेदान् लिखत।

४. **टिप्पणीः लिखत।**

(१) यागशब्दार्थः।

(२) होमशब्दार्थः।

(३) मतान्तरेण प्रतिपत्तिलक्षणम्।

५. **निबन्धात्मकम् उत्तरं लिखत।**

(१) मीमांसादर्शनरीत्या प्रतिपत्तिकर्मस्वरूपं निबध्नीत।

(२) उपयोक्ष्यमाणसंस्कारभेदान् प्रतिपादयत।

(३) मीमांसादर्शनस्य भारतीयदर्शनेषु वैशिष्ट्यं प्रतिपादयत।

●

# १० कर्मभेदविचारः २

**प्रस्तावना**

मीमांसादर्शने यागादिरेव कर्म इति उच्यते। इदं च कर्म प्रधानतया द्विविधम् - अर्थकर्म गुणकर्म च। तत्र आत्मगतापूर्वोत्पादकं कर्म अर्थकर्म, संस्कारजनकं च गुणकर्म। अस्मिन् पाठे अर्थगुणकर्मणोः प्राधान्यविचारं कृत्वा गुणकर्मणः चातुर्विध्यम्, अर्थकर्मणः त्रैविध्यम्, काम्यकर्मणः त्रैविध्यं चेति विषयाः प्रतिपाद्यन्ते।

- **अर्थगुणकर्मणोः प्राधान्यविचारः**


**मूलम् - अत्रायं विशेषः - अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यम्, द्रव्यस्य च गुणत्वम्। यथा अग्निहोत्रादौ द्रव्यादेर्गुणत्वम्। गुणकर्मणि द्रव्यस्य प्राधान्यं, द्रव्ये च कर्मणो गुणत्वम्। व्रीहीन् प्रोक्षति, अवहन्ति इत्यादौ द्वितीयया व्रीहीणां क्रियासाध्यत्वप्रतीतेः क्रियापेक्षया द्रव्यस्य प्राधान्यम्। प्रोक्षणादिक्रियायाः तदपेक्षया गुणत्वमिति।**

**व्याख्या** - कर्मणो गुणकर्मार्थकर्मभेदेन यद् द्वैविध्यं पूर्वमुक्तं तत्र विशेषं प्रतिपादयति ग्रन्थकारः। अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यं, कर्मापेक्षया च द्रव्यस्य गुणत्वं भवति। यथा अग्निहोत्रादौ कर्मणि दध्यादिद्रव्यस्य गुणत्वम्। गुणकर्मणि च कर्मापेक्षया द्रव्यस्य प्राधान्यं भवति, द्रव्यापेक्षया कर्मणो गुणत्वं भवति। यथा व्रीहीन् प्रोक्षति, व्रीहीन् अवहन्ति इत्यादौ व्रीहिगतद्वितीयाविभक्त्या व्रीहिषु प्रोक्षणक्रियायाः साध्यत्वं प्रतीयते। अतः प्रोक्षणक्रियापेक्षया व्रीह्यात्मकद्रव्यं प्रति प्राधान्यं प्रतीयते। व्रीहिद्रव्यापेक्षया च प्रोक्षणादिक्रियासु गौणत्वं प्रतीयते।

- **गुणकर्मणः चातुर्विध्यम्**

**मूलम् - पुनरपि गुणकर्म चतुर्विधम् - उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात्। तत्रोत्पत्तिसंस्कारो यथा ''अग्नीनादधीत'' इति। मन्त्रविशेषैः सम्भारेषु निधापिता अप्याहवनीयादय उत्पद्यन्त इत्याहवनीयाद्युत्पत्तिहेतुभूत-संस्कारजनकत्वात् आधानस्य उत्पत्तिसंस्कारत्वम्। आप्तिसंस्कारो यथा ''स्वाध्यायोऽध्येतव्यः'' इति। अध्ययनेन स्वाध्याय आप्यत इत्याप्तिसंस्कारोऽयम्। विकृतिर्यथा - ''व्रीहीन् अवहन्ति'' इति व्रीहिगतवैतुष्यरूपविकृति-जनकत्वादवहननं विकृतिसंस्कारः। संस्कृतिर्यथा ''व्रीहीन् प्रोक्षति'' इति। अत्र प्रोक्षणस्य व्रीहिगतातिशयरूप-संस्कृतिजनकत्वात् संस्कृतिरूपगुणकर्मत्वम्। अत्राधानमध्ययनञ्च स्वतन्त्रं गुणकर्म न तु क्रत्वङ्गम्। प्रोक्षणादिकं सर्वं क्रत्वङ्गं गुणकर्मेति ध्येयम्।**

**व्याख्या** - इदं गुणकर्म पुनः चतुर्विधम् - उत्पत्तिसंस्कारः, आप्तिसंस्कारः, विकृतिसंस्कारः, संस्कृतिसंस्कारः चेति। तत्र येन वाक्येन कस्यापि कर्मणः संस्काररूपेण विधानं क्रियते तत् उत्पत्तिसंस्कारः। यथा ''अग्नीनादधीत'' इति वाक्येन अग्न्याधानं क्रियते। अन्याधानं नाम ''गार्हपत्याहवनीयदक्षिणाग्नीनां तत्तदायतनेषु सूत्रोक्तविधिना स्थापनम्'' इति। अत्र ''अग्नीनादधीत'' इति मन्त्रविशेषैः सम्भारेषु निधापिता अप्याहवनीयादयः उत्पद्यन्ते इति आवहवनीयाद्युत्पत्तिहेतुभूतसंस्कारजनकत्वात् आधानस्य उत्पत्तिसंस्कारत्वम्।




आप्तिसंस्कारो यथा ''स्वाध्यायोऽध्येतव्य:'' इति। अध्ययनेन स्वाध्याय आप्यत इति आप्तिसंस्कार:। आप्ति: इत्युक्ते प्राप्ति: वेदाक्षराणां प्राप्ति: इत्यर्थ:। स्वाध्यायो नाम ''गुरुमुखोच्चारणपूर्वकम् अनूच्चारणम्'' इति। स्वाध्यायात् अध्येतव्यम् इति आप्तिसंस्कार:।

य: संस्कार: द्रव्यस्य मूलरूपे परिवर्तनम् आनयति, स: विकृतिसंस्कार: उच्यते। यथा ''व्रीहीन् अवहन्ति'' इति। अत्र व्रीहीषु अवहननेन वैतुष्यरूपं विकृतिर्जायते। अत: इयम् अवहननक्रिया वैतुष्यरूपविकृतिजनकत्वात् विकृतिसंस्कार: इत्युच्यते।

सम्यक् करोति इति संस्कृति:। संस्कृतिसंस्कारो यथा ''व्रीहीन् प्रोक्षति'' इति। व्रीहीणां प्रोक्षणेन जलसिञ्चनेन वा विशेषसंस्कारो भवति। अत: प्रोक्षणस्य व्रीहिगतातिशयरूपसंस्कृतिजनकत्वात् संस्कृतिरूपगुणकर्मत्वम्। अत्र इदम् अवधेयं यत् आधानमध्ययनञ्च स्वतन्त्रं गुणकर्म, न तु क्रत्वङ्गम्। अवहननं प्रोक्षणं च सर्वं क्रत्वङ्गं, गुणकर्म, न तु स्वतन्त्रं कर्म इति ध्येयम्। अवहननप्रोक्षणयो: उपयोग: यज्ञनिमित्तं भवति अत: क्रत्वङ्गत्वम्।

- **अर्थकर्मण: त्रैविध्यम्-**

**मूलम् - अर्थकर्म त्रिविधम् - नित्य-नैमित्तिक-काम्यभेदात्। यथा ''यावज्जीवमग्निहोत्रं जुहोति'', ''सायं जुहोति'', ''प्रात: जुहोति'' इति जीवता पुरुषेण सायंप्रात: कालयो: नियमेन कर्त्तव्यतयाऽवगतम् अग्निहोत्रादिकं नित्यम्। ''अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्'' इति दर्शपूर्णमासातिपत्तिनिमित्तकपथिकृदिष्ट्यादिकं नैमित्तिकम्।**

**व्याख्या** - नित्य-नैमित्तिक-काम्यभेदेन अर्थकर्म त्रिविधमस्ति। ''यावज्जीवमग्निहोत्रं जुहोति'', ''सायं जुहोति'', ''प्रात: जुहोति'' इत्यादिभि: वाक्यै: यावज्जीवनकालम् आमरणान्तं सायंप्रात: नियमेन कर्तव्यतया विहितम् अग्निहोत्रादिकर्म नित्यकर्म इत्युच्यते।

नैमित्तिकं यथा ''अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्'' इति। अस्यायम् अर्थ: यदि दर्शपूर्णमासयागे मुख्यकाले कालातिपत्ति: तर्हि तस्या: निराकरणाय अनेन वाक्येन पथिकृत्याग: विधीयते तन्नैमित्तिकम्। ''पथिकृत्'' इति अग्ने: संज्ञाविशेष:।

**अर्थकर्म**

- नित्यम् → अग्निहोत्रयागः
- नैमित्तिकम् → पथिकृत्यागः
- काम्यम् → कारिरियागः
  - ऐहिकम् → कारिरिः
  - आमुष्मिकम् → दर्शपूर्णमासः
  - एहिकामुष्मिकम् → वायव्ययागः

**मूलम् - नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव, कृते फलं नास्तीति केचित्। अन्ये तु दुरितनिवृत्तिः फलमस्ति - ''नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्'' इत्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात्। न चैवं तयोरपि काम्यत्वापत्तिः फलत्वादिति वाच्यम्। फलकामनापूर्वकानुष्ठानाभावात्, तत्तद्विधिवाक्ये फलकाममुद्दिश्य तदर्थसाधनत्वेन विधानाभावाच्च काम्यत्वानुपपत्तिः।**

**व्याख्या** - नित्यनैमित्तिकयोः अकरणे प्रत्यवायः एव। प्रत्यवायो नाम आगामिदुःखम्। नित्यनैमित्तिकविषये मनुना एवमुक्तम्।

**अकुर्वन् विहितं कर्म प्रायश्चित्तीयते नरः।**
**नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्॥**
**उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात्।**
**फलाश्रुतेर्वीप्सया च तन्नित्यमिह कीर्तितम्॥ इति।**

नित्यनैमित्तिकयोः अनुष्ठाने फलं नास्तीति केचित्। अन्ये तु एतयोः दुरितनिवृत्तिः फलमस्ति इति आचक्षते। ''नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्'' इत्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वं श्रूयते।

अत्रः संशयः - यदि नित्यनैमित्तिककर्मणोः फलोत्पादकत्वशक्तिर्नास्ति तर्हि तत् काम्यकर्म किमर्थं न स्यात्। अत्रोच्यते - नित्यनैमित्तिककर्मणोः अनुष्ठानं फलकामनया न क्रियते। किञ्च नित्यनैमित्तिककर्मणोः विधायकं वाक्यं फलमुद्दिश्य न भवति। तस्मात् इदं न काम्यकर्म।

- **काम्यकर्मणः त्रैविध्यम्-**

**मूलम् - काम्यमपि कर्म त्रिविधम् - केवलम् ऐहिकफलकम्, आमुष्मिकफलकम्, ऐहिकामुष्मिकफलकं चेति। तत्राद्यं यथा - कारीर्यादि। तत्तत्समयवर्तिशुष्यत्सस्यसञ्जीवनहेतुवृष्टिकामिना क्रियते, न कालान्तरभावि-वृष्टिकामेन, जन्मान्तरीयवृष्टिकामेन वा।**

कामनाविषयीभूतं काम्यकर्म, फलकामनाधीनकर्तव्यताकत्वमेव कर्मनिष्ठत्वं काम्यत्वम्। यथा स्वर्गादिरूप-फलमुद्दिश्य विहितम् अश्वमेधयागादिकर्म। आहोस्वित् पुत्रादिरूपं फलमुद्दिश्य विहितं पुत्रेष्टियागादिकर्म। इदं काम्यकर्म अपि त्रिविधम् - केवलमैहिकफलकम्, आमुष्मिकफलकम्, ऐहिकामुष्मिकफलकं चेति। इहलोके भवम् ऐहिकम्। इहलोकसम्बन्धिफलप्रदायकं काम्यकर्म ऐहिकफलकम्। यथा कारीरिष्ठ्यादियागः। अयं यागः तत्समयवर्तिशुष्यत् सस्यमञ्जीवनहेतुवृष्टिकामिना क्रियते, न कालान्तरभाविवृष्टिकामेन जन्मान्तरीयवृष्टिकामेन वा। शुष्कतामिव प्राप्तं

धान्यक्षेत्रं पुनः सञ्जीवयितुमिच्छता पुरुषेण इयं ''कारीरी'' इष्टिः अनुष्ठीयते। कालान्तरे वृष्टिः भवति अथवा जन्मान्तरे वृष्टिर्भवतु इतीच्छया इयं कारीरी इष्टिः न केनापि अनुष्ठीयते।

**मूलम् - केवलामुष्मिकफलकं यथा स्वर्गार्थं दर्शपूर्णमासादिकम्। स्वर्गस्य इहलोकभोग्यत्वाभावात्। ऐहिकामुष्मिकसाधारणफलकं यथा ''वायव्यं श्वेतमालभेत भूमिकामः'' इति भूत्यादिफलकमित्यन्यत्र विस्तरः।**

**व्याख्या** - जन्मान्तरे फलदायकस्य काम्यकर्मणः उदाहरणम् अस्ति स्वर्गफलप्राप्तीच्छया अनुष्ठीयमानो दर्शपूर्णमासयागः। यतो हि स्वर्गरूपफलस्य भोगः इहलोके न भवति, केवलम् आमुष्मिकलोके एव भोगः भवति। तस्मादिदं काम्यकर्म केवलामुष्मिकफलकम्। यस्य काम्यकर्मणः फलं लौकिकं पारलौकिकं च उभयं भवति तत् ऐहिकामुष्मिकसाधारणफलकं यथा ''वायव्यं श्वेतमालभेत भूमिकामः'' इति भूत्यादिफलकम्।

**मूलम् - ननु दर्शपूर्णमासादिकर्मणां व्रीह्यादिद्रव्याणाञ्च प्रत्यक्षत्वेन लौकिकत्वात् कथं वेदस्यालौकिकार्थ-बोधकत्वमिति चेत् - न। कर्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादिफलसाधनत्वम् अप्रत्यक्षमिति ''तत्फलसाधनतया तत् कर्म कर्तव्यम्'' इत्येवं फलसाधनतया कर्मकर्त्तव्यताबोधकस्य वेदस्यालौकिकार्थबोधकत्वात्। एवं व्रीह्यादीनां यागादिक्रियासाधनत्वं न प्रत्यक्षवेद्यमिति तद्बोधकस्यापि वेदवाक्यस्यालौकिकार्थबोधकत्वमिति न दोषः।**

**व्याख्या** - प्रत्यक्षादिप्रमाणैः ज्ञातुमशक्ययोः अलौकिकधर्माधर्मयोः विषये वेदाः प्रमाणमिति पूर्वं प्रतिपादितम्। तत्र एवं शङ्का उत्पद्यते - दर्शपूर्णमासादिकर्माणि व्रीह्यादिद्रव्याणि च सर्वेषां प्रत्यक्षत्वात्, तानि लौकिकान्येव। तथा सति तेषां प्रतिपादको वेदः अलौकिकार्थस्य प्रतिपादकः इति कथं वक्तुं शक्यते? तत्रेदं समाधानम् - यद्यपि दर्शपूर्णमासादिकर्माणि प्रत्यक्षाणि तथापि तानि कर्माणि स्वर्गादिफलस्य साधनभूतानि इत्ययमर्थः अप्रत्यक्ष एव। तस्मात् वेदस्य अलौकिकार्थबोधकत्वम् अस्त्येव। कर्मणो यः फलसाधनत्वाकारः सः अप्रत्यक्ष एव, तत्प्रतिपादकत्वेन वेदः अलौकिकार्थबोधकः एवेति वेदस्य अलौकिकार्थबोधकत्वम् अभ्युपगन्तुं न किमपि बाधकम्।

## स्वाध्यायः

**१. रिक्तस्थानपूर्तिं कुरुत।**

(१) संस्कारजनकं कर्म ......... उच्यते। (अपूर्वकर्म, अथकर्म, गुणकर्म)

(२) गुणकर्म ......... विधम्। (एक, द्वि, त्रि)

(३) ''व्रीहीन् प्रोक्षति'' इत्यत्र द्वितीयया ......... प्राधान्यम् उच्यते। (द्रव्यस्य, प्रोक्षणस्य, यागस्य)

(४) ''अग्नीनादधीत'' इति वाक्येन ......... आधानं क्रियते। (यागस्य, अग्नेः, व्रीहीणाम्)

(५) ''स्वाध्यायोऽध्येतव्यः'' इति ......... संस्कारः। (उत्पत्तिः, आप्तिः, विकृतिः)

(६) व्रीहीणां विशेषसंस्कारो ......... भवति। (प्रोक्षणेन, अवहननेन, त्यागेन)

(७) ......... नाम प्रत्यवायः। (व्यतीतं दुःखम्, आगामि दुःखम्, वर्तमानं दुःखम्)

(८) दुरितक्षयं ......... कर्मणः फलम् अस्ति। (नित्यस्य, नैमित्तिकस्य, नित्यनैमित्तिकयोः)

(९) कामनाविषयीभूतं कर्म ......... भवति। (नित्यं, काम्यं, उपासना)

(१०) काम्यकर्म ......... विधम्। (एक, द्वि, त्रि)

२. **एकैकवाक्येन उत्तरं लिखत।**

(१) किं नाम अग्न्याधानम्?

(२) किं नाम स्वाध्याय:?

(३) गुणत्वम् इति शब्दस्य क: अर्थ:?

(४) य: संस्कार: द्रव्यस्य मूलरूपे परिवर्तनम् आनयति, स: क: संस्कार:?

(५) अर्थकर्म कतिविधम्?

(६) किं नाम नित्यं कर्म?

(७) किं नाम नैमित्तिकं कर्म?

३. **द्वित्रवाक्यै:उत्तरं लिखत।**

(१) नित्यनैमित्तिककर्मणो: भेदं लिखत।

(२) काम्यकर्मण: उदाहरणं स्पष्टयत।

(३) करीरिष्ट्यादियाग: कीदृशं कर्म?

(४) नित्यकर्माकरणे कथं प्रत्यवायो भवति?

(५) अर्थकर्मगुणकर्मणो: भेद: क:?

४. **टिप्पणी: लिखत।**

(१) केवलमैहिकफलकं काम्यकर्म।

(२) आमुष्मिकफलकं काम्यकर्म।

(३) संस्कृतिसंस्कार:।

५. **निबन्धात्मकम् उत्तरं लिखत।**

(१) अर्थकर्मगुणकर्मणो: स्वरूपं प्रतिपाद्य गुणकर्मण: चातुर्विध्यं प्रतिपादयत।

(२) अर्थकर्मण: स्वरूपं निबध्नीत।

(३) काम्यकर्म सोदाहरणं विशदयत।

●

# ११ विध्यर्थविचारः

**प्रस्तावना**

अपौरुषेयं वाक्यं वेदः। स च विधिमन्त्रादिभेदेन पञ्चविधः। तत्र विधिवाक्यस्य शब्दप्रमाणरूपत्वात् विधायकत्वं स्वीक्रियते। अस्य विधेः अभिधानरूपत्वेन प्रवृत्तिजनकत्वमपि बोध्यम्। एतस्मात् हेतोः विधिशब्दस्य इष्टसाधनत्वादिरूपे विध्यर्थे प्रयोगदर्शनात् विधायकत्वं निश्चीयते। विधीयते विधिरूपशब्देन प्रतिपाद्यते योऽसौ विधिः इष्टसाधनत्वादिरूपः, तस्याभिधायको वाचकः इति। आहोस्विद् अर्थविशेषप्रतिपादकः प्रत्ययो विधिः। सोऽयं विधिरूपः प्रत्ययो लिङ्लोडादिरूपः विज्ञेयः। मीमांसादर्शने 'भावना' इति शब्दः विशिष्टार्थे प्रयुज्यते। इयं भावना फलोत्पादने प्रेरकस्य व्यापारविशेषः, येन फलोत्पत्तौ साहाय्यं भवति। इयं भावना आर्थीशाब्दीभेदात् द्विविधा भवति। अस्मिन् पाठे सपरिकरं भावनालक्षणम्, आर्थीभावना, शाब्दीभावना च निरूप्यते।

---

**मूलम् - इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते। तत्र ''स्वर्गकामो यजेत'' इत्यत्र यजिधातोरुपरितने ''त'' प्रत्यये धर्मद्वयमस्ति - आख्यात्वं लिङ्त्वं चेति। तत्र आख्यातत्वं सर्वलकारसाधरणं तदवच्छेदेन लिङ्प्रत्ययः पुरुषप्रवृत्तिरूपाम् आर्थीभावनां प्रतिपादयति।**


**व्याख्या** - विधिवाक्यनिरूपणानन्तरं नामधेयनिरूपणात् पूर्वं विधिवाक्यस्य विधायकत्वं विधिबोधकत्वं केन प्रकारेण भवति, तत् अभिधीयते। वेदे सर्वत्र विधिवाक्येषु ''स्वर्गकामो यजेत'' इत्यादिषु ''यजेत'' इत्यत्र अंशद्वयमस्ति - यजिधातुः, प्रत्ययश्च। प्रत्ययेऽपि अस्ति अंशद्वयम् - आख्यातत्वम्, लिङ्त्वं चेति। यजेत इत्यत्र प्रत्ययगततिङ्संज्ञकाः तिबाद्यादेशाः आख्यातशब्देन व्यवह्रियन्ते। आख्यातत्वं सर्वलकारसाधारणम्। प्रत्यये अंशद्वयं तु न स्वरूपेण, किन्तु धर्मद्वयद्वारा। यजेत इत्यत्र लिङः स्थाने त इत्ययमादेशः कृतः इति तत्र स्थानिद्वारा लिङ्त्वरूपो धर्मः एकः। स च आदेशे तप्रत्यये अनुवर्तते। अपरस्तु आख्यातत्त्वरूपो धर्मः प्रत्ययस्य स्वगत एव। आख्यातत्त्वलिङ्त्वाभ्यां भावना बोध्यते। अतः यजेत इत्यत्र प्रथमं प्रत्यनेन ''भावयेद्'' इति प्रतीयते। सुबन्ताभिहितानां सर्वेषां कारकाणां तिङन्तार्थक्रियान्वयनियमे सति तिङन्तार्थस्य प्राधान्यात्। तत्रापि प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात् प्रथमं प्रत्ययार्थभावनायाः उपस्थितिः भवति। तत्र आख्यातत्वेन विशेषितः अर्थात् आख्यातत्वेन रूपेण ज्ञातः लिङ्प्रत्ययः आर्थीभावनां प्रतिपादयति, सा च पुरुषप्रवृत्तिरूपा।

- **आर्थीभावना-**

**मूलम् - सा चार्थीभावना किं, केन, कथमिति अंशत्रयविशिष्टा। तथा हि - यजेत इत्यत्र प्रथमं प्रत्ययेन ''भावयेत्'' इति प्रतीयते। सुबन्ताभिहितानां सर्वेषां कारकाणां तिङन्तार्थक्रियान्वयनियमे सति तिङन्तार्थस्य प्राधान्यात्। तत्रापि प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात् प्रथमं प्रत्ययार्थभावनायाः उपस्थितिर्युक्ता। ततः करोतिसमानार्थकभावयतेः सकर्मकत्वात् ''किम्भावयेत्'' इति कर्माकाङ्क्षायां भिन्नपदोपात्तोऽपि स्वर्गो भाव्यत्वेनान्वेति। भाव्यत्वेन कर्मत्वेनेत्यर्थः, साध्यत्वेनेति यावत्। न तु समानपदोपात्तोऽपि धात्वर्थो भाव्यत्वेनान्वेति। दुःखात्मकस्य यागस्य ईप्सिततमत्वरूपकर्मत्वायोग्यत्वात्। स्वर्गस्य त्वानन्दात्मकत्वेन ईप्सिततमतया कर्मत्वेनान्वययोग्यत्वात्। ततश्च ''स्वर्गं भावयेत्'' इति बोधो भवति। ततः ''केन'' इति करणाकाङ्क्षायां समानपदोपात्तो यागः करणत्वेनान्वेति - ''यागेन स्वर्गं कुर्यात्'' इति। ततः ''कथं यागेन स्वर्गं कुर्याद्'' इति कथम्भावाकाङ्क्षायाम् अग्न्यन्वाधानावहननादिजन्यदृष्टोपकारेण प्रयाजादिजनिता-दृष्टोपकारसहितेन यागेन स्वर्गं कुर्यादिति अग्न्यन्वाधानप्रयाजादिकम् अङ्गजातम्, इतिकर्तव्यतात्वेनान्वेति। कथम्भावाकाङ्क्षात्वमितिकर्तव्यतात्वम्। यथा ''ओदनकामः पचेत्'' इत्यत्र लिङ्गा भावना प्रतीयते। किं**

**भावयेदिकायाङ्क्षायाम् ओदनो भाव्यत्वेनान्वेति, केनेत्याकाङ्क्षायां पाकेनेति लभ्यते। कथमित्याकाङ्क्षायां तृणफूत्कारसहितेनेति। ततश्च तृणफूत्काराद्युपकृतेन पाकेन (तेजःसंयोगेन) ओदनम्भावयेदिति वाक्यार्थः सम्पद्यते। तद्वद्वेदेऽपि बोध्यम्।**

**व्याख्या** – ''यजेत'' इत्यत्र प्रकृत्यंशस्य यज् इत्यस्य यागोऽर्थः। देवतोद्देशेन द्रव्यत्यागो यागः। प्रत्ययांशस्य अर्थस्तु तादृशयागानुकूला भावना। तत्र लिङ्त्वांशेन शाब्दीभावना, आख्यातत्वांशेन आर्थीभावना च बोध्यते। शब्दसम्बन्धी इयं शाब्दी, अर्थस्य इयम् आर्थी भावना इति। भावना च व्यापारविशेषः। यागोत्पादकव्यापारविशेषश्च द्विविधः – साक्षात् यागोत्पादकः, परम्परया यागोत्पादकश्च। तत्र आद्यः साक्षाद्यागोत्पादकव्यापारः प्रयत्नरूपः सामग्रीसम्पादन-ऋत्विग्वरणादिरूपो वा यजमानिष्ठः। यजमानश्च यागकर्ता। अयं यजमाननिष्ठव्यापारः आर्थीभावना इति उच्यते। यजनकर्तृत्वरूपो योऽर्थः तन्निष्ठत्वात् तस्य व्यापारस्य। अर्थस्य यागकर्त्रादेः इयं आर्थी। भावना व्यापारः।




भावना अंशत्रयविशिष्टा भवति – किं भावयेत्, केन भावयेत्, कथं भावयेत्। एतदेव साध्याकाङ्क्षा, साधनाकाङ्क्षा, इतिकर्त्तव्यकाङ्क्षा चेति उच्यते। आर्थीभावनायाः साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेन सम्बध्यते। समानपदश्रुत्या यागस्यैव साध्यत्वेन अन्वयो भवति इति चेत् यद्यपि प्रमाणबलाबलविचारे पदान्तरोपात्तफलस्य साध्यत्वेनान्वयापेक्षया प्रबलं सन्निहिता च समानपदश्रुतिः, किन्तु प्रमेयावलोकने प्रबलसमानपदश्रुत्या बोधितत्वेऽपि धात्वर्थयागस्य अपुरुषार्थत्वेन पदान्तरोपात्तमपि स्वर्गादिफलं साध्यत्वेन अन्वयं भजते। अत एव स्वर्गं भावयेत् इति बोधो जायते। केन स्वर्गं भावयेत् इति करणाकाङ्क्षायां धात्वर्थयागादिः करणत्वेन अन्वेति। यागेन स्वर्गं भावयेत् इति। अत्र प्रमाणं तु पदश्रुतिः समानपदश्रुतिः वा। एकेनैव पदेन प्रकृतिभागेन यागः बोध्यते। प्रत्ययभागेन आर्थीभावना बोध्यते इति उभयोरेकपदबोधितत्वेन एकपदश्रुतिः अथवा समानपदश्रुतिः इति व्यवहारः। अतः धात्वर्थस्य पदश्रुत्या आख्यातार्थार्थीभावनायां करणत्वेन अन्वयः। कथं यागं भावयेत् इति इतिकर्त्तव्यताकाङ्क्षायाम् अग्न्यन्वाधाना-वहननादिजन्यदृष्टोपकारेण प्रयाजानुयाजादिजनितादृष्टोपकारणसहितेन यागेन स्वर्गं कुर्यात् इति अग्न्यन्वाधान-प्रयाजाद्यङ्गसमूहः इतिकर्तव्यात्वेन अन्वयं प्राप्नोति। कथंभावाकाङ्क्षापूरकत्वम् इतिकर्तव्यतात्वम्। यथा ओदनकामः पचेत् इत्यत्र लिङ्ग भावना प्रतीयते। किं भावयेत् इत्याकाङ्क्षायाम् – ओदनो भाव्यत्वेन अन्वेति, ''केन'' इत्याकाङ्क्षायां पाकेन इति लभ्यते। ''कथम्'' इत्याकाङ्क्षायां तृणफूत्कारसहितेन इति। ततश्च तृणफूत्काराद्युपकृतेन पाकेन ओदनं भावयेदिति वाक्यार्थः सम्पद्यते।

**भावना ( अंशत्रयवती )**

- किं भावयेत् → साध्याकाङ्क्षा → फलम्
- केन भावयेत् → साधनाकाङ्क्षा → यागः
- कथं भावयेत् → इतिकर्तव्यताकाङ्का → अङ्गकर्माणि

ननु यागस्य क्षणिकत्वात् कथं कालान्तरभाविस्वर्गादिसाधनसमर्थो यागः भवेत्? यतो हि यागः क्रियारूपः, क्रिया च क्षणिका, तृतीये क्षणे नश्यति। तथा च कथम् अविद्यमानो यागः कालान्तरभाविस्वर्गरूपफलं प्रति साधनं करणं वा भवेत् इति चेत् - तन्निर्वाहार्थमेव फलबलात् अपूर्वं कल्प्यते। तत्र श्रुतार्थापत्तिरेव प्रमाणम्। वेदवाक्येन ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यादिना यागस्वर्गादिफलयोः साध्यसाधनभावः विहितः। यागस्तु क्षणिकः इति श्रुतसाध्यसाधनभावान्यथाऽनुपत्त्या अर्थापत्त्या अपूर्वं कल्प्यते।

- **शाब्दीभावना-**

**मूलम् - स एव लिङ्प्रत्ययो लिङ्त्वावच्छेदेन शब्दभावनां प्रेरणाख्यामभिधत्ते। लोकेऽपि ''गामानय'' इत्याचार्यवाक्यश्रवणानन्तरम् ''अयमाचार्यो मां गवानयने प्रेरयति'' इति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्त्तत इत्यन्वयव्यतिरेकाभ्यां प्रेरणाज्ञानं प्रवृत्तिकारणम्। प्रेरणाज्ञानस्य चान्वयव्यतिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात् लिङादेः प्रेरणायां शक्तिर्लोके गृह्यते इति वेदेऽपि तत्रैव शक्तिकल्पनौचित्यात्। इयांस्तु विशेषः - लोके गवानयनादिप्रवृत्त्यनुकूलः प्रेरणाख्यो व्यापारः प्रयोक्तृपुरुषगताभिप्रायविशेषः, वेदे तु प्रयोक्तृपुरुषाभावात् लिङादिशब्दनिष्ठ एव स इत्यङ्गीक्रियते। अत एव शब्दनिष्ठव्यापरत्वात् शाब्दीभावना इत्युच्यते, यागहोमादिविषयक-प्रवृत्तिहेतुत्वात् प्रवर्तना प्रेरणेति चोच्यते।**

**व्याख्या** - शाब्दीभावना नाम पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः। पुरुषप्रवृत्तिरूपार्थभावनोत्पत्त्यनुकूलो लिङ्गादिशब्दस्य व्यापारविशेषः। शाब्दीभावना लिङ्त्वादिना लिङाद्यर्थः। शाब्दीभावना लिङ्प्रत्ययार्थः इत्यत्र किं प्रमाणमिति चेत् - लिङ्श्रवणे सर्वत्र अयं मां प्रवर्तयति इत्येवंरूपः प्रकृतिजनकव्यापाररूपः अर्थः प्रतीयते। लोकेऽपि ''गाम् आनय'' इति आचार्यवाक्यश्रवणानन्तरम् ''अयम् आचार्यो मां गवानयने प्रेरयति'' इति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्तते इति अन्वयव्यतिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात् लिङादेः प्रेरणायां शक्तिर्लोके गृह्यते इति वेदेऽपि शक्तिकल्पनौचित्यात्।

अत्रायं विशेषः - लोके गवानयनादिप्रवृत्त्यनुकूलप्रेरणाख्यो व्यापारः प्रयोक्तृपुरुषगताभिप्रायविशेषः, वेदे तु प्रयोक्तृपुरुषाभावात् लिङादिशब्दनिष्ठ एव स इत्येवम् अङ्गीक्रियते। अत एव शब्दनिष्ठव्यापारत्वात् शाब्दीभावना इत्युच्यते। यागहोमादिविषयकप्रवृत्तिहेतुत्वात् प्रवर्तना प्रेरणा इति चोच्यते।

**मूलम् - सैषा शाब्दीभावनाऽपि अंशत्रयविशिष्टा। तत्र पुरुषप्रवृत्तिरूपाऽऽर्थभावना भाव्यत्वेनान्वेति। अध्ययनावगतलिङादिकं करणत्वेनान्वेति। अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वेति। तथा च ''साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिवशाद् व्युत्पत्तिमन्तः पुरुषा अध्ययनगृहीतस्वाध्याय-गतलिङादिभिः प्राशस्त्यज्ञानसचिवैः यागाद्यर्थं स्वकर्त्तव्यत्वेन बुद्ध्वा यागादीन् अनुतिष्ठेयुः इति शाब्दीभावनाबोधः। अनुतिष्ठेयुः अनुष्ठानं कुर्युरित्यर्थः। अनुष्ठानं प्रवृत्तिः। तेन पुरुषप्रवृत्तेः शब्दभावनाभाव्यत्वम् अक्षतम्।''**

**व्याख्या** - इयं शाब्दीभावना अंशत्रयविशिष्टा भवति। यथा किं भावयेत्, केन भावयेत्, कथं भावयेत् चेति। तत्र पुरुषप्रवृत्तिरूपार्थभावना साध्यत्वेन अन्वेति। अध्ययनावगतलिङादिकं करणत्वेन अन्वेति। अर्थवादप्रतिपाद्य-

प्राशस्त्यज्ञानम् इतिकर्तव्यतात्वेन अन्वेति। अर्थात् शाब्दीभावनायां पुरुषप्रवृत्तिरूपायाः आर्थीभावनायाः भाव्यत्वेन (साध्यत्वेन) अन्वयो भवति, अध्यनेन अवगतानां लिङादीनां करणत्वेन (साधनत्वेन) अन्वयो भवति। अर्थवादवाक्यैः प्रतिपादितस्य प्राशस्त्यज्ञानस्य इतिकर्तव्यतात्वेन (कथम्भावरूपेण) अन्वयो भवति। तदा शाब्दीभावनायाः शाब्दबोधस्य स्वरूपम् इत्थं निष्पद्यते - अङ्गसहितस्य वेदस्य अध्ययनकर्तारः पुरुषाः व्याकरण-निघण्टु-निरुक्तादीनां साहाय्येन ''अस्य पदस्य अयमर्थः'' इति प्राप्तज्ञानाः सन्तः प्राशस्त्यज्ञानपूर्वकैः अध्ययनद्वारा विज्ञातस्वाध्याये स्थितैः लिङादिभिः यागादिकर्म स्वकर्तव्यमिति विज्ञाय तदनुष्ठानं कुर्युः। अर्थभावना हि अनुष्ठानशब्दार्थः। तेन सा आर्थीभावना शाब्दभावनायां साध्यत्वेन अन्वेति इति कथनमुचितमेव।

**मूलम् - इयं च शब्दभावना ज्योतिष्टोमादिप्रातिस्विकवाक्येषु स्वरूपेण प्रतीयमाना कर्तव्यत्वेन न प्रतीयते। अर्थभावनाया एव तेषु कर्तव्यत्वावगमात्, किन्तु ''स्वाध्यायोऽध्येतव्यः'' इति वाक्ये एव कर्तव्यत्वेन प्रतीयते। न च अत्र आर्थीभावनाया एव विधेयत्वमिति वाच्यम्। ''स्वाध्यायोऽध्येतव्यः'' इति वाक्यस्यार्थभावनाया एव सकलविधिवाक्यस्थशब्दभावनारूपत्वात्।**

**व्याख्या** - इयं शाब्दभावना ज्योतिष्टोमादिकर्मविधायकेषु भिन्नभिन्नेषु वाक्येषु यद्यपि स्वरूपेण प्रतीयते, तथापि सा कर्तव्यरूपेण न प्रतीयते। यतस्तेषु वाक्येषु कर्तव्यत्वेन आर्थभावनायाः एव बोधः भवति। कर्तव्यत्वावगमात् विधेयत्वावगमाद् इत्यर्थः। मीमांसाशास्त्रे भावनायाः एव विधेयत्वं, न तु यागादिकर्मणाम्। तेषां करणत्वेन अप्राधान्यात्। शाब्दभावनायाः शब्दवृत्तिव्यापाररूपत्वेन नित्यत्वेन च अनुष्ठानायोग्यत्वात्। आर्थभावनाया एव पुरुषवृत्तिव्यापाररूपत्वेन साक्षात् फलजनकत्वेनच विधेयत्वमित्येवंरूपेण कर्तव्यावगमादित्यर्थः। किन्तु शाब्दभावनायाः कर्तव्यत्वेन प्रतीतिः ''स्वाध्यायोऽध्येतव्यः'' इत्यस्मिन् वाक्ये एव भवति। अत्र इयं शङ्का - ''स्वाध्यायोऽध्येतव्यः'' इत्यस्मिन् वाक्येऽपि आर्थभावनैव विधेयास्ति। तत्र इदं समाधानं दीयते - ''स्वाध्यायोऽध्येतव्यः'' इति विधिवाक्यस्य विध्यर्थतव्यप्रत्ययवाच्या या शाब्दभावना, तस्यां स्वाध्यायपदवाच्यसकलविधिवाक्यस्थलिङादिवाच्यशब्दभावनासाध्यत्वेन अन्वयात्।

**मूलम् - तथाहि - अधिपूर्वकाद् ''इङ् अध्ययने'' इति धातोः कर्मणि तव्यप्रत्ययो विहितः। कर्म च स्वाध्यायः प्रधानम्, तत् संस्कारमध्ययनं गुणकर्म। व्रीहिसंस्कारः प्रोक्षणादिवत्। अध्ययनजनितग्रहणसंस्कार-विशिष्टस्वाध्यायस्य प्रयोजनाकाङ्क्षायां स्वाध्यायगततत्तल्लिङादिविशिष्टवाक्यसामर्थ्यलभ्यं यद् अनुष्ठानौपयिक-यागादिरूपार्थज्ञानं तदेव दृष्टत्वात्, तत्तत्कर्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयःसाधनत्वाच्च प्रयोजनम्। दृष्टफले सम्भवत्यदृष्टफलकल्पनाऽयोगात्।**

**व्याख्या** - ''अधि'' उपसर्गपूर्वकात् ''इङ् अध्ययने'' धातोः सकाशात् ''भावकर्मणोः'' इति सूत्रेण ''तव्य'' प्रत्ययो विहितोऽस्ति। अत्र कर्म ''स्वाध्यायः'', तदेव च प्रधानम्। तस्य स्वाध्यायस्य संस्कारकम् अध्ययनम् अस्ति। तच्च व्रीहिसंस्कारकं प्रोक्षणमिव गुणकर्म अस्ति। अध्ययनोत्पन्नेन स्वाध्यायग्रहणात्मकेन संस्कारेण युक्तस्य स्वाध्यायस्य अर्थात् अध्ययनजनितं ग्रहणं, तज्जन्यसंस्कारविशिष्टस्य स्वाध्यायस्य फलाकांक्षायां सत्यां स्वाध्यायनिष्ठैः तत्तल्लिङादिप्रत्ययविशिष्टवाक्यैः स्वसामर्थ्येन अनुष्ठानोपयोगियागादिरूपमर्थज्ञानं कार्यते, तदेवं स्वाध्यायस्य प्रयोजनमिति स्वीक्रियते। यतः तदेव प्रयोजनं दृष्टमस्ति, दृष्टत्वादेव तत्तत्कर्मणाम् अनुष्ठानद्वारा स्वर्गात्मकस्य अलौकिकस्य श्रेयसः साधनमिति स्वीक्रियते। अर्थज्ञानं यदि न भवेत् तर्हि कर्मानुष्ठानमपि न स्यात्।

**मूलम् - तथा च स्वाध्यायविधिनैव स्वाध्यायगतविधिवाक्यगतलिङादिप्रतिपादिताः सर्वाः शाब्दभावनाः अंशत्रयविशिष्टाः कर्त्तव्यत्वेन विधीयन्ते। साङ्गवेदाध्ययनेन व्युत्पन्नाः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङा-दिभिरर्थवादावगतप्राशस्त्यरूपाङ्गसचिवैः फलवद्यागादिकर्तव्यतां बुद्ध्वा यागादीन् अनुतिष्ठेयुरिति। अनुतिष्ठेयुः कुर्युरित्यर्थः। तत्र पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयात्, अध्ययनावगतलिङादेः करणत्वेनान्वयात् प्राशस्त्यज्ञानस्य इतिकर्तव्यतात्वेन अन्वयात् शाब्दभावनायाः अपि अंशत्रयवैशिष्ट्यम् अर्थभावनाया इवेष्टम्।**

**व्याख्या** - ''स्वाध्यायोऽध्येतव्यः'' इति विधिरेव स्वाध्यायात्मके वेदे स्थितेन विधिवाक्यगतलिङादिना प्रतीयमानाः अंशत्रयसहिताः समस्ताः शाब्दभावनाः कर्तव्यत्वेन रूपेण प्रतिपादयति। साङ्गवेदाध्ययनेन गृहीतपदपदार्थो व्युत्पन्नः पुरुषः अध्ययनद्वारा गृहीतस्वाध्यायगतैः लिङादिभिः अर्थवादवाक्यावगतप्राशस्त्यरूपाङ्गसहितैः ''प्रयोजनयुक्ता यागादयः कर्तव्याः'' इति विज्ञाय तेषाम् अनुष्ठानं कुर्यात्। अनया रीत्या शाब्दभावनायां पुरुषप्रवृत्तेः भाव्यत्वेन, अध्ययनेन ज्ञातस्य लिङादेः साधनत्वेन, अर्थवादवाक्यैः अवगतस्य प्राशस्त्यस्य इतिकर्तव्यतात्वेन अन्वयात् शाब्दभावनाऽपि आर्थभावना इव अंशत्रयमपेक्षते।

**मूलम् - तत्र समीहितस्वर्गादिभाव्यकत्वभानमपि विधिवशादेव। प्रवर्तनापरो विधिः यागादेः पुरुषार्थाऽसाधनत्वे तत्र पुरुषं प्रवर्तयितुं न शक्नोतीति स्वभाव्यपुरुषप्रवृत्तिविषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वम् आपादयति। अन्यथा स्वस्य प्रवर्त्तनात्वमेव न स्यात्। प्रवृत्तिहेतुव्यापारस्यैव प्रवर्त्तनात्वात्। लिङादिस्थले तु प्रवर्तनात्मकविधेरभावादर्थभावनायाः पुरुषार्थभाव्यत्वनियमो नास्ति।**

**व्याख्या** - आर्थभावनायां सर्वाभिलषितस्य स्वर्गस्य साध्यत्वेन प्रतीतिरपि विधिसामर्थ्येन एव भवति। यतो हि पुरुषार्थरूपाणां स्वर्गादीनां साधनानि यागादिकर्माणि न भवन्ति चेत् तत्र पुरुषं प्रवर्तयितुं प्रवर्तनारूपो विधिः समर्थो न भवेत्। स्वपदेन अत्र प्रवर्तना उच्यते। प्रवर्तनायाः प्रवृत्यनुकूलव्यापाररूपत्वात् स्वभाव्यायाः पुरुषप्रवृत्तेः विषयस्येति ज्ञेयम्। तस्मात् सः विधिः, स्वस्य पुरुषप्रवृत्तिरूपेण साध्येन सिद्धिं प्राप्यमाणा ज्योतिष्टोमादयो यागाः, सर्वाभिलषितस्वर्गादिफलानां साधानानि इति सूचयति। अन्यथा विधेः प्रेरणा परत्वमेव न स्यात्। प्रेरणैव विधेः स्वरूपम्। पुरुषप्रवृत्तिं प्रति हेतुभूतो यो व्यापारः स एव प्रवर्तना-प्रेरणाशब्देन वा उच्यते। अतः आर्थभावनायाः पुरुषार्थरूपेण स्वर्गादिसाध्यत्वेन भाव्यमेवेति नास्ति नियमः।

- **भावनालक्षणम्-**

**मूलम् - भावनात्वं नाम भवितुः प्रयोजकव्यापारत्वम् तत्र आर्थभावनायां भवितुः जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः। शाब्दभावनायामपि पुरुषप्रवृत्तिरूपस्य भवितुः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः।**

**व्याख्या** - भू-सत्तायाम् इति धातोः प्रेरणार्थे णिच्-प्रत्यये सति ल्युट्-प्रत्ययेन भावना इति शब्दः निष्पद्यते। यस्य अर्थो भवति - ''भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः'' इति। अर्थात् उत्पद्यमानस्य प्राप्यमाणस्य वा पदार्थस्य उत्पत्तौ प्राप्तौ वा साधनीभूतः प्रयोजकव्यापारो भावना इत्युच्यते। उत्पद्यमानस्य ओदनस्य प्राप्यमाणस्य वा स्वर्गस्य उत्पत्तौ प्राप्तौ वा साधनीभूतो व्यापारः आर्थभावनायां वर्तते इति कृत्वा लक्षणसङ्गतिः। शाब्दभावनायामपि स्वस्य पुरुषप्रवृत्तिरूपसाध्यस्य साधको व्यापारो भवत्येव तेन अत्रापि लक्षणसङ्गतिः।

## स्वाध्यायः

**१. रिक्तस्थानपूर्तिं कुरुत।**

(१) ......... अपौरुषेयं वाक्यं भवति। (वेदः, गीता, महाभारतम्)

(२) लिङ्लोडादिरूपः प्रत्ययः ......... विज्ञेयः। (नामरूपेण, अर्थवादरूपेण, विधिरूपेण)

(३) यजेत इत्यत्र ......... धातुः। (याजि, यजि, याग)

(४) ......... सर्वलकारसाधरणं भवति। (लिङ्त्वं, आख्यातत्वं, कर्मत्वं)

(५) यजमाननिष्ठव्यापारः ......... उच्यते। (शाब्दीभावना, आर्थीभावना, साध्याकाङ्क्षा)

(६) लिङ्त्वांशेन ......... भावना उच्यते। (शाब्दी, आर्थी, उभय)

(७) यागहोमादिविषयकप्रवृत्तिहेतुत्वात् प्रवर्तना ......... उच्यते। (भावना, प्रेरणा, प्रचोदना)

(८) ''स्वाध्यायोऽध्येतव्यः'' इत्यत्र स्वाध्यायशब्दस्य ......... अर्थः अस्ति। (अध्ययनम्, वेदः, आचार्यः)

(९) भावना ......... भवति। (एकविधा, द्विविधा, त्रिविधा)

(१०) मीमांसादर्शने यागस्वर्गयोः मध्ये ......... कल्प्यते। (धर्मः, अपूर्वं, अधर्मः)

**२. एकैकवाक्येन उत्तरं लिखत।**

(१) यजेत इत्यत्र कः प्रत्ययः?

(२) को नाम यागः?

(३) काभ्यां भावना उच्यते?

(४) का नाम भावना?

(५) क्रिया कस्मिन् क्षणे नश्यति?

(६) यागोत्पादकव्यापारविशेषः कतिविधः भवति?

(७) आर्थीभावनायाः साध्याकाङ्क्षायां किं साध्यत्वेन सम्बध्यते?

**३. द्वित्रवाक्यैःउत्तरं लिखत।**

(१) भावना कति अंशविशिष्टा भवति?

(२) साध्याकाङ्क्षां स्पष्टयत।

(३) यजेत इत्यत्र तप्रत्त्ययस्य अंशद्वयं लिखत।

(४) वेदे विधिरूपः प्रत्ययः केन रूपेण विज्ञेयो भवति?

(५) किं नाम आख्यातत्वम्?

**४. टिप्पणीः लिखत।**

(१) साधनाकाङ्क्षा

(२) अपूर्वम्

(३) यागः

**५. निबन्धात्मकम् उत्तरं लिखत।**

(१) भावनालक्षणं विवृणुत

(२) शाब्दीभावतां लिखत

(३) आर्थीभावनां निबघ्नीत

●

# १२ नामधेयविचारः

**प्रस्तावना**

अखण्डोऽपि आम्नायः अर्थनिरूपणसौकर्याय-विधि-नामधेय-अर्थवाद-मन्त्रभेदेन चतुर्धा व्यभाजि पूर्वाचार्यैः। तत्र ''अज्ञातार्थज्ञापको वेदभागो विधिः'' इति लक्षण-विभागपुरस्सरं विधिं निरूप्य प्रकृतपाठे क्रमप्राप्तं नामधेयं विचारयति मीमांसाशिरोमणिः श्रीमान् कृष्णयज्वा।

**ज्योतिष्टोमादीनां नामत्त्वप्रतिपादनम्**

**मूलम् - ननु ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यत्र यागेन स्वर्गं भावयेत् इत्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वय इति चेत् - भावनाकरणत्वेनाभिमतयागनामत्वेनान्वयात् ''ज्योतिष्टोमनामकेन यागेन'' इति।**

**व्याख्या** - ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यस्मिन् वाक्ये ''यागेन स्वर्गं भावयेत्'' इति सामान्यः बोधो जायते। एवं तर्हि ज्योतिष्टोमपदस्य कुत्र कथञ्चान्वयः ? इति प्रश्नःउदेति। प्रश्नस्यास्य समाधानमित्थं क्रियते मीमांसाशास्त्रे। भावनायाः करणरूपः यो यागः तन्नामत्वेन ज्योतिष्टोमादिपदानां यागेन सह अभेदान्वयः अङ्गीक्रियते। तेन च ज्योतिष्टोमनामकयागद्वारा स्वर्गमाप्नुयात् इत्यर्थावबोधो जायते।

**मूलम् - ननु कथं तन्नामत्वमिति चेत् - ज्योतिराख्याः स्त्रिवृदादिस्तोमा अस्मिन्सन्तीति व्युत्पत्त्या। यागस्य त्रिवृदादिस्तोमसम्बन्धः केनावगम्यत इति चेत्, ''त्रिवृत् पञ्चदश सप्तदश स्तोमाः'' इति वाक्यान्तरेण, एतच्छब्दार्थस्य तत्सम्बन्धावगमात्। एवं शास्त्रोक्तैस्तत्प्रख्यादिभिः हेतुभिः तत्र तत्र नामत्वं बोध्यम्।**

**व्याख्या** - अत्रेऽयं पुनः शंङ्का - ज्योतिष्टोमपदस्य तन्नामत्त्वेन रूपेण यागेन साकं कथम् अभेदान्वयः भवति ? प्रश्नस्यास्य समाधानम् इथ्यं प्रदीयते पूर्वमीमांसाशास्त्रे। ''ज्योतिरादयः त्रिवृदादिस्तोमाः यस्मिन् यागे सन्ति स ज्योतिष्टोमः इति व्युत्पत्त्यनुसारं तन्नामत्वेन रूपेण ज्योतिष्टोमपदस्य अभेदान्वयः यागेन साकं भवति। तथापि यागस्य त्रिवृदादि स्तोमेनसह सम्बन्धोऽस्ति इत्येतादृशं ज्ञानं कथं जायत इति चेत् ? अत्रेऽदं समाधानम् - ''त्रिवृत् पञ्चदश सप्तदश एकविंशति ज्योतिंषि स्तोमाः यस्मिन् इति व्युत्पत्तेर्निमित्तम् अर्थवादः, तेनैवार्थवादवाक्येन त्रिवृत्-स्तोमयोः सम्बन्धः यागेन सह वर्तत इति बोधो जायते। इथ्यं पूर्वमीमांसाशास्त्रोक्तैः तत्प्रख्यादिहेतुभिः तत्तद्यागानां नामत्वं ज्ञातव्यमस्ति।

**नामधेयनिमित्तानि।**

**मूलम् - शास्त्रे हि तत्प्रख्य-तद्व्यपदेश-यौगिक-वाक्यभेदैश्चतुर्भिर्नामत्वं प्रतिपादितम्।**

**व्याख्या** - पूर्वमीमांसाशास्त्रानुसारं वैदिककर्मणां नामधेयेषु निमित्तानि तत्प्रख्यादिहेतवः चतुष्पकारकाः सन्ति, यैश्च तत्तत्कर्मणां नामत्वं प्रतिपाद्यते। यथा-तत्प्रख्यम् तद्व्यपदेशः, यौगिकम्, वाक्यभेदश्च।

**तत्प्रख्यन्यायेन नामत्वम्।**

**मूलम् - ''अग्निहोत्रं जुहोति'' इत्यत्र अग्निहोत्रशब्देन अग्निदेवतारूपो गुणो न विधीयते, ''अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति इति वाक्यविहितेनमन्त्रेण देवतायाः प्राप्तत्वात्। किन्तु अग्निप्रख्यापकं (अग्निप्रापकं) यच्छास्त्रान्तरं ''अग्निर्ज्योतिर्ज्योतिरग्निः इत्यादिकं तेन प्राप्तमग्निसम्बन्धं निमित्तीकृत्य अग्नये होत्रं होमोऽस्मिन् इति बहुव्रीहिणा अग्निहोत्रपदस्य होमनामधेयत्वम्। नच होमस्य प्रत्ययवाच्यार्थभावनायां करणत्वात् तन्नामत्वे ''अग्निहोत्रेण'' इति तृतीयास्यात्, ''ज्योतिष्टोमेन'' इतिवदिति वाच्यम्; द्वितीयाया एव लक्षणया करणार्थकत्वात्, ''नासादितं करणम्'' इति न्यायेन असाधितस्य करणत्वायोगात् अर्थात् प्राप्तहोमगतसाध्यत्वानुवादकेन वा द्वितीयोपपत्तेरिति तत्प्रख्यन्यायादत्र नामधेयत्वम्।**

**व्याख्या** - तत्प्रख्यन्यायेन नामत्वप्रतिपादनार्थम् इदं प्रसिद्धमुदाहरणमस्ति। यथा - ''अग्निहोत्रं जुहोति'' अस्मिन् स्थले अग्निहोत्रशब्देन अग्निदेवतारूपस्य गुणस्य विधानं कर्तुं न शक्यते, यतो हि तस्य विधानं पूर्वमेव ''अग्निर्ज्योतिः ज्योतिरग्निः स्वाहा'' सायं जुहोति, प्रातर्जुहोति ''इत्यादिमन्त्रैः कृतमस्ति। अपितु अग्निप्रख्यापकं अर्थात् अग्निदेवतायाः विधायकः ''अग्निर्ज्योतिः'' इति यो मन्त्रोऽस्ति, तेन प्राप्तामग्निदेवतां निमित्तीकृत्य ''अग्नये होत्रं होमोऽस्मिन्'' इति बहुव्रीहिसमासद्वारा ''अग्निहोत्रपदम्'' होमनामधेयं (होमसंज्ञकं) भवति। तथा च सूत्रम् - ''तत्प्रख्यं चान्यशास्त्रम्'' इति। तत्प्रख्यं - तस्य देवतारूपगुणस्य प्रकाशकं शास्त्रान्तरमस्ति, अतस्तत्र तस्य पुनर्विधाने अनुवादत्वापत्तेः, तस्मादग्निहोत्रपदं नामधेयमित्यर्थः। अत्रेऽयं शङ्का ''जुहोति'' इत्यत्र ति प्रत्ययवाच्या आर्थीभावनास्ति, तस्या अग्निहोत्रं करणमस्ति। अतः तन्नामत्वेन ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इतिवत् ''अग्निहोत्रं जुहोति'' इत्यत्र ''अग्निहोत्रेण'' इति तृतीया स्यात्। समाधानं तु-द्वितीयाविभक्तेः प्रयोगोऽत्र लक्षणया करणार्थे एव कृतोऽस्ति। अपि च ''नासाधितं करणम्'' इति न्यायेन असिद्धवस्तुनि करणत्वस्यापेक्षा नहि कर्तव्या, अतः शास्त्रान्तरेणप्राप्तं होमसाध्यकम् अग्निमनूद्य ''अग्निहोत्रं जुहोति'' इत्यत्र द्वितीयाविभक्तिरेव कृताऽस्ति। इच्चमत्र अग्निहोत्रपदस्य यत् होमनामधेयत्वं प्राप्तमस्ति तत् ''तत्प्रख्यन्यायेन सम्भवतीति बोध्यम्।''

**तद्व्यपदेशन्यायेन नामत्वम्।**

**मूलम् - ''श्येनेनाभिचरन् यजेत'' इत्यत्र श्येनपदं यागनामधेयम्, न तु यागाङ्गत्वेन श्येनपक्षिरूप-गुणविधिः। ''यथा ह वै श्येनो निपत्यादत्ते एवमेवायं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन इत्युपमानोपमेयव्यपदेशानुपपत्तिप्रसङ्गात्। श्येनपक्षी यथा पक्ष्यन्तरं निपत्यादत्ते एवमयमपि श्येननामककर्मविशेषो भ्रातृव्यं शत्रुं निपत्यादत्ते इति व्यपदेशः कर्मनामत्वपक्षे एव युज्यते। यागाङ्गतया श्येनपक्षिविधौ तु स्वस्य स्वेनैव उपमानोपमेयभावः स्यात्, स चायुक्तः। तत्माछ्येनतुल्यताव्यपदेशात् श्येनपदं कर्मनामधेयम्। ततश्च ''अभिचरन् शत्रुवधकामः श्येननामकेन यागेन अभिचारं भावयेत्'' इति वाक्यार्थः।**

**व्याख्या** - ''श्येनेनाभिचरन् यजेत'' इत्यादिस्थले ''श्येन'' पदं तद्व्यपदेशन्यायेन यागस्य नामधेयमस्ति। श्येनपक्षिरूपगुणस्य यागाङ्गत्वेन विधानं नास्ति। अन्यथा ''यथा वै श्येनो निपत्यादत्ते, एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन'' अर्थात् यथा-श्येनपक्षी क्षुद्रजन्तून् आक्रम्य तान् गृण्हाति, तद्वत् श्येनयागः द्विषन्तं शत्रुं आक्रम्य हठात् गृण्हाति, हन्तीति अर्थवादवाक्येन प्रतिपादितस्य उपमानोपमेयभावस्य अनुपपत्तिः स्यात्। ''व्यपदेशः'' इति साङ्केतिकोऽर्थः (उपमानोपमेयत्वभावः) कर्मणो नामधेयत्वे एव उपपद्यते। तेन व्यपदेशः = तद्व्यपदेशः, स यत्राऽस्ति तत् शास्त्रं तद्व्यपदेशम्। वि = विशेषः उपमानत्वम्, अपदेशः = वर्णनम्, संकीर्तनम्। एवञ्च उपमानद्वारा यत्र प्रकृतविषयो वर्ण्यते स व्यपदेशपदेनोच्यते। गुणविधिपक्षे एकस्मिन्नेव पदार्थे उपमानोपमेयत्वं भवेत्। अर्थात् स्वस्य स्वेनैव उपमानोपमेयभावः स्यात्। एवमभ्युपगमस्त्वनुचितः। यतो हि भिन्नयोरेव पदार्थयोरुपमानोपमेयभावो भवति। तस्मात् श्येनपक्षिणः सादृश्यवर्णनेन ''श्येनपदम्'' कर्मणो नामधेयमिति निर्णीयते। ततश्चेत्थं वाक्यार्थो निष्पद्यते - ''शत्रुं हिंसितुमिच्छुः पुरुषः श्येनसंज्ञकेन यागेन अभिचारं कुर्यात्'' इति।

**मूलम् - नन्वेवमप्यभिचारस्यापि वेदोक्तत्वात् आभिचारिके कर्मणि आस्तिकानामपि प्रवृत्तिः स्यादिति चेन्न। वेदोक्तोऽप्यभिचारो वेदविहितो न भवति फलत्वात्। ''फलं न विधेयम्, किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयम्'' इति सिद्धान्तात्। अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वम्।**

**व्याख्या** - ''नन्विति''। पुनः शङ्कते-यदि, अभिचारो वेदेन प्रतिपादितः तर्हि आभिचारिके कर्मणि आस्तिकानां, धार्मिकपुरुषाणामपि प्रवृत्तिर्भवेत्। तत्रोत्तरं दीयते - नैवमाशङ्कनीयम्। यतो हि यद्यपि वेदेन अभिचारः प्रतिपादितः तथापि न खलु तेन स विहितः यतः स अभिचारः फलरूपः।

अभिचारो हि फलम्। फलं कदापि विधेयं न भवति। किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयं भवति, इति सिद्धान्तः। अयं च सिद्धान्तः चतुर्थाध्यायस्य प्रथमाधिकरणे द्वितीयवरणके प्रतिपादितः (जै सू ४/१/१)। अतो वेदे अभिचारस्य विधानाभावेन स अभिचारः प्रत्यवायजनकः। तेन आभिचारिके कर्मणि धार्मिकाणां प्रवृत्तिर्न स्यात्।

**यौगिकनामधेयत्वम्।**

**मूलम् - एवम् - ''उद्भिदा यजेत पशुकामः'' इत्यत्र पशुरूपफलाय विधित्सितस्य यागस्य उद्भिद्पदं नामधेयम्, न तु यथाकथञ्चित् प्राप्तयागमुद्दिश्य तदङ्गतयोद्भिद्रूपगुणविधिः। दध्यादिवत् उद्भिन्नामकस्य गुणस्याप्रसिद्धत्वात्। यागे तु ''उद्भिद्यते फलमनेन'' इति योगसम्भवात् यागनामत्वम्।**

**व्याख्या** - नामत्वस्वीकारे तृतीयो हेतुः यौगिकः। तद्यथा - ''उद्भिदा यजेत पशुकामः'' इत्यस्मिन् वाक्ये पशुरूपफलमुद्दिश्य कर्तव्यत्वेन विहितस्य यागस्य ''उद्भिद्'' इति नामधेयत्वमस्ति। नहि ययाकथञ्चित् प्राप्तं यागमुद्दिश्य ''उद्भिद्रूपो'' गुणोऽत्र विधीयते। यतो हि दध्यादिद्रव्यपदार्थ इव ''उद्भिद्'' संज्ञकः कश्चन गुणो लोके प्रसिद्धोऽस्ति। यागनामधेयत्वपक्षे ''उद्भिद्यते फलमनेन स उद्भित्'' इति यौगिकव्युत्पत्या वाक्यार्थः सम्भवति। अतः उद्भिद् इति यागस्य नामधेयमिति स्वीकार्यम्। विधित्सितस्य विधातुमिष्टस्येति यावत्। ''गुणस्य अप्रसिद्धत्वात्'' - दधि-सोमादीनां द्रव्यवाचकत्वात् तद्विधायकं ''दध्ना जुहोति'' इत्यादिवाक्यं गुणविधायकमिति वक्तुं शक्यते, किन्तु उद्भित् पदस्य कस्यापि द्रव्यस्य वाचकत्वाभावात् तद्गुणविधायकमिति न वक्तुं शक्यते। यागनामधेयत्वस्वीकारे तु ''उद्भिद्यते प्रकाश्यते फलमनेन'' इति कृद्वृत्या यौगिकार्यसम्भवात् नामधेयत्वं युज्यते (प्रसिध्यति)।

**मूलम् - ननु ''उद्भिद्यते भूमिरनेन'' इति योगवशेन खनित्रादावप्युद्भिदः प्रयोगसम्भवात् खनित्रादिगुणविधिः किन्नस्यादिति चेन्न। एतादृशस्थले गुणविधिः क्वापि वक्तुं न शक्यते। विरुद्धत्रिकद्वयसमावेशाख्यदोषप्रसङ्गात्।**

**व्याख्या** - नन्विति। अत्रेऽयं शङ्का - ''येन भूमिः खन्यते स उद्भिद्'' इति यौगिकव्युत्पत्या ''उद्भित्'' शब्दस्य खनित्रवाचकत्वमपि सम्भवति। तेन प्रकृते खनित्रादिगुणस्य विधानं कथं न स्वीक्रियते? तत्रेऽदं समाधानम् - तथा वक्तुं न शक्यते। यतो हि तथाऽङ्गीकारे-परस्पर विरुद्धं त्रिकद्वयं अभ्युपगन्तव्यं भवेत्। ''विरुद्धत्रिकद्वय-समावेशाख्यदोषप्रसङ्गात्'' - विरुद्धं च तत् त्रिकं च विरुद्धत्रिकम्। तयोः द्वयं विरुद्धत्रिकद्वयम्। तस्य समावेशः इति आख्या (नाम) यस्य सः इति विरुद्धत्रिकद्वयसमावेशाख्यः, स चासौ दोषः तस्य प्रसङ्गात्। तथा च कारिका-
**प्राधान्यमनुवाद्यत्वमुद्देश्यत्वमिति त्रिकम्। गुणभावो विधेयत्वमुपादेयत्वमित्यपि॥**
**विरुद्धत्रिकविचारः।**

**मूलम् - तथाहि - ''उद्भिदा यजेत पशुकामः'' इत्यत्र मानान्तरेणाप्राप्तस्य यागस्यानुवादासम्भवात् पशुकर्मकभावनायां करणत्वेन यागो विधेयः - ''यागेन पशून् भावयेत्'' इति। ततश्य यागस्य विधेयत्वम्, फलं प्रति शेषतया प्रतीयमानत्वात् गुणत्वम्, ''शेषतया, अङ्गतयेत्यर्थः, फलसिध्यर्थं पुंसाऽनुष्ठीयमानत्वात् उपादेयत्वमिति विधेयत्व-गुणत्वोपादेयत्वात्मकमेकं त्रिकं यागे अस्ति। तथा यागोद्धेशेनोद्भिद्गुणविधौ विधित्सितगुणापेक्षया प्राधान्यम्, उद्धेश्यत्वम्, अनुवाद्यत्वञ्चेति द्वितीयं'' त्रिकम्। तदेतत् त्रिकद्वयं परस्परविरुद्धं एकस्मिन् यागे प्रसज्येत, अतो न गुणविधिः।**

**व्याख्या** - तथाहीति। विरुद्धत्रिकद्वयं यथा - ''उद्भिदा यजेत पशुकामः'' इत्यत्र प्रमाणान्तरेण अप्राप्तं यागमुद्दिश्य (यागमनूद्य) उद्भिद्रूपस्य गुणस्य विधानासम्भवात् पशुकर्मकभावनायां - पशवः कर्म (भाव्यं-साध्यं) यस्यां सा पशुकर्मिका, सा चासौ भावना च तस्याम्। पशुरूपं फलमेव साध्यं यस्यास्तादृशी या आर्थीभावना तस्यां ''यागस्य'' करणत्वेन विधानमवश्यं भवति। तेनायमर्थः सम्पन्नः - ''यागेन पशून् भावयेत् (सम्पादयेत्) इति। अतो यागे विधेयत्वं सम्पद्यते। तथैत फलं प्रति यागस्य अङ्गत्वेन (शेषतया) प्रतीयमानत्वात् तस्यैव गुणत्वमपि सम्पद्यते। तथैत पुरुषेण फलप्राप्त्यर्थं यागस्य अनुष्ठीयमानत्वात् तस्य (यागस्य) उपादेयत्वमपि सम्पद्यते। एवञ्च ''विधेयत्वम्'' - ''गुणत्वम्'' - उपादेयत्वम् चेचि एकं त्रिकं यागेऽस्ति। एतच्च यागविधिपक्षे सम्पन्नम्। अनन्तरं यागमुद्दिश्य ''उद्भिद्रूपगुणविधानपक्षे'' विधातुमिष्टस्य उद्भिद्रूपस्य गुणस्य अपेक्षया यागस्य प्राधान्यम्। तमेव यागमुद्दिश्य उद्भिद्रूपगुणविधानं भवतीति तस्मिन् यागे उद्धेश्यत्वमायाति। यागस्य च ज्ञानं प्रकारान्तरेण (वाक्यान्तरेण) सञ्जातम्, तस्यैव पुनःकथनं क्रियमाणमस्ति। इथ्थमनुवादकारणतः यागे अनुवाद्यत्वं सम्भवति। एवं यागे द्वितीयं त्रिकमप्यायाति। इदं परस्परविरुद्धं त्रिकद्वयं एकस्मिन्नेव यागे स्वीकर्तव्यं भवति। एवमेकस्मिन्नेव यागपदार्थे परस्परविरुद्धाधर्माः (विरुद्धत्रिकद्वयम्) स्वीकर्तव्याः भवेयुः, तेनात्र गुणविधिरिति वक्तुं न शक्यते।

**मूलम् - न च ''सोमेन यजेत'' इत्यत्र विरुद्धत्रिकं विनैव सोमशब्दस्य सोमवति यागे लक्षणामङ्गीकृत्य, ''सोमवतायागेनेष्टं भावयेत्'' इति सोमविशिष्टयागविधानाद् यथा सोमरूपगुणविधिः तद्वद् उद्भित्पदस्यापि मत्वर्थलक्षणया उद्भिद्विशिष्ट-यागविधानाद् अत्रोद्भिद् गुणविधिः स्यादिति वाच्यम्। सोमादौ गत्यन्तराभावान्मत्वर्थलक्षणया विशिष्टविध्यङ्गीकारात्, उद्भिदादौ गतिसम्भवाद्विशिष्टविध्यङ्गीकारायोगात्। तस्माद्योगवशादुद्भिदादीनां नामत्वम्।**

**व्याख्या** - न चेति। पुनरत्र शङ्कते - ''सोमेन यजेत'' इत्यत्र विरुद्धत्रिकद्वयापत्तिं विनैव ''सोम'' शब्दस्य ''सोमवति'' इति मत्वर्थे लक्षणांकृत्वा ''सोमलताविशिष्टेन यागेन इष्टं भावयेत्'' इति सोमविशिष्टयागस्य विधानात् यथा सोमरूपगुणस्य विधानं भवति तथैव ''उद्भिदा यजेत'' इत्यत्रापि ''उद्भित्'' पदस्यापि ''उद्भिद्वति'' इति मत्वर्थे लक्षणां कृत्वा ''उद्भिद्गुणविशिष्टेन यागेन पशून् भावयेत् इति उद्भिद्विशिष्टस्य यागस्य विधानात् उद्भिद् गुणस्य विधानं भवितुमर्हति न वा?'' इति चेत् नेऽयमुचिता शङ्का। यतो हि ''सोमादाविति सोमेन यजेत'' इत्यत्र विशिष्टविधानस्य अङ्गीकारं विना सोमस्य अन्वयं कर्तुमन्यः उपाय एव नास्ति। अतः तत्र मत्वर्थलक्षणां स्वीकृत्य विशिष्टविधिरङ्गीक्रियते भावनायां करणत्वेन सोमपदस्य अन्वयस्म्भवात् किन्तु ''उद्भिदा यजेत'' इत्यत्र ''उद्भित्'' पदस्य योगार्थं स्वीकृत्य यागभावनायां नामधेयत्वेन अन्वयसम्भवात् अत्र गत्यन्तरमस्ति तेनात्र विशिष्टविधानस्य असम्भवात् ''उद्भिद्रूपस्य'' गुणस्य विधानं भवितुं नार्हति। तस्मात् ''उद्भिद्यते फलम् अनेन इति व्युत्पत्या उद्भिदादयः शब्दाः यागस्य नामधेयमिति सिध्यन्ति।''

**''वाक्यभेदभयान्नामत्वम्।''**

**मूलम् - तथा - ''चित्रया यजेत पशुकामः'' इत्यत्र चित्रापदं प्राजापत्यनामधेयम्। ''दधि मधु धृतमापो धानास्तपण्डुलास्तत्संसृष्टं प्राजापत्यम्'' इति सामानाधिकरण्याद् यो दध्यादिद्रव्यषट्कस्य प्रजापतिदेवतासम्बन्धः श्रुतः, तेनानुमितो यागो विधीयते। विहितस्य यागस्य फलाकाङ्क्षायां ''चित्रया यजेत'' इति वाक्यं फलसम्बन्धविधायकम्, तत्र फलार्थत्वेन पुनर्विधिरिति तस्य प्राजापत्ययागस्य दध्यादि विचित्रद्रव्यकत्वात् चित्रापदं कर्मनामधेयम्, न तु ''अग्नीषोमीयं पशुमालभते'' इति वाक्यप्राप्तपशुयागं ''यजेत'' इत्यनूद्य चित्रत्वरूपगुणद्वयविधानम्। मानान्तरप्राप्तं कर्मोद्दिश्य तत्रानेकगुणविधाने वाक्यभेदात्। तदुक्तम् ''प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।'' इति मानान्तराप्राप्ते कर्मणि त्वेनेकदेवताऽष्टाकपाल-पुरोडाशामावास्या-पौर्णमास्याद्यनेकगुणविशिष्टो द्रव्यदेवतासम्बन्धेनानुमितो यागो विधीयते इति सिद्धान्तः। तदुक्तम् - ''अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः''। इति**

**व्याख्या** - तथेति। वाक्यभेदभयादत्र नामधेयत्वस्वीकार इति वक्तुमारभते - ''चित्रया यजेत पशुकामः'' इति वाक्ये ''चित्रापदम्'' वाक्यभेददोषभयेन प्राजापत्ययागस्य नामधेयं भवति। ''प्रजापतिः देवता अस्ति अस्य सः प्राजापत्यो यागः। ननु ''चित्रया'' इति वाक्ये ''यजेत'' पदेन केवलं यागस्य श्रवणं भवति, स यागः प्रजापतिदेवताक इति तु नोक्तम्। तर्हि ''प्राजापत्यनामधेयम् इति कुत उक्तम्? किन्तु नैतदुचितम्, यतो हि वाक्यान्तरेण अयं यागः प्रजापतिदेवताकः इति बोध्यते। यथा - ''दधि मधु धृतं पयो धानाउदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्'' इति वाक्यं तत्संसृष्टं प्राजापत्यम् इत्येतानि पदानि एकाधिकरणकानि (समानलिङ्ग - विभक्ति - वचनानि च) सन्ति, तेन दध्यादिद्रव्यैः सह प्रजापतिदेवतायाः यः सम्बन्धः ''तद्दितप्रत्ययद्वारा श्रूयते, तद्बलात् यागस्य अनुमानं भवति, अनुमितस्य च यागस्य विधानं ''दधि मधु धृतम्'' इति वाक्येन क्रियते। इत्थं विहितस्य यागस्य फलाकांक्षायां सत्यां ''चित्रया यजेत'' इति वाक्येन ''दधिमधु'' इति विहितयागभावनायां फलसम्बन्धस्य विधानं क्रियते। एवञ्च ''चित्रया यजेत'' इति वाक्यं फलसम्बन्धविधायकं भवति। फलसम्बन्धबोधनार्थम् अनूदितस्य प्राजापत्ययागस्य दध्यादिचित्र - विचित्रद्रव्यैः साध्यत्वात् स यागः ''चित्रा'' संज्ञया उच्यते। अत्र शङ्कते - अग्नीषोमीयं पशुमालभेत इत्यनेन वाक्येन प्राप्तं यागं ''चित्रया यजेत'' इति वाक्यस्य ''यजेत'' इति पदेन अनूद्य तेनैव वाक्येन ''चित्रत्व'' स्त्रीत्व रूपगुणद्वयस्य विधानं कुतो न क्रियते? तत्र समाधीयते - ''मानान्तरप्राप्तमिति''। प्रमाणान्तरेण प्राप्तं यागमुद्दिश्य अनेकगुणविधाने सति ''वाक्यभेददोषः''

प्राप्नोति। अर्थात् पृथक् पृथक् वाक्यैः पृथक् पृथक् गुणाः वक्तव्या भवेयुः। अत्र वार्तिकप्रमाणमुपन्यस्यते – ''प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः''। अन्यप्रमाणेन विज्ञाते कर्मणि अनेके गुणा विधातुं न शक्यन्ते। यत्र पुनः केनापि अन्येन प्रमाणेन कर्मणः प्राप्तिः नास्ति, तादृशस्य कर्मणः अनेकगुणविशिष्टत्वेन विधानं कर्तुं शक्यते। तदानीं वाक्यभेदो न भवति। यथा ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति'' इति वाक्ये अष्टसु कपालेषु संस्कृताऽष्टाकपालपुरोडाश-अमावास्या-पौर्णमासी-कालादिगुणैर्युक्तस्य तथा द्रव्य-देवतासम्बन्धेन कल्पितस्य यागस्य विधानं वाक्यभेदं विनैव भवितुमर्हति। अत्र वार्तिकोक्तिं प्रमाणयति-

''**अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः**'' इति। प्रमाणान्तरेण अज्ञातस्य कर्मणः अनेकगुणविशिष्टत्वेन विधानं कर्तुं शक्यते ''एकयत्नतः'' एकयैव भावनयेति यावत्।

**मूलम् - अथ-यथा ''पशुना यजेत'' इत्यत्र मानान्तरप्राप्तयागमुद्दिश्य तदङ्गतया ''पशुना'' इत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसंख्यानां त्रयाणां वाक्यभेदं विनैव विधिरङ्गीकृतः, तद्वदत्राप्येकपदोपात्त चित्रात्वस्त्रीत्वविशेषित-पशुद्रव्यकारकस्य विधानान्न वाक्यभेदः। अत एव तत्र विधेयस्य पशोरुपादेयत्वात् तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमित्येकेनैव पशुना यष्टव्यम्, ''ग्रहं सम्मार्ष्टि'' इत्यत्र उद्देश्यगतत्वादेकत्वमविवक्षितमिति सिद्धान्तप्रवादः कथम्? ''ग्रहं सम्मार्ष्टि'' इत्यत्र ''ग्रहम्'' इति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात् प्रयोजनवत्वाच्च प्राधान्यं गम्यते, सम्मार्गस्तु ग्रहं प्रति गुणभूतः। ''प्रतिप्रधानं गुण आवर्तनीयः'' इति न्यायाद् ''यावन्तो ग्रहास्तेषां सर्वेषां सम्मार्गः'' इति निश्चये सति, ''कति ग्रहाः सम्मार्जनीयाः'' इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितम्। यद्युच्येत - ''नेदमुद्देश्यगतं किन्तु स्वयं विधेयम्'' ''ग्रहं सम्मृज्याद् यं सम्मृज्यात्तच्चैकम्'' इति। तथा सति विधेयभेदाद्वाक्यभेदः स्यात्। तथा बुभुत्साया अभावात् विधानाऽयोगाच्चोद्देश्यगतासख्या न विवक्षिता (पू.मी.अ.३ पा.२ अधि ७) उद्देश्यगतमपि विशेषणं किञ्चिद्विवक्षितं यस्य विशेषणस्य विवक्षां विना उद्देश्यप्रतीतिर्न पर्यवस्यति। यथा - तत्रैव ग्रहत्वं विवक्षितम्। तद्विवक्षां विना उद्देश्यस्वरूपस्य ज्ञातुमशक्यत्वात्। तेन ग्रहजातीयसाधनक सोमयागापूर्वार्थत्वाच्चमसेषु न सम्मार्ग इति स्थित्। (पू.मी.अ.३ पा-१२ अधि १)।**

**व्याख्या** - अथ यथेति। अत्र पुनः शङ्कते यथा - ''पशुना यजेत'' इत्यत्र ''अग्नीषोमीयं पशुमालभेत'' इत्यनेन वाक्येन प्राप्तं यागमुद्दिश्य ''पशुना'' इत्येकेन पदेन यागाङ्गत्वेन प्राप्तस्य ''पशुद्रव्यस्य'', तल्लिङ्गस्य ''पुंस्त्वस्य'', तत्संख्याया ''एकत्वस्य'' चेति त्रयाणां पदार्थानां विधानं वाक्यभेदं विनैव स्वीक्रियते, तथैव ''चित्रया यजेत पशुकामः'' इत्यत्र ''चित्रया'' इत्येकेन पदेन प्राप्तस्य ''चित्रत्व-स्त्रीत्व विशिष्टस्य पशुद्रव्यरूपस्यैकस्य कारकस्य विधाने कृते सति वाक्यभेदो न स्यात्।'' अत्रापि ''यागभाव्यका चित्रवर्णस्त्रीपशुकरणिका भावनाविधिविषयः'' इति शाब्दबोधो ज्ञेयः। ''अतएवेति''। संख्यायाः पशोर्विशेषणत्वेन विधानादेव ''पशुना यजेत'' इत्यत्र विधेयस्य पशोरुपादेयत्वेन तत्र विद्यमानं यत् ''एकत्वं'' तत् यागाङ्गत्वेन विवक्षितं भवति। तस्मात् कारणात् एकेनैवपशुना यागः कर्तव्यः'' इति निर्णीयते। ननु ''एकत्वं कदा अविवक्षितं भवति? तत्प्रदर्शयति'' ग्रहं सम्मार्ष्टीति। ''ग्रहं-सम्मार्ष्टी'' इत्यत्र ''ग्रहम्'' इति पदस्य द्वितीयान्तत्वात् तत् ''उद्देश्यम्'' अस्ति। यतः यत् ईप्सिततमं भवति तदुद्देश्यम् इति नियमः। होमस्य अनुष्ठानार्थं ग्रहसंज्ञकस्य पात्रस्य ''ग्रहैर्जुहोति'' इति वाक्येन विहितत्वात् होमार्थं तत् पात्रम् अत्यावश्यकम्, अत एव तदीप्सिततममस्ति। ईप्सिततमत्वादेव तस्य प्राधान्यम्। यतो हि ''यत् सप्रयोजनं तत्प्रधानमिति'' प्रसिद्धमेव। एवं च ग्रहस्य उद्देश्यभूतत्वात् ग्रहगतमेकत्वमविवक्षितं भवति इति सिद्धान्तः। यदा च सप्रयोजनत्वाद् ग्रहस्य प्राधान्यम् तदा सम्मार्जनं ग्रहम्प्रति गौणं भवति। तेन ''प्रति प्रधानं गुण आवर्तनीयः'' इति नियमानुसारं ''यावन्तो ग्रहाः'' तेषां सर्वेषां सम्मार्जनं कर्तव्यम् इति निर्णीयते। तदा ''कति ग्रहाः सम्मार्जनीयाः इति जिज्ञासाया अनुत्पद्यमानत्वात् उद्देश्यभूतो यो ग्रहः, तद्गतमेकत्वं श्रुतमपि, विवक्षितं न भवति। तत्र पुनः शङ्कते - ''यदुच्यते'' इति। ननु-उद्देश्यभूतो यो ग्रहः तद्गतमेकत्वं श्रुतमपि अविवक्षितं भवति इति यद्यपि उच्यते तथापि एवं वक्तुं शक्यते यत् ''एकत्वम्'' उद्देश्यगतं नास्ति, तत्तु स्वत एव विधेयमस्ति। तथाहि - ''ग्रहं सम्मृज्यात् यं सम्मृज्यात् तं चैकम्'' इति। अर्थात् ग्रहस्य

सम्मार्जनं कर्तव्यम्, यस्य सम्मार्जनं कर्तुं योग्यं सः एको भवतु इति। ''किन्तु नेदमुचितम्''। यतो हि एवमुक्ते सति ''सम्मार्जनम्'' एकत्वम् चेत्युभयं विधेयं भवेत्। एवं च उभयोर्विधानेसति ''वाक्यभेदः'' स्यात्। ''एकेनैव वाक्येन द्वयोर्विधाने सति वाक्यभेदः'' इति नियमो वर्तते। किञ्च आकांक्षानुसारेण विधानं भवति इति तथ्येन प्रकृतस्थले ''कति ग्रहाः सम्मार्जनीयाः'' इति आकांक्षैव नोदेति। अतः उद्देश्यभूतस्य ग्रहस्य विशेषणभूता या एकत्वसंख्या सा न विवक्ष्यते।

तथापि क्वचित् उद्देश्यगतस्य विशेषणस्य विवक्षाऽपि कर्तव्या भवति। अन्यथा उद्देश्यस्य प्रतीतिरेव न भवेत्। यथा - ''ग्रहं सम्मार्ष्टि'' इत्यत्रैव ग्रहविशेषणभूतस्य ''ग्रहत्वस्य'' विवक्षा क्रियते। यदि ग्रहत्वस्य विवक्षा न क्रियते तर्हि उद्देश्यस्य स्वरूपमेव अनवगतं स्यात्। अतो ग्रहत्वं विवक्ष्यते। तेन उद्देश्यभूतग्रहप्रतीति-सम्पादकस्य विशेषणस्य विवक्षितत्वात् साधनभूतेन ग्रहेण साध्यभूतः सोमयागः अनुष्ठितश्चेत् तस्मात् अपूर्वं समुत्पद्येत। तस्माद्ग्रहाणामेवसर्वेषां सम्मार्जनं कर्तव्यमिति निर्णीयते। एवञ्च ''ग्रहपात्राणामेव सम्मार्जनमनुष्ठेयम्। न चमसपात्राणामिति आकरग्रन्थेषु स्थितम्। सोमरसाधारभूतानि विशिष्टाकाराणि कानिचित् पात्राणि ''ग्रह'' शब्देन, कानिचित् ''चमस'' शब्देन च उच्यन्ते।

**मूलम् - ''पशुना यजेत'' इत्यत्र तु यागं प्रति पशुर्विधेयत्वाद् गुणभूतः, प्रतिगुणं प्रधानावृत्तिर्नास्तीति कियद्भिः पशुभिः यागः कर्तव्य इत्याकाङ्क्षायाम् एकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितम्। बुभुत्सितत्वात् (पू.मी.अ.४ पा. २ अधि ५)**

**व्याख्या** - ''पशुनेति''। ''पशुना यजेत'' इत्यत्र यागमुद्दिश्य पशोर्विधेयत्वाद् पशुः गुणभूतः अस्ति। उद्देश्यभूतं वस्तु सर्वदा प्रधानम्, विधेयभूतं च वस्तु सर्वदा अप्रधानम् भवतीति नियमः। अत्र गुणानुरोधेन प्रधानस्य आवृत्तिरनुचितेति कृत्वा। ''कियद्भिः पशुभिर्यागः कर्तव्यः'' इत्याकाङ्क्षायां सत्यां ''पशुना'' इत्येकवचनेन प्रतीयमानं यद् विधेयगतमेकत्वं, तदेव विवक्षितं भवति। तस्यैव जिज्ञासितत्वात्।

**मूलम् - किञ्च लिङ्गसंख्या विशेषितस्य पशुद्रव्यरूपकारकस्य एकपदोपात्तस्य विधेयत्वात् विधेयपशुद्वारा तद्गतलिङ्गसंख्यादेरपि क्रियाङ्गत्वाद् एकत्वं विवक्षितम्। अथवा तृतीयया विभक्त्या अभिहितयोर्लिङ्गसंख्ययोः विभक्त्यभिहितया करणकारकशक्त्या - आत्मसात्कृतयोः प्रातिपदिकार्थपशुद्रव्येण सम्बन्धमनादृत्य तद्वदेव साक्षात् क्रियाङ्गत्वेन विधाने सति पश्चादरुणैकहायनीन्यायेन परस्परमन्वयः - यागाङ्गत्वेन विहितो यः पशुः स एकः पुमांश्चेति।**

**व्याख्या** - अपरं कारणमिदमपि अस्ति - लिङ्गेन संख्यया च विशिष्टस्य एकपदोपात्तस्य पशुद्रव्यरूपकारकस्य विधानं वाक्यभेदं विनैव कर्तुं शक्यम्। तेन विधेयभूतस्य पशोः यागक्रियाङ्गत्वात्, पशुगते लिङ्गसंख्येऽपि यागक्रियायामङ्गभूते स्तः। अत एव विधेयपशुवर्तिनी या एकत्वसंख्या सा विवक्षिता अस्ति। पुनः प्रकारान्तरेणाऽपि तदेव बोधयितुं ''अथवेति''। अथवा ''पशुना'' इति पदे या तृतीयाविभक्तिः, तया लिङ्गसंख्ये अभिहिते भवतः। या च करणकारकस्य शक्तिः साऽपि तृतीयाविभक्त्या अभिहिता भवति। सा च करणकारकशक्तिः लिङ्गं संख्यां च स्वाधीने करोति। एतादृशयोः लिङ्गसंख्ययोः प्रातिपदिकार्थभूतेन पशुद्रव्येण सह सम्बन्धो न क्रियते। अपितु साक्षात् यागक्रियाङ्गत्वात् प्रातिपदिकार्थस्य भावनायां यथा अन्वयो भवति, तथैव लिङ्गसंख्ययोरपि साक्षात् यागक्रियाङ्गत्वेन विधानात् अनन्तरं ''अरुणैकहायनीन्यायेन'' प्रातिपदिकार्थ विभक्त्यर्थयोः (पशुद्रव्य-लिङ्गसंख्ययोश्च) परस्परमन्वयो भवति। तथाहि - ''यागाङ्गत्वेन विहितो यः पशुः स एकः पुमांश्च भाव्यः इति।''

**मूलम् - यथा - ''अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति'' इत्यत्र कारकाणां क्रियान्वय-नियमात् करणविभक्तिभिरारुण्यपिङ्गाक्षित्वादीनां चतुर्णां परस्परमनन्वितानामेव सोमक्रयणाङ्गत्वेन अन्वये सति आरुण्यादेर्गुणस्यामूर्तस्य स्वतः क्रियासाधनत्वायोगात् क्रियासाधनैकहायनीगोपरिच्छेदकत्वेन पश्चात् परस्परं पार्ष्णिकान्वयः - या एकहायनी गौः सा पिङ्गाक्षी अरुणेति, तद्वत्। (पू.मी.अ.३ पा-१ अधि-६)**

**व्याख्या** – सम्प्रति अरुणैकहायनीन्यायस्य विवरणं कर्तुम् आरभते। यथा – ''अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति ''इत्यत्र'' कारकाणां क्रियया सह अन्वयः अवश्यं भवत्येव इति नियमस्य विद्यमानत्वात् प्रथमतः आरुण्यस्य, पिङ्गाक्षीत्वस्य एकहायनीत्वस्य चेत्येषां परस्परं सम्बन्धं अकृत्वा सर्वेषामेषां सोमक्रयणाङ्गत्वेन भावनायामन्वयः क्रियते। तदनन्तरम् आरुण्यादीनाममूर्तानां गुणानां क्रयणक्रियायामनुपयोगात् क्रयणक्रियोपयोगिन्या एकहायन्याः गोः करणत्वेन अन्वये कृते सति तस्याः गोः आरुण्यादिगुणानाञ्च विशेषण-विशेष्यभावेन परस्परमन्वयो भवति।

तथा हि – ''या एकहायनी गौः सा पिङ्गाक्षी अरुणाच भाव्या'' इति। मूले – ''पार्ष्णिकान्वयः'' इत्युक्तम्। तत्र पृष्ठे भवः पार्ष्ठिकः स चासौ अन्वयश्च इति विग्रहः। अनेन तस्यान्वयस्य पश्चाद्भाविता सूच्यते। तथैवात्रापि विज्ञेयम्।

**मूलम् – तदेवमुद्देश्यगतविशेषणमविवक्षितम्, उपादेयगतं विवक्षितमिति स्थितम्।**

**एवञ्च चित्रापदेन चित्रत्वस्त्रीत्वोभयविशेषितपशुकारकस्य यजेतेतिपदानूदितेऽग्नीषोमीयपशुयागे विधातुं शक्यत्वात् कथं नामत्वमिति चेन्न।**

**व्याख्या** – ''तदेवमिति''। एतावता विवेचनेनेदं स्पष्टं यत् उद्देश्यगतं विशेषणम् अविवक्षितं भवति। विधेयगतं च विशेषणं विवक्षितं भवति। तेन – ''चित्रया यजेत पशुकामः'' इत्यत्र चित्रापदेन चित्रत्वस्त्रीत्वेत्युभाभ्यां गुणाभ्यां सहितस्य पशुरूपस्य कारकस्य यजेतेति पदेन अग्नीषोमीयपशुयागमनूद्य वाक्यभेदं विनैव विधानं कर्तुं शक्यत्वात् चित्रापदस्य यागनामधेयत्वं कथम्? इति शङ्का नोचिता।

**मूलम् – तथा सति प्रकृतस्य प्राजापत्ययागस्य फलसम्बन्धाकाङ्क्षस्य हानम्, अप्रकृतस्य अग्नीषोमीययागस्य कल्पना च स्यात्। तद्द्वयमयुक्तम्। तस्माच्चित्रापदं कर्मनामधेयम्। एवं तत्प्रख्यादिभिरन्यतमेन सर्वत्र कर्मनामत्वमूह्यम्।**

**व्याख्या** – तथेति। शङ्काकर्तुरनुसारेण यदि क्रियते तर्हि प्रकरणेन उपस्थितस्य फलसम्बन्धमाकांक्षमाणस्य ''प्राजापत्यसंज्ञकस्य'' यागस्य परित्यागः कर्तव्यो भवेत्। अनुपस्थितस्य च अग्नीषोमीयपशुयागस्य कल्पना कर्तव्या भवेत्। किन्तु इदं द्वयमपि (प्रकृतस्य यागस्य त्यागः, अप्रकृतस्य च यागस्य कल्पनम्) अनुचितमस्ति। तस्मात् ''चित्रापदं'' यागक्रियाया नामर्थयमित्येव स्वीकर्तुमुचितमस्ति।

एवं (१) तत्प्रख्य, (२) तद्व्यपदेश, (३) यौगिक (४) वाक्यभेदानां मध्ये किमपि एकम्प्रमाणं यदि निमित्तमस्ति तर्हि तद्वशात् तत्पदं कर्मनामधेयं भवतीति सिद्धान्तः स्थिरो भवति। अनया रीत्या ग्रन्थारम्भात् एतावत्पर्यन्तं विधिवाक्यस्य प्रामाण्यं विचारितमस्ति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) मीमांसाशास्त्रे ......... नामत्वं प्रतिपादितम्। (त्रिभिः, चतुर्भिः, पञ्चभिः)

(२) अग्निहोत्रशब्देन अग्निदेवतारूपो ......... न विधीयते। (कर्म, गुणो, द्रव्यम्)

(३) ''अग्निहोत्रं जुहोति'' इत्यत्र नामधेयत्वे ......... निमित्तमस्ति। (यौगिकम्, तत्प्रख्यं, तद्व्यपदेशः)

(४) वेदोक्तोऽप्यभिचारो वेदविहितो न भवति .........। (गुणत्वात्, फलत्वात्, साध्यत्वात्)

(५) ''श्येनेनाभिचरन् यजेत'' इत्यत्र नामधेयत्वे किं निमित्तम्? (वाक्यभेदः, तत्प्रख्यम्, तद्व्यपदेशः)

(६) यागे तु ''उद्भिद्यते फलमनेन'' इति ......... यागनामत्वम्। (साध्यसम्भवात्, योगसम्भवात्, गुणसम्भवात्)

(७) सोमादौ ......... अभावात् मत्वर्थलक्षणाङ्गीकृता। (गति, गत्यन्तर, प्रमाणान्तर)

(८) दध्यादि विचित्रद्रव्यवाचकत्वात् ......... कर्मनामधेयम्। (अग्निपदं, श्येनपदं, चित्रापदं)

(९) ''प्राप्ते कर्मणि नानेको विधातुं शक्यते .........''। (द्रव्यं, गुणः, अङ्गम्)

(१०) ''प्रतिप्रधानं ......... आवर्तनीयः।'' (कर्म, अङ्गम्, गुणः)

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) उद्देश्यगतत्वादेकत्वं विवक्षितं न वा?

(२) ज्योतिष्टोमपदस्य कथमन्वयः?

(३) ज्योतिष्टोमपदस्य व्युत्पत्तिः का?

(४) नामधेयत्वस्वीकरे हेतवः के?

(५) ''अग्निहोत्रं जुहोति'' इत्यत्र अग्निप्रख्यापकं शास्त्रान्तरं किम्?

(६) उद्भिदादौ गुणविधिस्वीकारे कः दोषः?

(७) ''चित्रया यजेत पशुकामः'' इत्यत्र चित्रापदं कस्य नामधेयम्?

**३. द्वित्रवाक्यैः उत्तराणि लिखत।**

(१) ''अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति'' इत्यत्र कथमन्वयः?

(२) ''ज्योतिष्टोमादिपदानां कथं नामधेत्वम्?''

(३) ''उद्भिदायजेत पशुकामः'' इत्यत्र गुणविधिः किमर्थं न सम्भवति?

(४) ''सोमेन यजेत'' इत्यत्र कथं विशिष्टविधिः सम्भवति?

(५) ''प्रतिप्रधानं गुण आवर्तनीयः इति न्यायस्य कोऽभिप्रायः?''

**४. टिप्पणीं लिखत।**

(१) ''प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।''

(२) ''वेदोक्तोऽप्यभिचारो वेदविहितो न भवति फलत्वात्।''

(३) ''पशुना यजेत'' विवृणुत।

**५. निबन्धात्मकमुत्तरं लिखत।**

(१) ''चित्रया यजेत पशुकामः'' इत्यत्र नामधेयत्वे हेतुं प्रतिपादयत।

(२) ''ग्रहं सम्मार्ष्टि'' इत्यत्र ग्रहगतमेकत्वं विवक्षितं न वेति विचारयत।

(३) ''श्येनेनाभिचरन् यजेत'' इत्यत्र केन हेतुना नामधेयत्वं स्वीकृतम्?

●

# १३ अर्थवादविचारः

**प्रस्तावना**

विधिवाक्यनिरूपणानन्तरं प्रसङ्गवशात् विधिशेषरूपस्य अर्थवादस्य निरूपणं करोति गन्थकारः। तत्र प्राशस्त्य-निन्दान्यतरपरंवाक्यम् अर्थवादः। अर्थो नाम यागादिविषयः। अर्थात् यागादिविषयस्य यत्र प्राशस्त्यरूपो निन्दारूपो वा वादः प्रवर्तते सः अर्थवादः इति वक्तुं शक्यते। अर्थवादवाक्यानि हि इदमीदृशं इत्येवं विधिवाक्यसिद्धं कञ्चनार्थविशेषम् अवबोधयन्ति।

**अर्थवादप्रामाण्यविचारः**

**मूलम् - अर्थवादानान्तु स्वार्थपरत्वे प्रयोजनाभावात् अध्ययनविधिवशेन फलवदर्थज्ञानार्थत्वस्य-आवश्यकत्वात् विधेयगतप्राशस्त्य प्रतिपादनद्वारा विध्येकवाक्यतया प्रामाण्यम्।**

**व्याख्या** - ''अर्थवादानामिति''। इदानीम् अर्थवादवाक्यानि अधिकृत्य विचारः क्रियते - यदि अर्थवाद-वाक्यानि स्वार्थप्रतिपादकानि अभ्युपगम्यन्ते तर्हि तानि निष्प्रयोजकानि स्युः। अर्थात् तेभ्यः कस्यापि प्रवृत्तिः निवृत्तिर्वा न स्यात्। किञ्च अर्थवादवाक्यान्यपि स्वाध्यायान्तर्गतानि सन्ति। तेन ''स्वाध्यायोऽध्येतव्य'' इत्यध्ययनविधिः तान्यपि गृह्णाति। तेन अर्थवादवाक्येभ्यः उत्पद्यमानस्य अर्थज्ञानस्य सप्रयोजनता अभ्युपगन्तव्या भवति। अतः अर्थवादवाक्यानि विधिविहितस्य विधेयपदार्थस्य प्राशस्त्यं प्रतिपाद्य विधिवाक्यैः सह एकवाक्यतां लभन्ते। तेन विधिवाक्यैकवाक्यतावशात् अर्थवादवाक्यानि प्रमाणभूतानि भवन्ति।

**अर्थवादवाक्यानां भेदाः तदुदाहरणानि च।**

**मूलम् - स चतुर्विधः - निन्दा-प्रशंसा-परकृति-पुराकल्पभेदात्।**

**तत्र निन्दाऽर्थवादो यथा - असत्रं वा एतद् यद्च्छन्दोमम् अश्रुजं हि रजतं, यो बर्हिषि रजतं ददाति पुरास्य संवत्सराद् गृहे रुदन्ति इत्यादिः।**

**प्रशंसा यथा - ''शोभतेऽस्य मुखं य एवं वेद'' वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति इत्यादिः। परेण महता पुरुषेणेदं कर्म कृतमिति प्रतिपादकोऽर्थवादः परकृतिः, यथा - ''अग्निर्वा अकामयत'' इत्यादिः।**

**परवक्तृकार्थादिप्रतिपादकः पुराकल्पः, यथा - ''तमशपद् धिया धिया त्वा वध्यासुः'' इत्यादिः।**

**अर्थवादवाक्यानांभेदाः**

↓

निन्दार्थवादः ↓ प्रशंसावादः ↓ परकृत्यर्थवादः ↓ पुराकल्पार्थवादः

**व्याख्या** - अर्थवादवाक्यानि चतुर्विधानि भवन्ति। (१) निन्दार्थवादः (२) प्रशंसार्थवादः (३) परकृत्यर्थवादः (४) पुराकल्पार्थवादश्च।

**( १ ) निन्दार्थवादः** - चतुष्प्रकारकेषु अर्थवादेषु प्रथमतः निन्दारूपः अर्थवादः निरूपितोऽस्ति। ''असत्रं वा एतद् यत् अच्छन्दोमम्'' अर्थात् तत् सत्रं सत्रं नोच्यते यस्मिन् ''छन्दोमस्तोम'' मन्त्राणां गानं न भवति। अनेन प्रकारेणाऽत्र निन्दारूपेण अर्थवादवाक्येन छन्दोमयस्तोमरहितस्य यज्ञस्य निन्दा कृताऽस्ति। द्वितीयमुदाहरणम् - ''अश्रुजं हि रजतम्''

इत्यादि वाक्यम्। अर्थात् रजतम् अश्रुप्रभवमस्ति। यतो हि अग्रिमं कथनमस्ति – ''यो बर्हिषि ददाति, पुरास्य संवत्सराद् गृहे रुदन्ति'' अर्थात् यो यजमानः बर्हिर्नामकयागे रजतदानं करोति तस्य गृहे संवत्सरात्पूर्वं रोदनं भविष्यतीति। एवं प्रकारेण ''यो बर्हिषि'' इत्यादि वाक्यद्वारा रजतदानस्य निन्दा अवगम्यते।

**(२) प्रशंसावादः** – प्रशंसारूपस्य अर्थवादस्य द्वितीयः प्रकारोऽस्ति यथा – ''शोभतेऽस्यमुखं य एवं वेद'' अर्थात् यो मनुष्यः वेदं जानाति तस्य मुखं – सुशोभितं (तेजस्वी) भवति। अनेन वाक्येन वेद-शास्त्राणामध्येतुः पुरुषस्य प्रशंसा प्रतीयते। द्वितीयमुदाहरणम् – ''**वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति, स एवैनं भूतिं गमयति**'' इति। अर्थात् – वायुः शीघ्रगामी देवताऽस्ति, यो यजमानः वायुदेवताकेन श्वेतपशुद्रव्येण वायुं यजति सः प्रसन्नेन वायुना शीघ्रमेव ऐश्वर्यं प्राप्नोति। अनेन प्रकारेण उपर्युक्तार्थवादवाक्येन वायुदेवतायाः प्रशंसा कृताऽस्ति।

**(३) परकृतिरर्थवादस्तृतीयः** – ''केनचित् महापुरुषेण इदं कर्म कृतम्'' इत्येतादृशं वाक्यं परकृतिरुच्यते, अथवा यद् वाक्यं विशिष्टस्य जनस्य आचरणं वक्ति तत् परकृतिरूपमर्थवादवाक्यं भवति। यथा – ''अग्निर्वा अकामयत'' इत्यादि वाक्यम्। यस्याऽर्थो भवति – अग्निदेवस्य अभीप्सा जाता यदहं देवतानामन्नदाता भवेयम्। तदर्थं स एनं क्रतुं चकार, अन्नंचावाप। एवमेव यो मनुष्यः अग्निवत् मानवानामन्नदाताभवितुमिच्छति सः आग्नेयं पुरोडाशयागं कुर्यात् इत्यभिप्रायः। एवमग्निदेवतायाः कृतिरत्रोक्तेति परकृतिनामकः अर्थवादोऽस्ति।

**(४) पुराकल्पार्थवादः** – चतुर्थः अर्थवादेषु पुराकल्पोऽस्ति। यदन्यव्यक्तिद्वारा विज्ञापितमर्थं प्रतिपादयति तत् पुराकल्पनामकमर्थवादवाक्यं कथ्यते। परेण केनचिदुक्तस्य अर्थस्य प्रतिपादकमथवा पूर्वघटितस्य वृत्तस्य प्रतिपादकं वाक्यं ''पुराकल्प'' संज्ञकः अर्थवादः। तस्योदाहरणम् – ''देवासुराः संयत्ता आसन्। तमशपत् धिया धिया त्वा वध्यासुः'' इत्यादि वाक्यम्। अर्थात् – पुरातनकाले देवासुरयोः संग्रामः बभूव, तस्मिन् समये असुरेभ्यः भीताः देवाः जले आत्मानं गोपयामासुः। तत्रागतानामसुराणां परिप्रश्नेन जलस्थाः मस्त्याः अवोचन् – यदत्र जले देवता निर्मज्य स्थिता इति। तदा कृद्धा देवता तान् मत्स्यान् अशपन् यत् – ''मत्स्याः यत्र मानवानामक्षि-गोचराः भवन्ति तत्रैव भवतां वधो भविष्यतीति।'' यत्र मानवाः मत्स्यान् पश्येयुः तत्रैव मारयेयुरिति। एवं प्रकारेण वाक्येऽस्मिन् देवैः विज्ञापितस्य अर्थस्य, अथवा अनेककर्तृकस्य आख्यानस्य प्रतिपादनमस्तीति पुराकल्पनामकः अर्थवादः भवति।

**मूलम् – तत्र निन्दाऽर्थवादस्य विधेयान्यनिन्दाद्वारा विधेयप्राशस्त्यपरत्वम्। ''अश्रुजम्'' इत्यादिरजतनिन्दाद्वारा विधेयभूतरजतदाननिषेधप्राशस्त्यपरत्वे विरोधाभावात्। इतरेषां त्रयाणां साक्षात् प्राशस्त्यपरत्वमेव। ''वायुर्वै'' इत्यर्थवादस्य वायुः क्षिप्रगामित्वादतीव प्रशस्ता देवता, अतस्तद्दैवत्यं कर्म प्रशस्तमिति विधेयदेवतागत प्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम्।**

**व्याख्या** – ''तत्रेति''। उक्तेषु अर्थवादेषु इदं निन्दार्थवादवाक्यं विधेयपदार्थात् कस्यचिद् भिन्नस्य पदार्थस्य निन्दां कृत्वा विधेयपदार्थस्य प्रशंसां करोति। यथा – ''अश्रुजं हि रजतम्'' इत्यत्र रजतस्य निन्दां कृत्वा विधेयभूतस्य रजतदान निषेधस्य प्राशस्त्यं प्रकाशयति। अत्र वाक्ये एकस्यैव पदार्थस्य निन्दा-प्रशंसे नावगम्येते, तेन कोऽपि विरोधो नास्ति। एतदतिरिक्तानि अवशिष्टानि त्रीणि अर्थवादवाक्यानि विधेयपदार्थस्य प्रशंसा साक्षात् कुर्वन्ति। ''वायुर्वै क्षेपिष्ठा'' इत्यत्र वायुदेवता शीघ्रगमनकर्त्री, अतः सा अतीव प्रशस्ता। तस्मात् वायुदेवताकं कर्म प्रशस्तमस्ति। अनेन प्रकारेण विधेयकर्माङ्गभूतदेवतायाः प्राशस्त्यप्रतिपादनेन विधिवाक्येन सह अस्यार्थवादवाक्यस्य एकवाक्यता निष्पद्यते।

**मूलम् – ''अग्निर्वा अकामयत'' इत्यस्य अग्निदैवत्यो यागः पूर्वकाले अग्निना कृतत्वात् प्रशस्तः, आस्तिक्यादिदानीमप्यन्यैर्यजमानैरवश्यं कर्तव्य इति विधेयकर्मगतप्राशस्त्यद्वारा विध्येकवाक्यत्वम्। एवमन्यत्राप्यूह्यम्।**

**व्याख्या** - ''अग्निर्वा अकामयत'' इत्ययमर्थवादः परकृतिसंज्ञकः। यस्य यागस्य देवता ''अग्निः'' स्वयमस्ति, तादृशस्य यागस्य अनुष्ठानं पूर्वस्मिन् काले अग्निनैव स्वयं कृतमितिकृत्वा स यागः प्रशस्तोऽस्ति। अतः साम्प्रतमपि - यजमानेन सोऽवश्यमनुष्ठेयः। इति विधेयकर्मगतं प्राशस्त्यं प्रतिपाद्य अयं परकृत्यर्थवादो विधिवाक्येन सह एकवाक्यताम्प्राप्नोति। एवमेव यस्य विधेः सन्निधौ योऽर्थवादो भवेत् तस्य विधेयकर्मप्राशस्त्यद्वारा विध्येकवाक्यत्वं विज्ञेयम्।

**मूलम् - क्वचित् कार्यान्तरमप्यस्ति यथा ''अक्ताः शर्करा उपदधाति'' इतिविधौ ''अक्ता'' इति पदेन द्रवद्रव्यसामान्यं प्रतीयते। तच्च द्रव्यं किमिति सन्देहे ''तेजो वै घृतम्'' इत्यर्थवादाद् घृतमिति निश्चीयते इति ''तेजो वै घृतम्'' इत्यर्थवादस्य सन्दिग्धार्थनिर्णायकत्वेन प्रामाण्यम्।**

**व्याख्या** - ''क्वचिदिति।'' कुत्रचित् स्थले प्राशस्त्यप्रतिपादनं विना अर्थवादस्य कार्यान्तरमपि अस्ति। यथा - ''अक्ताः शर्करा उपदधाति'' अत्र विधौ ''अक्ताः'' पदेन सामान्यतया द्रवद्रव्यस्य बोधो भवति। किन्तु तद् द्रवद्रव्यं किम्? इति सन्देहे सति तद्विधिसन्निधौ पठितेन ''तेजो वै घृतम्'' इत्यर्थवादेन तद् द्रवद्रव्यं ''घृतम्'' इति घृतप्रशंसाबोधकस्य अर्थवादस्य सन्दिग्धार्थनिर्णायकत्वेनापि प्रामाण्यं विज्ञायते। सन्दिग्धार्थस्य निर्णयकरणमत्र अर्थवादस्य कार्यान्तरम्।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) अर्थवादानान्तु .......... प्रयोजनाभावात्। (परार्थपरत्वे, स्वार्थपरत्वे, अन्यार्थपरत्वे)

(२) अर्थवादः .......... विधः वर्तते। (त्रि, चतुर्, पञ्च)

(३) ''अश्रुजं हि ..........।'' (हिरण्यम्, रजतम्, ताम्रम्)

(४) ''शोभतेऽस्य .......... य एवं वेद।'' (शिरः, नेत्रं, मुखं)

(५) परवक्तृकार्थादिप्रतिपादकः ..........। (परकृतिः, प्रशंसा, पुराकल्पः)

(६) वायुः क्षिप्रगामित्वादतीव .......... देवता। (उत्तमा, मध्यमा, प्रशस्ता)

(७) अग्निदैवत्यो यागः पूर्वकाले अग्निना .......... प्रशस्तः। (विहितत्वात्, अनुमोदितत्वात्, कृतत्वात्)

(८) अक्ता इति पदेन .......... सामान्यं विधीयते। (घनद्रव्य, द्रवद्रव्य, गव्य)

(९) ''तेजो वै ..........।'' (पयः, दधि, घृतम्)

(१०) ''यो बर्हिषि ददाति पुरास्य संवत्सराद् गृहे ..........।'' (रमन्ते, खेलन्ति, रुदन्ति)

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) अर्थवादानां कथं प्रामाण्यम्?

(२) अर्थवादानां चत्वारः भेदाः के?

(३) ''असत्रं वा एतद् यदच्छन्दोमम्'' इति कीदृशः अर्थवादः?

(४) परकृति-अर्थवादस्य किं लक्षणम्?

(५) ''वायुर्वै'' इत्यर्थवादस्य कथं प्राशस्त्यम्?

(६) ''अग्निर्वा अकामयत'' इत्यर्थवादः कथं प्रशस्तः?

(७) ''तेजो वै घृतम्'' इत्यर्थवादस्य कथं प्रामाण्यम्?

**३. द्वित्रवाक्यैः उत्तराणि लिखत।**

(१) अर्थवादानां कथं प्रामाण्यम्?

(२) निन्दार्थवादस्य कथं प्रामाण्यम्?

(३) ''अग्निर्वा अकामयत'' इत्यस्य क आशयः?

(४) अर्थवादानां कार्यान्तरं प्रतिपादयत।

(५) ''वायुर्वै क्षेपिष्ठा देवता'' इत्यस्य कथं प्राशस्त्य-प्रतिपादकत्वम्?

**४. टिप्पणीं लिखत।**

(१) परकृतिरर्थवादः।

(२) पुराकल्पार्थवादः।

(३) निन्दार्थवादः।

**५. निबन्धात्मकमुत्तरं लिखत।**

(१) अर्थवादप्रामाण्यं निरूपयत।

(२) निन्दाऽर्थवादं सोदाहरणं निरूपयत।

(३) अर्थवादवाक्यानां कार्यान्तरं प्रतिपादयत।

# १४ मन्त्रविचारः

**प्रस्तावना**

मीमांसापरिभाषाकारः श्री कृष्णयज्वा विधि – नामधेय – अर्थवादानां निरूपणानन्तरं क्रमप्राप्तं चतुर्थं मन्त्रं निरूपयति। कर्मप्रयोगकाले मन्त्राणामुच्चारणं किमदृष्टार्थं कर्तव्यम्? उत दृष्टार्थस्मरणार्थम्? इति संशयशरीरम्। यथा द्रव्यदेवतयोः कर्माङ्गत्वं तथा मन्त्राणामपि तदङ्गत्वं वक्तव्यम्। द्रव्यं देवता च यागस्वरूपनिष्पादनद्वारा अङ्गं भवति, तथा मन्त्राणामङ्गत्वे किं द्वारम्? किमदृष्टं द्वारम्, उत कर्मसमवेतार्थस्मरणं द्वारम्? इति विचारविषयः॥ इथ्थं पाठेऽस्मिन् मन्त्रस्वरूपं मन्त्रप्रामाण्यञ्च समग्रतया निरूप्यते।

**मन्त्रलक्षणम् – तत्प्रामाण्यञ्च।**

**मूलम् – मन्त्राणामपि अध्ययनविधिना कृत्स्नस्वाध्यायस्य फलवदर्थज्ञानार्थत्वमेव, न त्वदृष्टार्थत्वम्। दृष्टे सम्भवत्यदृष्टकल्पनाऽयोगात्। प्रयोगकाले कर्मज्ञानं विना कर्मानुष्ठानायोगात् कर्मौपयिकमर्थज्ञानं मन्त्रैः क्रियते।**

**व्याख्या** – ''मन्त्राणामपीति''। ''स्वाध्यायोऽध्येतव्यः'' इति अध्ययनविधिः समस्तः स्वाध्यायः (स्वकुलपरम्परागता वेदशाखा) प्रयोजनवदर्थज्ञानयुक्तः इति बोधयति। तेन स्वाध्यायान्तर्गता मन्त्रा अपि प्रयोजनवदर्थज्ञानार्था एव। न अदृष्टार्थाः, यतो हि दृष्टं फलं यदि सम्भवति तर्हि अदृष्टफलं न कल्पनीयम्। अदृष्टफलकल्पनमनुचितमिति तात्पर्यम्, अतो ''मन्त्रा दृष्टार्था'' इति विज्ञेयम्।

किञ्च अनुष्ठानसमये कर्मणः स्वरूपं यावन्न ज्ञातं स्यात् तावत् कर्मणः अनुष्ठानमेव अशक्यम्। तेनेदं स्पष्टं भवति यत् कर्मानुष्ठानार्थमुपयोगि यदर्थज्ञानं, तत् मन्त्रैरेव भवति।

**मूलम् – न चोपदेष्टृवचनादिनाऽप्यर्थस्मरण-सम्भवात् अनुष्ठानोपपत्तिरिति वाच्यम्। मन्त्रैरेवार्थं स्मृत्वाऽनुष्ठाने सति फलं सम्भवति, नान्यथेति नियमाङ्गीकारात्। नियमेनादृष्टस्याङ्गीकारात्। तदभावे तज्जन्यादृष्टलोपे तन्मूलकं फलं न सिध्यतीति कल्पनात्।**

**व्याख्या** – ''न चोपदेष्टृवचनादिनेति''। अत्र शङ्कते – कस्यचिदुपदेशकस्य वचनेनाऽपि कर्मोपयोगिनः पदार्थस्मरणस्य सम्भवेन तदनुष्ठानं सम्भवितुमर्हति। तत्र समाधानं क्रियते – ''मन्त्रैरेवार्थमिति''। उपर्युक्ता शङ्का न योग्या। यतो हि ''अनुष्ठानोपयोगिनं पदार्थं मन्त्रैरेव स्मृत्वा कर्मानुष्ठानं कृते सति तस्मात् फलं सम्भवति, अन्यथा न सम्भवतीति'' नियमः। अस्य नियमस्य विद्यमानत्वादेव अदृष्टोत्पत्तिः अभ्युपगम्यते। अस्य नियमस्य अभावे तज्जन्यस्य अदृष्टस्य अपि लोपो भवेत्। ततश्च नियमादृष्टमूलकं प्रधानयागजन्यं परमापूर्वं अपि नोत्पद्यतेति कल्पितं मीमांसकैः।

**मूलम् – नन्वेवं मन्त्राणां** स्वप्रकाश्येऽर्थे विनियोग इति फलितम्। विनियोगो नाम शेषत्वेनान्वयः, शेषत्वं नाम अङ्गत्वम्। ततश्च ''इमामगृभ्णन्-रशनाम्'' इति मन्त्रस्य रशनाग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रकाशनसामर्थ्यरूपात् लिङ्गादेवरशनाग्रहणाङ्गत्वोपपत्तेः ''इमामगृभ्णन् रशनमृतस्य इत्यश्वाभिधानीमादत्ते इति वचनं किमर्थमिति चेत् न।'' परिसंख्यार्थत्वात्। चयनप्रकरणेऽश्वरशनाग्रहणम्, गर्दभरशनाग्रहणञ्चेति द्वयमस्ति। तत्र लिङ्गादश्वरशनायां मन्त्रप्राप्तावुच्यमानायां लिङ्गाविशेषाद् गर्दभरशनायामपि मन्त्रः प्राप्तः। अतोऽश्वरशनायामेव मन्त्रः कार्यो न गर्दभरशनायामिति मन्त्रनिवृत्तिरूपपरिसंख्याऽर्थोऽयं विधिः।

**व्याख्या** – ''नन्वेवमिति''। पुनरत्र शंकते-उपर्युक्तरीत्या स्वप्रकाश्येऽर्थे मन्त्राणां विनियोगो भवतीति फलितम्। ''स्व'' शब्देन मन्त्रो ग्राह्यः। एवं च मन्त्रैः प्रकाश्यमाने अर्थे एव तेषां मन्त्राणां विनियोगो वाच्यः। शेषत्वं नाम

अङ्गत्वम्। इत्थं च ''इमामगृभ्णन् रशनामृतस्य'' इति मन्त्रे रशनाग्रहणात्मकस्य अर्थस्य प्रकाशनसामर्थ्यमस्ति। तस्मात् तत्सामर्थ्यात्मकेन लिङ्गप्रमाणेन अयं मन्त्रः रशनाग्रहणस्य अङ्गं भवितुं शक्नोति। तर्हि - ''इत्यश्वाभिधानीमादत्ते'' इति ब्राह्मणवचनं किमर्थम्? तत्रोत्तरं दीयते - ''परिसंख्यार्थत्वादिति''। न हि तत् मन्त्रविनियोगकरणार्थम्। ईदृशी चात्रेयं परिसंख्या - चयनयागप्रकरणे तावत् ''अश्वरशनाग्रहणम्'' ''गर्दभरशनाग्रहणम्'' चेति द्विविधं रशनाग्रहणमस्ति। तत्र लिङ्गप्रमाणेन यथा अश्वरशनाग्रहणे अयं मन्त्रो वक्तव्य इति प्रतिभाति, तथैव लिङ्गप्रमाणेन कस्यापि विशेषस्य अप्रदर्शितत्वात् अयं मन्त्रः गर्दभरशनाग्रहणेऽपि वक्तुं शक्यः। एवं च उभयरशनाग्रहणे मन्त्रोऽयं प्राप्नोति। तदा अश्वरशनाग्रहणे मन्त्रोऽयं वक्तव्यः, गर्दभरशनाग्रहणे न वक्तव्यः इति मन्त्रस्य अन्यनिवृत्तिरूपपरिसंख्यार्थं ''इत्यश्वाभिधानीमादत्ते'' इत्ययं विधिरावश्यकः।

**परिसंख्याया दोषत्रयम्**

**मूलम् - सा च परिसंख्या त्रिदोषा - स्वार्थत्यागः, परार्थस्वीकारः, प्राप्तबाधश्चेति। तत्र - ''अश्वाभिधानीमादत्ते'' इति वाक्यस्य अनेन मन्त्रेणाश्वरशनाऽदानं कुर्यादिति स्वार्थः, स च त्यक्तः। गर्दभरशनातो मन्त्रनिवृत्तिः परार्थः, स च स्वीकृतः। गर्दभरशनायामपि लिङ्गात् प्राप्तस्य मन्त्रस्यानेन बाधश्च - इति त्रिदोषा परिसंख्या गत्यभावादङ्गीकृता। गत्यन्तरे सति सा न युक्ता।**

**व्याख्या** - ''सा चेति''। परिसंख्यायां सत्यां त्रयो दोषा भवन्ति। ते च दोषाः - (१) स्वार्थत्यागः (२) परार्थस्वीकारः, (३) प्राप्तबाधश्च। तथा चोक्तम् - ''**श्रुतार्थस्य परित्यागात् अश्रुतार्थस्य कल्पनात्। प्राप्तस्यबाधादित्येवं परिसंख्या त्रिदूषणा॥**'' अत्र तावत् ''इत्यश्वाभिधानीमादत्ते'' अस्य ब्राह्मणवाक्यस्य अयमर्थः यत् ''अनेन मन्त्रेण अश्वरशनाया ग्रहणं कर्तव्यम्''। परिसंख्यायां सत्यां अस्य अर्थस्य परित्यागः कर्तव्यो भवति। ''अनेन मन्त्रेण गर्दभरशनायाग्रहणं न कर्तव्यम्'' इति परार्थस्य (अश्रुतार्थस्य) स्वीकारः कर्तव्यो भवति। गर्दभरशनाग्रहणेऽपि लिङ्गप्रमाणेन प्राप्तस्य मन्त्रस्य ''इत्यश्वाभिधानीमादत्ते'' इति ब्राह्मणवाक्येन बाधः स्वीकर्तव्यो भवति। इत्थं दोषत्रयेण युक्ताऽपि परिसंख्या उपायान्तराभावात् (अगत्या) स्वीक्रियते। उपायान्तरे सति तस्याः स्वीकरणमनुचितम्।

**मूलम् - एवमष्टदोषदुष्टविकल्पोऽप्यगतिकोऽङ्गीकृतः। यथा यदाग्नेयोऽष्टाकपालः संस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः। तत्र अपूपविशेषस्य पुरोडाशस्य प्रकृतिद्रव्याकाङ्क्षायाम् अनियमेन यस्य कस्यचिद् द्रव्यस्य प्राप्तौ ''व्रीहिभिर्यजेत'' इति वाक्यात् व्रीहयो नियम्यन्ते, एवं ''यवैर्यजेत'' इति वाक्याद्यवा अपि नियम्यन्ते, तयोरेकार्थत्वाद्विकल्पः।**

**व्याख्या** - ''एवमिति''। अगतिकगत्या यथा परिसंख्या स्वीकर्तव्या भवति, तथैव उपायान्तरस्य अविद्यमानत्वात् अष्टभिर्दोषैर्दूषितो विकल्पोऽपि स्वीकर्तव्यो भवति। यथा - ''यदाग्नेयोऽष्टाकपालः'' इति विधिवाक्येन अष्टसु कपालेषुपक्तः पुरोडाशः यागाङ्गत्वेन विहितोऽस्ति। तत्र अपूपविशेषपुरोडाशरूपस्य पिण्डविशेषस्य प्रकृतिद्रव्यं किम्? इत्याकांक्षायां सत्यां विधिवाक्ये कस्यापि द्रव्यविशेषस्य अनुल्लेखात् ''येन केनापि द्रव्येण पुरोडाशः कर्तव्यः'' इति प्राप्तौ पुरोडाश-प्रकरण-पठितत्वात् ''व्रीहिभिर्यजेत'' इति वाक्येन पुरोडाशार्थं प्रकृतिद्रव्यरूपेण व्रीहिद्रव्यस्य निश्चयो भवति। किन्तु तथैव पुराडोशप्रकरणपठितत्वादेव ''यवैर्यजेत'' इत्यपरेण वाक्येन पुरोडाशः यवैः कर्तव्यः इति निश्चेतव्यो भवति। पुरोडाशनिर्माणैककार्यार्थमेव व्रीहि-यवयोर्द्वयोः प्रकृतिद्रव्ययोः उपयोगः कर्तव्योऽस्ति। किन्तु द्वयोर्युगपदुपयोगः कर्तुमशक्य अति अगत्या ''विकल्पः'' अत्र स्वीकर्तव्यो भवति। ''व्रीहिभिः पुरोडाशः कर्तव्यः, अथवा यवैः पुरोडाशः कर्तव्यः इति विकल्पस्य स्वरूपम्।'' ''तयोरेकार्थत्वात् विकल्पः'' इति मूले उक्तम्। तत्र एकः अर्थः प्रयोजनं ययोः तौ एकार्थौ, तत्वात् एकार्थत्वात् इति अस्मिन् विकल्पोदाहरणे द्वयोर्विकल्पः प्रदर्शितः।

**मूलम् - एवम् ''अतिरात्रे षोडशिनं गृण्हाति'' इति षोडशिग्रहो विहितः। तथा ''नातिरात्रे षोडशिनं गृण्हाति'' इति प्रतिषेधात् ग्रहणाभावो विहितः, तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोः एकस्मिन् प्रयोगेऽनुष्ठातुमशक्यत्वात् क्वचित् प्रयोगे ग्रहणानुष्ठानम्, प्रयोगान्तरे तदभावानुष्ठानमिति अत्रापि विकल्पः।**

**व्याख्या** - ''एवमिति''। विकल्पस्य अन्यविधमुदाहरणं प्रदर्शयितुम् आरभते। अनेनैव प्रकारेण ''अतिरात्र'' संज्ञके यागे ''अतिरात्रे षोडशिनं गृण्हाति'' इति वाक्येन षोडशिग्रहस्य ग्रहणं विधीयते। तथैव ''नातिरात्रे षोडशिनं गृण्हाति'' इति वाक्येन अतिरात्रसंज्ञके यागे षोडशिग्रहस्य ग्रहणं न कर्तव्यमिति ग्रहणं निषिध्यते। अत्र एकेन वाक्येन षोडशिग्रहस्य ग्रहणं कर्तव्यमित्युक्तम्। अपरेण वाक्येन षोडशिग्रहस्य ग्रहणं न कर्तव्यमित्युक्तम्। ग्रहणाऽग्रहणे न युगपत् अनुष्ठातुं शक्ये मिथो विरुद्धत्वात्। अतः कुत्रचित् प्रयोगे षोडशिग्रहस्य ग्रहणं कर्तव्यम्, प्रयोगान्तरे च षोडशिग्रहपात्रस्य ग्रहणं न कर्तव्यम् इति विकल्पः अगत्या अङ्गीक्रियते। अत्र ग्रहणक्रिया-तदभावयोः विकल्पः प्रदर्शितः। अतिरात्रप्रयोगो हि ज्योतिष्टोमयागस्यैव प्रयोगविशेषः।

**विकल्पे दोषाष्टकम्**

**मूलम् - स चाष्टदोषदुष्टः। तथा हि-पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षण-प्रामाण्यपरित्यागः, अननुष्ठापकत्वलक्षणाप्रामाण्य स्वीकारः, ततो द्वितीयप्रयोगे यवानुष्ठाने पूर्वं त्यक्तं यत् प्रामाण्यं तत्स्वीकारः, स्वीकृतं यदप्रामाण्यं तत्परित्यागश्चेति यवशास्त्रे चत्वारो दोषाः। एवं पूर्वं यवप्रयोगे व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत्प्रामाण्यं तत्परित्यागः, अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः, पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्चेति व्रीहिशास्त्रे चत्वारो दोषाः। इत्यष्टदोषदुष्टो विकल्पः।**

**व्याख्या** - ''स चेति''। अत्र विकल्पे अष्टौ दोषाः भवन्ति। तथा हि - (१) पुरोडाशार्थंव्रीहिणां स्वीकारे ''यवैर्यजेत'' इति यवविधायकशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यस्य परित्यागः कर्तव्यो भवति। अयमाशयः - विधेयार्थस्य अनुष्ठापकत्वेनैव विधीनां प्रामाण्यं भवति। अन्यथा विधीनाम् अप्रामाण्यम्, अर्थात् (२) यवशास्त्रम् अप्रमाणमिति स्वीक्रियते। (३) पक्षान्तरे (यवपक्षे) पुरोडाशार्थं यवानां स्वीकारे यवशास्त्रस्य पूर्वं परित्यक्तं यत् प्रामाण्यं, तत् स्वीकृतमिव भवति। (४) पूर्वं (व्रीहिप्रयोगे) यवशास्त्रस्य स्वीकृतं यत् अप्रामाण्यं, तत् इदानीं न स्वीक्रियते इति वक्तव्यं भवति, इति यवशास्त्रस्वीकारपक्षे चत्वारो दोषाः समुद्भवन्ति।

एवमेव (५) यदि पूर्वं पुरोडाशार्थं यवानां स्वीकारे ''व्रीहिभिर्यजेत'' इति व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत् प्रामाण्यं तस्य परित्यागः कर्तव्यो भवति। (६) तस्य च अननुष्ठापकत्वलक्षणं यत् अप्रामाण्यं तत् स्वीकृतमिव भवति। अर्थात् व्रीहिशास्त्रमप्रमाणमिति स्वीकारः कर्तव्यः भवति। (७) पुनर्द्वितीयप्रयोगे पुरोडाशार्थं व्रीहिशास्त्रस्य स्वीकारे तस्य परित्यक्तप्रामाण्यस्य (अप्रामाण्यस्य) स्वीकार इव भवति। (८) स्वीकृतस्य अप्रामाण्यस्य पुनः परित्यागः कर्तव्यो भवति। इत्थं व्रीहिशास्त्रसम्बद्धाश्चत्वारो दोषाः भवन्ति। अत्रैव यवशास्त्रसम्बद्धानां चतुर्णां दोषाणासमावेशे कृते अष्टौ दोषा भवन्ति। इति अष्टदोषदुष्टो विकल्पो भवति।

**मूलम् - स च विकल्पः क्वचिदेकार्थत्वात् एककार्यकारित्वादित्यर्थः। यथा - व्रीहियवयोरेकैकस्य पुरोडाशनिष्पादनक्षमत्वाद्विकल्पः।**

**व्याख्या** - क्वचित् एककार्यकारित्वादेव विकल्पो भवति। यथा - व्रीहियवयोः प्रत्येकस्य (एकैकस्य) पुरोडाशनिष्पादनात्मकमेकं कार्यं कर्तुं सामर्थ्यमस्ति। अतः व्रीहियवयोर्विकल्पः। अत्र एकार्थत्वाद् विकल्पः स्वीक्रियते।

**मूलम् - क्वचित् वचनबलात्, यथा - ''बृहत्पृष्ठं भवति'' इति बृहत्सामसाध्यं पृष्ठनामकं स्तोत्रं विहितम्, ''रथन्तरं पृष्ठम्भवति'' इति रथन्तरसामसाध्यं पृष्ठस्तोत्रान्तरं विधीयते।**

**व्याख्या** - ''क्वचिदिति''। कुत्रचित् स्वतन्त्रवचनबलाद् विकल्पो भवति। यथा - ''बृहत्पृष्ठं भवति'' इति वाक्येन बृहत्संज्ञकसाम्ना साध्यं पृष्ठसंज्ञकं स्तोत्रं विधीयते। तथैव ''रथन्तरं पृष्ठं भवति'' इति वाक्येन रथन्तरसंज्ञकसाम्ना साध्यमपरं पृष्ठसंज्ञकं स्तोत्रं विधीयते। ''पृष्ठस्तोत्रान्तरम्'' इति मूले स्थितमस्ति। तत्र पृष्ठसंज्ञकं स्तोत्रं पृष्ठस्तोत्रम्, अन्यत् पृष्ठस्तोत्रं - पृष्ठस्तोत्रान्तरम् इति विज्ञेयम्।

**मूलम् - स्तोत्रं च प्रयाजादिवदपूर्वार्थत्वादर्थकर्म। साम तु संस्कारकर्मत्वाद् गुणकर्म। स्तोत्रसाधनीभूत-स्तोत्रीयाक्षराभिव्यक्तिरूपसंस्कारद्वारा साम्नां स्तोत्रसाधनत्वाङ्गीकारात्। प्रगीतमन्त्रसाध्यमिन्द्रादिगुणि-निष्ठगुणाभिधानं स्तोत्रम्। प्रगीतमन्त्रसाध्यं सामाभिव्यक्तऋगक्षरसाध्यमित्यर्थः। अप्रगीतमन्त्रसाध्य-गुणिनिष्ठगुणाभिधानं शस्त्रम्। गानक्रियाविशेषः साम। स्तोत्रसाधनीभूताः ऋचः स्तोत्रीयाः। तदेतत्त्रिवृत्पञ्च-दशत्वादिसंख्याविशेषः स्तोमः। इत्येतेषां भेदः।**

**तथा च बृहद्रथन्तरपृष्ठयोः भिन्नापूर्वार्थत्वेन एकार्थत्वाभावेऽपि ''बृहद्वा पृष्ठं कार्यं, रथन्तरं वा पृष्ठं कार्यम् इति वचनबलादेव विकल्पः।''**

**व्याख्या** - ''स्त्रोत्रमिति''। स्तोत्रं तावत् अर्थकर्म, अपूर्वार्थत्वात् प्रयाजादिवत्। किन्तु साम्नः संस्कारकर्मत्वाद् गुणकर्मत्वम् यतो हि साम्ना खलु स्तोत्रगताक्षराणां स्वष्टतारूपः संस्कारः क्रियते, तेन सामानि स्तोत्रसाधनानि प्रगीतमन्त्रसाध्या इन्द्रादिदेवतानां या स्तुतिः, सा स्तोत्रमित्युच्यते। प्रगीतमन्त्रसाध्यत्वं च साम्ना अभिव्यक्तऋगक्षरसाध्यत्वम्। अप्रगीतमन्त्रसाध्यं गुणिनिष्ठगुणाभिधानं शस्त्रम्। गानक्रियाविशेषो हि ''साम'' इत्युच्यते। स्तोत्रं वक्तुमुपयुज्यमाना ऋचः ''स्तोत्रीया'' इत्युच्यन्ते। तासां स्तोत्रीयाख्यानामृचां ''त्रिवृत्'' ''पञ्चदश'' इत्यादिसंख्याविशेषः ''स्तोम'' शब्देनोच्यते। इत्थमुक्तानां पदार्थानां भेदोऽभिहितः। तथा च - बृहत्पृष्ठस्तोत्रजन्यमपूर्वं भिन्नम्, रथन्तरपृष्ठस्तोत्रजन्यं च अपूर्वं भिन्नम्। तेन तयोः स्तोत्रयोरेकार्थत्वाऽभावेऽपि ''बृहत्पृष्ठं कर्तव्यम्'' अथवा ''रथन्तरपृष्ठं कर्तव्यम्'' इति वचनबलादेव अत्र विकल्पः स्वीक्रियते।

**मूलम् - क्वचित् व्यवस्थितविकल्पः - द्वितीयप्रयाजादिकर्मणि नाराशंसतनूनपान्मन्त्रयोः एकार्थत्वाद् विकल्पः। स च ''राजन्यवसिष्ठादीनां द्वितीयः प्रयाजतनूनपादन्येषाम्'' इति वाक्याद् व्यवस्थित इति व्यवस्थितविकल्पः।**

**व्याख्या** - ''क्वचिदिति''। क्वचित्स्थलेषु ''व्यवस्थितविकल्पो'' भवति। यथा - पञ्चप्रयाजानां मध्ये द्वितीयप्रयाजकर्मानुष्ठानकाले ''नाराशंसतनूनपात्'' इत्यनयोर्मन्त्रयोरेकार्थत्वाद् विकल्पः स्वीक्रियते किन्तु वसिष्ठगोत्रोत्पन्नेन कण्वगोत्रोत्पन्नेन च क्षत्रिययजमानेन ''नाराशंस'' पदेन युक्तो द्वितीयः प्रयोजोऽनुष्ठेयः, तद्भिन्नगोत्रोत्पन्नैर्यजमानैः ''तनूनपात्'' पदेन युक्तो द्वितीयः प्रयाजोऽनुष्ठेय इति व्यवस्था। ''राजन्यवसिष्ठः'' इत्यादि वाक्येन क्रियते। तस्मादत्र व्यवस्थितविकल्पः भवति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) कर्मौपयिकमर्थज्ञानं ......... क्रियते। (स्तोत्रैः, मन्त्रैः, शस्त्रैः)

(२) मन्त्रैरेवार्थं स्मृत्वाऽनुष्ठाने सति ......... भवति। (अर्थः, स्वर्गः, फलं)

(३) शेषत्वं नाम .........। (गुणत्वम्, अङ्गत्वम्, मुख्यत्वम्)

(४) ......... निवृत्तिरूपपरिसंख्याऽर्थोऽयं विधिः। (तन्त्र, यन्त्र, मन्त्र)

(५) गर्दभरशनातो मन्त्रनिवृत्तिः ..........। (स्वार्थत्यागः, परार्थः, पाप्तबाधः)

(६) पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षण .......... परित्यागः।

(अप्रामाण्य, प्रामाण्य, प्रमेयत्व)

(७) सा च परिसंख्या ..........। (सप्तदोषा, त्रिदोषा, चतुर्दोषा)

(८) प्रगीतमन्त्रसाध्यमिन्द्रादिगुणिनिष्ठगुणाभिधानं ..........। (शस्त्रम्, अस्त्रम्, स्तोत्रम्)

(९) गानक्रियाविशेषः ..........। (ऋक्, यजुः, साम)

(१०) राजन्यवसिष्ठादीनां ..........। (प्रथमः, तृतीयः, द्वितीयः)

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) मन्त्राणां कस्मिन्नर्थे विनियोगः भवति।

(२) परिसंख्यायाः त्रिदोषाः के?

(३) व्रीहि यवशास्त्रयोः कस्मात् विकल्पः?

(४) किं नाम बृहत्पृष्ठम्?

(५) किं नाम शस्त्रम्?

(६) स्तोत्रीयाः के?

(७) ''अतिरात्रे षोडशिनं गृहणाति'' इति मन्त्रेण कः विहितः?

**३. द्वित्रवाक्यैः उत्तराणि लिखत।**

(१) मन्त्राणां किं प्रयोजनम्?

(२) व्रीहियवशास्त्रयोः कथं विकल्पः?

(३) व्यवस्थितविकल्पं सोदाहरणं निरूपयत।

(४) ''इत्यश्वाभिधानीमादत्ते'' इति ब्राह्मणवाक्यस्य सार्थकतां प्रतिपादयत।

(५) मन्त्रैरेवार्थं स्मृत्वाऽनुष्ठाने सति कथं फलं सिध्यति?

**४. टिप्पणीं लिखत।**

(१) परिसंख्याया दोषत्रयम्।

(२) ''अतिरात्रे षोडशिनं गृहणाति''।

(३) वचनबलाद् विकल्पः।

**५. निबन्धात्मकमुत्तरं लिखत।**

(१) ''इमामगृभ्णन् रशनामृतस्य'' इति मन्त्रस्य सन्दर्भं वर्णयत।

(२) विकल्पे दोषाष्टकमुपवर्णयत।

(३) मन्त्रप्रामाण्यं - प्रयोजनं च प्रतिपादयत।

●

# १५ वेदप्रामाण्यविचारः

**प्रस्तावना**

''विद् ज्ञाने'' इति धातोः निष्पन्नः वेदशब्दः अलौकिकज्ञानप्रकाशके वैदिकमन्त्रसमूहार्थे प्रसिद्धः दृश्यते। स च कथं प्रामाण्यपथमारोहति इति शङ्कया वैदिकैर्मीमांसकैः निरूपितम्। यथा - ''अपौरुषेयं वाक्यं वेदः'' इति। स च स्वतः प्रमाणमित्यपि अभिहितमभियुक्तैः। अखण्डोऽपि आम्नायः अर्थनिरूपणसौकर्याय विधि - नामधेय - अर्थवाद -मन्त्रादिभेदेन चतुर्धा व्यभाजि पूर्वाचार्यैः। श्रुत्यविरुद्धयोः स्मृयाचारयोरपि प्रामाण्यं स्वीकृतं पूर्वमीमांसाशास्त्रे प्रस्तुतेऽस्मिन् पाठे सन्दर्भवशात् धर्मे प्रमाणभूतयोः स्मृत्याचारयोरपि प्रामाण्यं निरूप्यते।

**मूलम् - तदेवं चोदनापरपर्यायाणां विधिवाक्यानाम् अंशत्रयविशिष्टभावनाविधायकत्वात् प्रामाण्यम्। उद्भिदादीनां नामतया, अर्थवादानां विधेयप्राशस्त्यपरतया, मन्त्राणामनुष्ठेयार्थस्मारकतया प्रामाण्यमिति कृत्स्नस्य वेदस्यालौकिके धर्माऽधर्माख्येऽर्थे प्रामाण्यं स्थितम्।**

**व्याख्या** - ''तदेवमिति''। इत्थं चोदनेत्यपरसंज्ञकानां विधिवाक्यानां साध्य-साधन-इतिकर्तव्यतेति अंशत्रयविशिष्टार्थभावनाविधायकत्वात् प्रामाण्यमभिहितम्। उद्भिदादिवाक्यानां कर्मनामधेयप्रतिपादकत्वात् प्रामाण्यं प्रतिपादितम्। अर्थवादवाक्यानां विधेयार्थप्राशस्त्यप्रतिपादकत्वात् प्रामाण्यं प्रोक्तम्। मन्त्राणां तु अनुष्ठानकालिक-पदार्थस्मारकत्वात् प्रामाण्यम् इति रीत्या समस्तो वेदः अलौकिके धर्माऽधर्मरूपेऽर्थे प्रमाणमिति आकरग्रन्थेषु प्रतिपादितम्। एवं च विधि-नामधेयाऽर्थवाद-मन्त्ररूपैर्वेदं चतुर्धा विभज्य तत्र प्रत्येकस्य प्रामाण्यं व्यवस्थापितमिति विज्ञेयम्।

**स्मृत्यादिप्रामाण्यविचारः**

**मूलम् - मन्वादिप्रणीतानां स्मृतीनामपि वेदमूलकत्वात् स्यात् अष्टकादौ धर्मे प्रामाण्यम्। ''औदुम्बरी सर्वा वेष्टयितव्या'' इति स्मृतिरप्रमाणम्, ''औदुम्बरीं स्पृष्ट्वोद्गायेत्'' इति प्रत्यक्षश्रुतिविरुद्धत्वात्। सर्ववेष्टने सति श्रुत्युक्तस्पर्शनस्य कर्तुमशक्यत्वात्। ''वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति'' इत्यादिस्मृतिरप्रमाणम्। श्रुत्यर्थविरुद्धत्वेऽपि लोभमूलकत्वात्।**

**व्याख्या** - ''मन्वादिप्रणीतानामिति''। वेदमनुसृत्य मन्वादिभिर्विरचितानां स्मृतिग्रन्थानामपि वेदमूलकत्वात् प्रामाण्यमस्ति। अर्थात् वेदतुल्यमेव स्मृतीनामपि प्रामाण्यं स्वीक्रियते। तेन ''अष्टकादौ'' धर्मे तासां प्रामाण्यमुचितमेव। अर्थात् स्मृत्युक्तत्वादष्टकादीनामनुष्ठानमवश्यं कर्तव्यम्। माघकृष्णाष्टम्यां पितॄनुद्धिश्य क्रियमाणं कर्म ''अष्टका'' शब्देनोच्यते। ''अष्टकाः कर्तव्याः'' ''प्रपा प्रवर्तयितव्या'' इत्यादीनि अन्यान्यपि स्मृतिवचनानि सन्ति। अत्र ''अष्टकाः कर्तव्याः'' इतीयं स्मृतिः प्रमाणम् अप्रमाणं वा? इति सन्देहे सति अष्टकादिस्मृतिवचनस्य वेदमूलकत्वात् तत् प्रमाणमिति सिद्धान्तितम्। अष्टकाविषये मूलभूतं श्रुतिवचनं - ''**यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम्। संवत्सरस्य या पत्नी स नो अस्तु सुमङ्गली॥ अष्टकायै सुराधसे स्वाहा**'' इति। अस्य अर्थवादवाक्यमपि उपलभ्यते - ''**एषा वै संवत्सरस्य पत्नी यदष्टका**'' इति। एवं च अष्टकादि स्मृतीनां वेदमूलकत्वात् प्रामाण्यमभ्युपगन्तव्यमेव।

किन्तु श्रुतिस्मृत्योर्यत्र विरोधः स्यात् तत्र स्मृतिरप्रमाणमिति प्रदर्शयितुं ''औदुम्बरी'' इति। ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये काचिद् औदुम्बरीशाखा निखन्यते। उदुम्बरवृक्षस्य इयं शाखा औदुम्बरीत्युच्यते। तस्याश्च शाखायाः

वस्त्रेण वेष्टनं कर्तव्यमिति ''औदुम्बरी सर्वा वेष्टयितव्या'' इति स्मृतिवचनेन कथ्यते। तत्राऽयं संशयो भवति यत् इयं सर्ववेष्टनस्मृतिः प्रमाणम् अप्रमाणं वा? तत्र पूर्वपक्षी वदति इयं स्मृतिः वेदमूलकत्वात् प्रमाणम् अष्टकादिस्मृतिवत्। अष्टकादिस्मृतिषु इव यद्यपि अत्र मूलभूतं वेदवाक्यं नोपलभ्यते, तथापि तस्य अनुमातुं शक्यत्वात्। तत्र सिद्धान्ती ब्रूते सर्ववेष्टनस्मृतिवाक्यम् अप्रमाणम्, यतो हि ''औदुम्बरीं स्पृष्ट्वा उद्गायेत्'' - अर्थात् औदुम्बरीशाखायाः स्पर्शं कृत्वा ''उद्गाता'' संज्ञकः ऋत्विक् सामगानं कुर्यात् इति प्रत्यक्षपठितेन वेदवाक्येन औदुम्बरीशाखायाः स्पर्शो विधीयते। यदि स्मृतिवचनानुरोधेन शाखायाः सर्ववेष्टनं क्रियते तर्हि तस्याः शाखायाः स्पर्शो न सम्भवति। अतः प्रत्यक्षश्रुति विरुद्धत्वात् इयं सर्ववेष्टनस्मृतिरप्रमाणमेवेति विज्ञेयम्। प्रत्यक्षश्रुतिविरुद्धत्वादेव मूलभूतवेदवाक्यानुमानमपि बाधितं भवति। एवञ्च निर्मूलत्वादियं स्मृतिरप्रमाणमेव।

तथैव ''वैसर्जनहोमीयं वासोऽध्वर्युगृहणाति'' इति स्मृतिरपि अप्रमाणम्। सोमयागे अवान्तरदीक्षाविसर्जनप्रसंगे क्रियमाणहोमावसरे यजमानं पत्नीं पुत्रान् भ्रातॄंश्च आहतेन वाससा प्रच्छाद्य वाससोऽन्ते स्रुग्दण्डमुपनिबध्य जुहोति। तस्मिन् वाससि एवं स्मर्यते - ''वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति''। यजमानपरिवाराच्छादकं वस्त्रं वैसर्जनहोमीयं वसः इत्युच्यते। इयं स्मृतिः यद्यपि अत्र प्रत्यक्षश्रुतिविरुद्धा नास्ति, तथापि अस्याः स्मृतेर्लोभमूलकत्वात् अप्रामाण्यं निश्चीयते। दृष्टानुसारिणी चैषा कल्पना। अतः प्रत्यक्षश्रुत्या बाधाऽभावेऽपि मूलभेदात् नेयं स्मृतिः प्रमाणम्। दृष्टश्चात्र मूलभूतो हेतुः लोभ एव। तत एव स्मृत्युपपन्तेः। एवं च श्रुतिविरुद्धं दृष्टकारणं च स्मरणमप्रमाणम्।

**मूलम् - तथा शिष्टाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात् प्रमाणम्। मातुलसुतापरिणयनादि शिष्टाचारस्त्वप्रमाणम्। ''मातुलस्य सुतामूढ्वा'' इत्यादिस्मृत्या निषिद्धत्वेन स्मृतिविरुद्धत्वात्। तदेवं श्रुतिस्मृत्याचाराणां धर्माधर्मयोः प्रामाण्यमुक्तम्।**

**व्याख्या** - ''तथेति''। तथैव शिष्टानामाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात् प्रमाणम्। किन्तु मातुलकन्याविवाहतुल्याः शिष्टाचारास्तु अप्रमाणम्। यतो हि-

''**मातुलस्य सुतामूढ्वा मातृगोत्रां तथैवच। समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत्॥**'' इत्यादि शातातपस्मृतिवचनेन तादृशाचारस्य निषिद्धत्वात् स्मृतिविरुद्धत्वम्। एवं च स्मृतिविरुद्धः शिष्टाचारः अप्रमाणमिति विज्ञेयम्। एवं रीत्या श्रुतेः स्मृतेः शिष्टाचारस्य च धर्माऽधर्मयोः प्रामण्यं प्रतिपादितम्।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) उद्भिदादीनां .......... प्रामाण्यम्। (कर्मतया, नामतया, दृष्टतया)

(२) अर्थवादानां .......... परतया प्रामाण्यम्। (गौरव, प्राशस्त्य, गुण)

(३) मन्त्राणामनुष्ठेयार्थ .......... प्रामाण्यम्। (बोधकतया, स्मारकतया, सामान्यतया)

(४) विधिवाक्यानां .......... प्रामाण्यम्। (प्रमेयत्वात्, विधायकत्वात्, निर्देशकत्वात्)

(५) स्मृतीनां .......... प्रामाण्यम्। (शास्त्रमूलकत्वात्, वेदमूलकत्वात्, इतिहासमूलकत्वात्)

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) शिष्टाचारः कथं प्रमाणम्?

(२) मातुलसुतापरिणयनादिशिष्टाचारः प्रमाणं न वा?

(३) ''वैसर्जनहोमीयं वासोऽध्वर्युगृह्णाति'' इति स्मृतिः किं मूलकम्?

(४) कृत्स्नस्य वेदस्य कस्मिन्नर्थे प्रामाण्यं स्थितम् ?

(५) अष्टकाशब्देन किमुच्यते ?

३. **द्वित्रवाक्यैः उत्तराणि लिखत।**

(१) अष्टकाविषये मूलभूतं श्रुतिवचनं किम् ?

(२) ''औदुम्बरीं स्पृष्ट्वोद्गायेत्'' इति कुत्र श्रूयते ?

(३) ''वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति'' इत्यत्र सन्दर्भः कः ?

(४) मातुलकन्याविवाहः किमर्थमप्रमाणम् ?

(५) वेदस्य विभागाः के के सन्ति ?

४. **टिप्पणीं लिखत।**

(१) अष्टकास्मृतिप्रामाण्यम्।

(२) शिष्टाचारप्रामाण्यम्।

(३) ''वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति'' प्रामाण्यं विचारयत।

५. **निबन्धात्मकमुत्तरं लिखत।**

(१) सविभागं वेदप्रामाण्यं प्रतिपादयत।

(२) मन्वादिप्रणीतानां स्मृतीनां प्रामाण्यं निरूपयत।

(३) ''औदुम्बरीसर्वावेष्टयितव्या'' इति स्मृतेः प्रामाण्यं विचारयत।

●

# १६ कर्मभेदकप्रमाणानि

**प्रस्तावना**

महर्षि जैमिनिप्रणीते पूर्वमीमांसाशास्त्रे प्रथमाध्याये धर्माऽधर्मयोः प्रमाणभूतानां विधि-मन्त्र-नामधेय-अर्थवाद-स्मृति आचार-सामर्थ्य-वाक्यशेषरूपाणां अष्टौ प्रमाणानां प्रामाण्यं निरूपितम्। सम्प्रति द्वितीयाध्याये कर्मणां परस्परं भेदः निरूप्यते। यतो हि याग-दान-होमाख्यानि सन्ति बहूनि कर्माणि। तेषां च शब्दान्तर-अभ्यास-संख्या-संज्ञा-गुण-प्रकरणान्तरादि षड्भिः प्रमाणैः परस्परं भेदः शास्त्रे निरूपितः। प्रकृतपाठे मीमांसापरिभाषाकारः श्री कृष्णयज्वा जैमिनिप्रोक्तानि कर्मभेदकप्रमाणानि संक्षिप्य निरूपयति।

**कर्मभेदनिरूपणम्**

**मूलम् - सच धर्मः परस्परं भिन्नः। भेदकप्रमाणानि तु शब्दान्तरादीनि।**

**व्याख्या** - ''स चेति''। एतावत्पर्यन्तं कृतेन विवेचनेन मीमांसाशास्त्रस्य प्रथमाध्याये वर्णितं धर्माधर्मप्रामाण्यं निरूपितम्। इदानीं द्वितीयाध्याये प्रतिपादितानां धर्मभेदकप्रमाणानां निरूपणार्थम् उपक्रमते। ''स च धर्मः'' इति। उपरि निरूपितो धर्मः परस्परं भिन्नः अस्ति। धर्मस्य भेदकप्रमाणानि शब्दान्तर-अभ्यास-संज्ञा-संख्या-गुण-प्रकरणान्तरमिति षड्भवन्ति।

**शब्दान्तरात्-कर्मभेदः**

**मूलम् - तथा हि - यागदानहोमानां यजति-ददाति-जुहोत्यपरपर्यायशब्दप्रतिपाद्यत्वात् शब्दान्तरात् कर्मभेदः। स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं दानम्।**

**व्याख्या** - ''तथा हि''। याग-दान-होमानां ''यजति-ददाति-जुहोति'' इति असमानार्थकशब्दैः प्रतिपादितत्वात् तेषां शब्दान्तराद् भेदो भवति। (१) ''सोमेन यजेत'' (२) ''हिरण्यमात्रेयाय ददाति'' (३) ''दाक्षिणानि जुहोति'' इति त्रिषु वाक्येषु निरूपिताः यागदानहोमाः सन्ति। तत्र शब्दान्तराख्येन प्रमाणेन यागदानहोमाः परस्परं भिन्नाः भवन्ति। स्व-स्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं ''दानम् इति दानपदार्थः। तथैव देवतामुद्दिश्य क्रियमाणो द्रव्यत्यागः यागपदार्थः। स यदा प्रक्षेपविशिष्टो भवति तदा स एव ''होम'' इत्युच्यते।

**अभ्यासात् कर्मभेदः**

**मूलम् - ''समिधो यजति'' इत्यादीनां पञ्चानां वाक्यानां मध्ये एकस्य कर्मविधायकत्वमन्येषां तस्मिन् कर्मणि गुणविधायकत्वमित्यत्र नियामकाभावात् सर्वेषां कर्म विधायकत्वे स्थिते विहितस्य कर्मणः पुनर्विधानं व्यर्थमिति पुनर्विधानसामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षया उत्तरोत्तरवाक्यविहितस्य कर्मणो भेदः सिध्यतीति एतादृशस्थलेषु अविशेषपुनः श्रुतिरूपाद्यजतिपदाभ्यासात् कर्मभेदः।**

**व्याख्या** - ''समिधो यजति''। अभ्यासाख्यं कर्म (धर्म) भेदकप्रमाणं दर्शयितुम् आरभते। अत्र आदि पदेन ''तनूनपातं यजति'' ''इडो यजति'' ''बहिर्यजति'' ''स्वाहाकारं यजति'' इत्येतानि वाक्यानि ग्राह्याणि। एतेषु पञ्चसु वाक्येषु एकस्य वाक्यस्य कर्मविधायकत्वे इतरेषां तत्र कर्मणि गुणविधायकत्वे नियामकप्रमाणाभावेन सर्वाण्यपि पञ्चवाक्यानि कर्मविधायकानीति निर्णीते सति एकवारं विहितस्य कर्मणः पुनर्विधानं व्यर्थं स्यादिति पुनर्विधानसामर्थ्यात् पूर्ववाक्येन विहितात् कर्मणः सकाशात् अपरेण वाक्येन विहितं यत् कर्म तदवश्यं भिन्नमिति सिध्यति। अतः एतादृशस्थलेषु अविशेषपुनःश्रुतिरूपात् ''यजति'' पदाभ्यासात् कर्मभेदो भवति। न विद्यते विशेषो यस्याः सा

अविशेषा, अविशेषा चासौ श्रुतिश्चेति अविशेषपुनःश्रुतिः। ''यजति'' पदस्य पुनरुक्त्या (अभ्यासेन) अत्र कर्मभेदो भवति। तस्मात् पञ्चभिर्वाक्यैर्विहितानि पञ्चकर्माणि परस्परं भिन्नानीति विज्ञेयम्।

**संख्ययाकर्मभेदः**

**मूलम् - ''तिस्त्र आहुतीर्जुहोति'' इत्यत्र जुहोतिपदाभ्यासाभावेऽपि जुहोतीत्यर्थे होमे त्रित्वसंख्याऽन्वयात् परस्परं भिन्नास्त्रयो होमा इति संख्ययाऽत्र कर्मभेदः।**

**व्याख्या** - ''तिस्त्र आहुतीर्जुहोति''। अस्मिन् वाक्ये जुहोति पदस्य अभ्यासात्मकपुनरुक्त्यभावेऽपि होमार्थकेन ''जुहोति'' पदेन सह ''त्रित्वसंख्याया'' अन्वयात् परस्परं भिन्नाः ''त्रयो होमाः'' इत्यर्थो भवति। अतः ''संख्या'' संज्ञकेन प्रमाणेन अत्र कर्मभेदो जातः इति विज्ञेयम्।

**संज्ञया कर्मभेदः**

**मूलम् - ''अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्त्रदक्षिणेन यजेत'' इति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योतिराख्यानां त्रयाणां यागानां ज्योतिष्टोमसंज्ञापेक्षया पृथक् संज्ञाकरणात् ज्योतिष्टोमापेक्षया भेदः। भिन्नसंज्ञावशादेव त्रयाणां परस्परं भेद इति संज्ञया कर्मभेदः।**

**व्याख्या** - ''अथैष'' इति। ''अथैष ज्योतिः'' इति वाक्येन उक्तानां ज्योतिः - विश्वज्योतिः-सर्वज्योतिः इति संज्ञकानां त्रयाणां यागानां ज्योतिष्टोमप्रकरणे पाठे सत्यपि ज्योतिष्टोमसंज्ञापेक्षया उक्तानां त्रयाणां यागानां पृथक्संज्ञाकरणात् ज्योतिष्टोमसंज्ञकाद् यागात् तेषां भेदः। एवं च पृथक् संज्ञावशात् एतेषां त्रयाणां परस्परं भेदो जातः। तेन अत्र ''संज्ञया'' कर्मभेद इति वेद्यम्।

**गुणात्मकर्मभेदः**

**मूलम् - तथा ''तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्'' इत्यत्र ''वैश्वदेवी'' इति वाक्ये विश्वदेवदेवताऽऽमिक्षाद्रव्यसम्बन्धानुमितो यागो विधीयते। ''वाजिभ्यो वाजिनम्'' इत्यत्रापि वाजिदैवत्य-वाजिनद्रव्यकं कर्मान्तरं विधीयते। न तु पूर्वविहिते वैश्वदेवयागे वाजिनद्रव्यरूपो गुणो विधीयते पूर्वयागस्यऽऽमिक्षागुणावरुद्धत्वेन तत्र वाजिनस्य निवेशायोगात्। न च व्रीहियववद्विकल्पः। वाजिनमामिक्षयोः समशिष्टत्वाभावात्, विषमिशिष्टयोर्विकल्पायोगात्। वैश्वदेवयागोत्पत्तिवाक्ये एवामिक्षागुणः शिष्यत इत्युत्पत्तिशिष्टः। शिष्यते विधीयते इत्यर्थः।**

**वैश्वदेववाक्यादुत्पन्ने कर्मणि वाक्यान्तरेण शिष्टो विहितो वाजिनगुण उत्पन्नशिष्टः। तयोर्मध्येह्युत्पत्तिशिष्टः प्रबलः, कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन प्राप्तत्वात्। उत्पन्निशष्टो वाजिनगुणोऽनन्तरं प्रमितोऽपि विलम्बितत्वेन दुर्बलत्वात् तत्पूर्वकर्मणि निवेशमलभमानो वाजिनरूपदेवतान्तरसम्बन्धात् स्ववाक्यस्य कर्मान्तरविधायक-त्वमानयतीति गुणाद्भेदः। तत्र घनीभूतं पय आमिक्षा, शिष्टं जलं वाजिनम्।**

**व्याख्या** - ''तथेति''। ''तप्ते पयसि दध्यानयति'' अत्र स्थले ''सा वैश्वदेव्यामिक्षा'' इति वाक्यं द्रव्य - (आमिक्षा) देवता - (विश्वदेव) सम्बन्धेन अनुमितस्य यागस्य विधायकमस्ति। तथैव ''वाजिभ्यो वाजिनम्'' इति वाक्येन वाजिदेवताकवाजिनद्रव्यकस्य च कस्यचित् यागान्तरस्य विधानं क्रियते। अत्र विश्वेदेवा इति देवता, आमिक्षा इति द्रव्यम्, तयोः सम्बन्धः, तेन अनुमितः विश्वेदेवदेवतासम्बन्धानुमितः वैश्वदेवयागः इति।

पूर्वविहिते वैश्वदेवसंज्ञके यागे वाजिनद्रव्यात्मकस्य गुणस्य विधानं न सम्भवति। यतो हि पूर्वविहितो वैश्वदेवाख्यो यागः, आमिक्षाख्येन गुणेन सम्बद्धः (अवरुद्धः)। तेन तत्र यागे वाजिनाख्यगुणस्य सन्निवेशो न भवितुमर्हति। व्रीहि-यववत् अत्र विकल्पोऽपि न सम्भवति। यतो हि - वाजिनाख्यद्रव्यस्य - आमिक्षाख्यद्रव्यस्य च समशिष्टत्वं (समानबलत्वं) नास्ति। द्वयोः विषमशिष्टत्वम् (प्रबल-दुर्बलभाववत्वं) अस्ति। तस्मात् विषमशिष्टयोः पदार्थयोर्विकल्पो नैव भवति। विकल्पस्तु समशिष्टयोरेव भवति। वैश्वदेवयागस्य उत्पत्तिवाक्ये एव ''आमिक्षाख्यो'' गुणः विहितोऽस्ति,

अतः स उत्पत्तिवाक्यशिष्टोऽस्ति। शिष्टः नाम विहित इत्यर्थः। ''सा वैश्वदेव्यामिक्षा'' इति वैश्वदेववाक्यात् उत्पन्ने (विहिते) कर्मणि, अपरेण (केनचिदन्येन) वाक्येन विहितः यो वाजिनगुणः स उत्पन्नशिष्टः (उत्पन्नवाक्यविहितः) अस्ति। उत्पत्तिशिष्टोत्पन्नशिष्टयोर्मध्ये उत्पत्तिशिष्टः प्रबलः, यतो हि सः कर्मोत्पत्तिसमय एव कर्माङ्गत्वेन विज्ञातो भवति। उत्पन्न शिष्टो ''वाजिनगुणः'' पश्चात् ज्ञातोऽपि विलम्बितत्वेन दुर्बलो भवति। तेन तस्य वैश्वदेवयागे निवेशाभावात् वाजिरूपदेवतान्तरेण सह सम्बन्धो भवति। ''वाजिभ्यः'' इति चतुर्थ्या ''वाजिरूपा'' देवता ज्ञायते। तस्मात् ''वाजिभ्यो वाजिनम्'' इति वाक्येन पूर्वोक्ताद् वैश्वदेवयागाद् ''वाजिनयागो भिन्न इति बोध्यते।''

''वाजिभ्यो वाजिनम्'' इति वाक्यं गुणप्रमाणबलेन कर्मान्तरस्य विधानं करोति। एवञ्चात्र ''गुणात् कर्मभेद'' इति विज्ञेयम्। तप्ते पयसि दधिमिश्रणानन्तरं यत् घनीभूतं पयः स ''आमिक्षा'' इत्युच्यते। तत्र अवशिष्टं च जलं ''वाजिनम्'' इत्युच्यते।

**''प्रकरणान्तरात्मकर्मभेदः''**

**मूलम् - तथा कुण्डपायिनामयने श्रूयते - ''उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति'' इति। अत्र पूर्वं कर्म किञ्चिदपि सन्निहितं न भवति अपूर्वकर्मसन्निधानरूपात् प्रकरणान्तरात् प्रसिद्धाग्निहोत्रधर्मकं तन्नामकं कर्मान्तरं विधीयते, नत्वग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्य गुणविधिः। प्राप्ते कर्मणि आनन्तर्य-मासरूपानेकगुणविधौ वाक्यभेदापत्तेरिति प्रकरणान्तरादत्र कर्मभेदः। प्रसिद्धाग्निहोत्रं नैयमिकाग्निहोत्रम् - नित्याग्निहोत्रमिति यावत्। तदेवं शब्दान्तराभ्यास-संख्या-संज्ञा-गुण-प्रकरणान्तरैः कर्मभेदो दर्शितः। इति कर्मभेदनिरूपणम्।**

**व्याख्या** - ''तथेति''। ''कुण्डपायिनामयनम्'' इति नामके सत्रयागे श्रूयते ''उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति'' इति। ''अहीनः'' ''सत्रं'' चेति सोमयागस्य द्वौ प्रकारौ। तत्र द्व्यहप्रभृतिद्वादशाहपर्यन्तो ''अहीना'' इत्युच्यन्ते। त्रयोदशरात्रप्रभृति-सहस्रसंवत्सरपर्यन्तानि रात्रिसत्राण्युच्यन्ते। ''कुण्डपायिनामयन'' नामकं संवत्सरसाध्यं सत्रम्। अस्मिन् सत्रप्रकरणे उक्तं ''उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति'' - ''उपसत्'' संज्ञकं कर्म कृत्वा मासं यावत् ''अग्निहोत्र'' - कर्मणः अनुष्ठानं कर्तव्यम् - इत्यस्य वाक्यस्य सन्निधौ किमपि कर्म पूर्वं नाभिहितम्। तेन अपूर्व-कर्मसन्निधानात्मकेन प्रकरणान्तरेण प्रसिद्धस्य अग्निहोत्रकर्मणः धर्मैर्युक्तम् अन्यदेव अग्निहोत्रसंज्ञकं कर्म अनेन वाक्येन विधीयते। अर्थात् - ''उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति'' इत्यनेन वाक्येन ''यावज्जीवमग्निहोत्रं जुहोति'' इति वाक्यप्रसिद्धम् ''अग्निहोत्रसंज्ञकं कर्म अनूद्य गुणविधानमिति न मन्तव्यम्।'' यतो हि प्राप्ते कर्मणि - ''उपसद्यागानन्तरत्व'' मित्येकस्य गुणस्य ''मासात्मककालत्व'' मित्यपरस्य गुणस्य विधाने कृते सति अनेकगुणविधानात्मको वाक्यभेदाख्यो दोषः समुत्पद्येत भिन्नप्रकरणत्वात्। अतः ''प्रकरणान्तरा'' ख्येन प्रमाणेन अत्र कर्मभेद इति बोद्धव्यम्। प्रसिद्धाग्निहोत्रं हि नित्याग्निहोत्रम् नैयमिकाग्निहोत्रमिति यावत्। नियमेन कर्तव्यमिति नैयमिकम्। नैयमिकं नाम नित्यम्। एवं च प्रकरणान्तरमेव अत्र भेदहेतुः। प्रसिद्धं च तत् अग्निहोत्रं च प्रसिद्धाग्निहोत्रम्। तस्य धर्मा इव धर्मा यस्य तत् प्रसिद्धाग्निहोत्रधर्मकम्। तदेवं (१) ''शब्दान्तरम्'' (२) अभ्यासः (३) संख्या (४) संज्ञा (५) गुणः (६) प्रकरणान्तरम् इत्येतैः कर्मभेदप्रमाणैः कर्मभेदः प्रदर्शितः। इत्थं मीमांसाशास्त्रस्य द्वितीयाध्यायप्रतिपाद्य-विषयस्योपसंहारं प्रदर्शयितुम् ''इति कर्मभेदनिरूपणम्'' इत्युक्तमस्ति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) यागदानहोमानां .......... कर्मभेदः। (संज्ञया, अभ्यासात्, शब्दान्तरात्)

(२) स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं ..........। (होमः, यागः, दानम्)

(३) अविशेषपुनः श्रुतिः ..........। (संज्ञा, अभ्यासः, गुणः)

(४) ''अथैषज्योतिः अथैषविश्वज्योतिः इत्यादिकम् .......... प्रकरणे श्रूयते।''

(दर्शपूर्णमास, अग्निहोत्र, ज्योतिष्टोम)

(५) ''वाजिभ्यो वाजिनम्'' इत्यत्र .......... कर्मभेदः। (संज्ञया, गुणात्, अभ्यासात्)

(६) घनीभूतं पयः ..........। (वाजिनम्, आमिक्षा, दधि)

(७) कर्मभेदकानि प्रमाणानि .......... सन्ति। (पञ्च, सप्त, षट्)

(८) द्व्यहप्रभृति द्वादशाहपर्यन्ता ..........। (सत्राणि, अहीनाः, अहोरात्रम्)

(९) ''अग्निहोत्रं जुहोति'' इति .......... वाक्यम्। (नित्यं, नैमित्तिकं, काम्यं)

(१०) मीमांसाशास्त्रे कर्मभेदनिरूपणं .......... अध्याये अस्ति। (प्रथम, पञ्चम, द्वितीय)

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) कर्मभेदकप्रमाणानि कानि?

(२) यागो नाम कः?

(३) कः होमः?

(४) विश्वेदेवदेवताकं द्रव्यं किम्?

(५) शिष्यते इत्यस्य कोऽर्थः?

(६) किं नाम वाजिनम्?

(७) ''कुण्डपायिनामयनम्'' कीदृशं सत्रम्?

**३. द्वित्रवाक्यैः उत्तराणि लिखत।**

(१) समिधादि पञ्चप्रयाजयागाः के?

(२) ''तप्ते पयसि दध्यानयति'' सा वैश्वदेव्यामिक्षा इत्यस्य कोऽर्थः?

(३) ''उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति'' इत्यस्य विवरणं कुर्वन्तु?

(४) ''तिस्र आहुतीर्जुहोति'' इत्यत्र कस्माद् कर्मभेदः?

(५) ''यागदानहोमादीनां'' कस्माद् कर्मभेदः?

**४. टिप्पणीं लिखत।**

(१) ''उत्पत्तिशिष्ट-उत्पन्नशिष्टयोर्मध्ये उत्पत्तिशिष्टः प्रबलः।''

(२) ''आनन्तर्य-मासरूपानेकगुणविधौ वाक्यभेदः।''

(३) ''संज्ञया कर्मभेदः।''

**५. निबन्धात्मकमुत्तरं लिखत।**

(१) गुणात् कर्मभेदं सोदाहरणं निरूपयत।

(२) प्रकरणान्तरात् कर्मभेदं प्रतिपादयत।

(३) अभ्यासात् कर्मभेदः कथं सिध्यति?

●

# १७ प्रमेयादिविचारः

**प्रस्तावना**

महर्षिजैमिनिप्रणीते पूर्वमीमांसाशास्त्रे चतुर्थाऽध्याये क्रत्वर्थ-पुरुषार्थौ विचार्येते। क्रत्वर्थ-पुरुषार्थपदाभ्यां प्रयोज्य-प्रयोजकभावौ विवक्षितौ। अङ्गं प्रयोज्यं भवति, अङ्गी च प्रयोजकः। प्रयोज्यम्-अनुष्ठाप्यम्, प्रयोजकश्चानुष्ठापकः। प्रयोज्य-प्रयोजकत्वसिद्धयेऽङ्गाङ्गिभावनिरूपणमावश्यकमिति तृतीयाऽध्याये तं विचार्य सम्प्रति-क्रत्वर्थ-पुरुषार्थौ (प्रयोज्य-प्रयोजकभावौ) विचार्येते।

**क्रत्वर्थ-पुरुषार्थयोर्विचारः**

**मूलम् - तत्र वेदादिप्रमेयोऽर्थस्त्रिविधः - क्रत्वर्थः, पुरुषार्थः, उभयार्थश्चेति। तत्र प्रयाजादिकं केवलं क्रत्वर्थः, फलं तत्करणं च पुरुषार्थः, उभयार्थश्चेति। तत्र प्रयाजादिकं केवलं क्रत्वर्थः, फलं तत्करणं च पुरुषार्थः, यथा-ज्योतिष्टोमादिः, स्वर्गश्य। दध्नादि तूभयरूपम् - ''दध्ना जुहुयात्'' इति फलासंयुक्तवाक्येन क्रत्वर्थत्वात्, ''दध्नेन्द्रियकामस्य जुहुयात्'' इत्येनन फलाय विधानात् पुरुषार्थत्वात्। तदुक्तम् - ''एकस्य तूभयरूपत्वे संयोगपृथक्त्वम्'' इति (पू.मी., अ-४, पा-३, अधि.-३३ सू-३)**

**संयोगे वाक्यं, तस्य पृथकत्वं भेदः, एकस्य उभयार्थत्वे नियामक इत्यर्थः।**

**व्याख्या** - ''तत्रेति''। वेदेन, स्मृत्या, शिष्टाचारेण च प्रतिपादितोऽर्थः (प्रमेयः) त्रिविधः - (१) क्रत्वर्थः, (२) पुरुषार्थः (३) उभयार्थः इति। तत्र प्रयाजादिकं केवलं क्रत्वर्थः। फलं तत्साधनं (तत्करणं) च पुरुषार्थः। यथा - स्वर्गादिः, ज्योतिष्टोमादिश्च। दध्यादि तु उभयार्थम् (उभयरूपम्) अस्ति। यतो हि ''दध्ना-जुहोति'' इति वाक्यं फलेन असंयुक्तमस्ति, इति कृत्वा ''दधि'' क्रत्वर्थम्, तथैव ''दध्नेन्द्रियकामस्य जुहुयात्'' इति वाक्येन दध्नः फलार्थत्वेन विधानात् पुरुषार्थत्वमपि अस्ति। तदुक्तम् - ''एकस्य तूभयत्वे संयोगपृथकत्वम्'' यदा एक एव पदार्थः उभयार्थी भवति, तदा स संयोगपृथक्त्वन्यायस्य विषयो भवति। ''संयोगो'' नाम वाक्यम्, ''पृथक्त्वं'' नाम भेदः। स वाक्यभेदः एकस्य पदार्थस्य उभयार्थत्वे नियामको भवति।

**मूलम् - क्रत्वर्थे प्रयाजादौ क्रतुः प्रयोजकः। पुरुषार्थे फलं प्रयोजकम्। प्रयोजकत्वं नाम - अनुष्ठापकत्वमित्यर्थः।**

**व्याख्या** - ''क्रत्वर्थे इति''। ''प्रयाजादयः'' क्रत्वर्थाः, यतो हि तेषां प्रयोजकः ''क्रतुः'' भवति। ''ज्योतिष्टोमादयः'' पुरुषार्थाः, यतो हि तेषां प्रयोजकं ''फलं'' भवति। प्रयोजकत्वं नाम अनुष्ठापकत्वम्।

**मूलम् - विधिर्यदर्थं यदनुष्ठापयति स तत्र प्रयोजकः, दर्शादिविधिः स्वर्गार्थं दर्शादिकमनुष्ठापयतीति स्वर्गादिः दर्शादौ प्रयोजकः। प्रयाजादिविधिः प्रयाजान् दर्शाद्यर्थम् अनुष्ठापयतीति दर्शादिः प्रयाजानां प्रयोजकः। दध्यानयनविधिः दध्यानयनमामिक्षार्थमनुष्ठापयति, न वाजिनार्थम्, आमिक्षार्थं दध्यानयनानुष्ठाने सति वाजिनस्य स्वतः सिद्धत्वात्, अत आमिक्षैव दध्यानयने प्रयोजिका न वाजिनम्। ''पुरोडाश कपालेन तुषानुपवपति'' इति तुषोपवापाङ्गत्वेन पुरोडाशकपालं विधीयते, तथापि तुषोपवापः कपालस्य प्रयोजको न भवति, पुरोडाशार्थंमुपात्तेनैव कपालेन तुषोपवापसिद्धेः, किन्तु पुरोडाश एव कपालस्य प्रयोजक इत्याद्यूह्यम्।**

**व्याख्या** - ''विधिरिति''। यद् विधिवाक्यं यस्मै प्रयोजनाय यत् कर्म अनुष्ठापयति तत्प्रयोजनमेव तस्य कर्मणः प्रयोजकं भवति। यथा - ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इति विधिः स्वर्गप्रयोजनाय दर्शादिकर्म अनुष्ठापयति, तेन स्वर्गादिप्रयोजनमेव दर्शादिकर्मणां प्रयोजकमिति विज्ञेयम्। प्रयाजाद्यङ्गकर्मविधिः दर्शादिकर्म निष्पादनार्थं प्रयाजाद्यङ्गकर्म अनुष्ठापयति, तेन दर्शादिकर्म प्रयाजाद्यङ्गकर्मणां प्रयोजकं भवति। ''तप्ते पयसि दध्यानयति'' इति दध्यानयनविधिः ''आमिक्षार्थं'' दध्यानयनम् अनुष्ठापयति, न तु वाजिनार्थम् यतो हि आमिक्षार्थं

दध्यानयने अनुष्ठिते सति वाजिनं स्वतः सिद्धं भवति। अतः दध्यानयने ''आमिक्षैव'' प्रयोजिका अस्ति। वाजिनं न तत्र प्रयोजकम्। ''पुरोडाशकपालेन तुषानुपवपति'' - पुरोडाशकपालेन तुषाणां निष्कासनम् (उपवपनम्) कुर्यात्, इति वाक्येन पुरोडाशकपालं तुषोपवापाङ्गत्वेन विहितमस्ति। अर्थात् पुरोडाशकपालं तुषोपवापस्य अङ्गमस्ति, तथापि तुषोपवपनं पुरोडाशकपालस्य प्रयोजकं न भवति। यतो हि - पुरोडाशार्थं गृहीतेनैव कपालेन तुषोपवापस्य सिद्धिर्भवति। अतः पुरोडाश एव कपालस्य प्रयोजक इति ज्ञेयम्।

**॥ इति प्रमेयादिनिरूपमणम् ॥**

**क्रमनिरूपणम्**

**मूलम् - ननु विधिना साङ्गं प्रधानं कर्तव्यतया चोच्यते। तत्राङ्गानां प्रधानानां च कर्मणां बहुत्वात् क्रमेणानुष्ठानं वाच्यम्। तत्क्रमनियामकं प्रमाणं किम्? इति चेत् न, श्रुत्यादीनामेव क्रमनियामकत्वात्।**

**व्याख्या** - ''नन्विति''। अनुष्ठानक्रमस्य निरूपणात् पूर्वं इयमाशंङ्का भवति यत् - विधिवाक्येन साङ्गं प्रधानं कर्म कर्तव्यत्वेन प्रतिपाद्यते। तथासति अङ्गकर्मणां प्रधानकर्मणां च बहुत्वात् तानि क्रमेणैव कर्तव्यानि भवेयुः। अतः तद्विषये क्रमनिर्धारणार्थं प्रमाणं किमिति शंङ्का उदेति।

अत्रेऽदं समाधानम् - यथा अङ्गानामनुष्ठाने क्रमः भवति तथैव प्रधानानामनुष्ठानेऽपि क्रमः भवति। केचन ''विततिविशेषम्'' क्रमं मन्यन्ते, अन्ये केचन पौर्वापर्यं क्रमं कथयन्ति। पूर्वापरभावेन ज्ञायमानानां पदार्थानां नैरन्तर्यं अर्थात् व्यवधानराहित्यमेव क्रमं कथयन्ति। क्रमस्वीकारस्य अभिप्रायोऽपि एष एवास्ति यत् एकस्य पदार्थस्य अनुष्ठानानन्तरं द्वितीयस्य पदार्थस्य अनुष्ठाने अधिकं व्यवधानं न भवेत्, येन च अव्यवस्था न स्यात्।

क्रमेणानुष्ठाने सति सर्वेषां समानमेव व्यवधानं भवति। कस्यचिदधिकं कस्यचिच्च न्यूनं न स्यात्। क्रमस्यास्य प्रमापकं प्रमाणमपि पूर्वमीमांसाशास्त्रे कथितमस्ति। तानि च प्रमाणानि-श्रुति-अर्थ-पाठ-स्थान-मुख्य-प्रवृत्तिरूपाणि षट्। एतेषां प्रमाणानाम् अनुसारमेव क्रमः अवबोध्यते। अतः एवं कथयितुं न शक्यते यत् - क्रमनियामकं किमपि प्रमाणं नास्तीति। यागप्रयोगस्य नियमे अर्थ मेव मीमांसादर्शनस्य आविर्भावः कृतोस्ति। शास्त्रेऽस्मिन् यागादीनां सूक्ष्मातिसूक्ष्मपदार्थानां विवेचनं कृतमस्ति।

**श्रुतिक्रमः**

**मूलम् - तथा हि ''अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति'' इत्यत्र क्त्वात्वाश्रुत्या गृहपति-दीक्षानन्तरं ब्रह्मदीक्षेति श्रौतक्रमः।**

**व्याख्या** - ''तथा हि''। ''अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति'' इत्यत्र ''क्त्वा'' श्रुतिः अस्ति, तद्बलात् गृहपतेः दीक्षानन्तरं ब्रह्मणो दीक्षा कर्तव्येति श्रौतक्रमः। अर्थात् ''क्त्वा'' श्रुतिप्रतिपादितः क्रमः। बहुयजमानके सत्रे स्वस्वासनेषूपविष्टेषु षोडशर्त्विक्षु यजमानासने उपविष्टो ''गृहपतिः'' इत्युच्यते।

**अर्थक्रमः**

**मूलम् - ''अग्निहोत्रं जुहोति यवागूं पचति'' इत्यत्र यवागूपाकस्य होमार्थत्वेन पाकात् पूर्वं होमस्य कर्तुमशक्यत्वात् पाठक्रमं त्यक्त्वाऽर्थक्रमः स्वीकर्तव्यः। अर्थः प्रयोजनं होमादिरूपं, तदर्थं क्रमः = अर्थक्रमः। तेन पूर्वं पाकः पश्चाद्धोमः।**

**व्याख्या** - ''अग्निहोत्रमिति''। ''अग्निहोत्रं जुहोति, यवागूं पचति'' इत्यत्र यवागूपाकः होमार्थः, तेन यवागूपाकात् पूर्वं अग्निहोत्रहोमस्य कर्तुमशक्यत्वात् श्रुतं ''पाठक्रमं'' त्यक्त्वा अर्थक्रमः स्वीकर्तव्यो भवति। ''अर्थो'' नाम प्रयोजनम्, तदर्थं यः क्रमः स अर्थक्रमः। अतः पूर्वं यवगूपाकः तदनन्तरम् अग्निहोत्रहोमः। इथ्थमनुष्ठानम् अर्थक्रमबलेन क्रियते। (यवागू = यविनर्मिता लप्सी)

**पाठक्रमः।**

**मूलम् - ''समिधो यजति'' ''तनूनपातं यजति'' इत्यादौ विधिवाक्यपाठक्रमादेव समिधादि - यागानुष्ठानक्रमः।**

**व्याख्या** - ''समिधो यजति'' ''इडोयजति'' ''बर्हिर्यजति'' ''स्वाहाकारं यजति'' ''तनूनपातं यजति'' इत्यत्र दर्शपूर्णमासाङ्गभूतानां पञ्चविधिवाक्यानां यादृशेन क्रमेण पाठः तेनैव क्रमेण समिधादियागानामनुष्ठानं कर्तव्यम्, अयं तावत् पाठक्रमः।

**स्थानक्रमः।**

**मूलम् - तथा - ज्योतिष्टोमे औपसथ्यमहरारभ्य क्रमेणानुष्ठेयानाम् अग्नीषोमीयसवनीयानुबन्ध्यानां पशूनां त्रयाणां साध्यस्काख्ये सोमयागे ''सह-पशूनालभते'' इत्येकदाऽनुष्ठानलक्षणं साहित्यं बोधितम्। तदपि सवनीयस्य स्थाने विहितम्। तत्र प्राकृतक्रमं परित्यज्य सवनीयस्य स्थाने साहित्यावधानादादौ सवनीयपशोरुपाकरणे ततोऽग्नीषोमीयस्य ततोऽनूबन्ध्याया इति स्थानात् क्रमः। सुत्यादिवसात् पूर्वमहरौपसथ्यम्।**

**व्याख्या** - ''तथेति''। तथा ज्योतिष्टोमयागे ''औपसथ्य'' दिनादारभ्य क्रमशः अनुष्ठेयानां (१) अग्नीषोमीय (२) सवनीय (३) अनुबन्ध्य-संज्ञकानां त्रयाणां पशूनां ''साध्यस्क'' संज्ञके सोमयागे ''सह पशून् आलभते'' इति वाक्येन एकस्मिन्नेव काले अनुष्ठानं कर्तव्यमिति साहित्यं प्रतीयते। तत् साहित्यं च सवनीयपशोः स्थाने विहितमस्ति। तत्र प्रकृतिभूतज्योतिष्टोमयागगतं क्रमं त्यक्त्वा सवनीयस्य पशोः स्थाने साहित्यविधानात् प्रथमं सवनीयस्य पशोः उपाकरणं, तदनन्तरमग्नीषोमीयस्य पशोरुपाकरणं, तदनन्तरम् अनुबन्ध्यस्य पशोरुपाकरणम् इति क्रमः ''स्थानप्रमाणेन'' अवगन्तव्यः। सुत्यादिवसात् पूर्वतनो दिवसः ''औपसथ्य'' इत्युच्यते। मूले ''औपसथ्यमहः'' इत्युक्तम्। तस्यायमाशयः- यागीयादेवता यागात् पूर्वस्मिन् दिने यजमानस्य गृहमागत्य निवसन्ति। तासां देवतानां स्थितिरूपो निवासः ''उपवसथ'' शब्देनोच्यते। तद्योग्यो दिवसः स औपसथ्यः। ज्योतिष्टोमस्य प्रधानदिने ''आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयपशुमुपाकरोति'' इति वाक्येन आश्विनग्रहस्य ग्रहणानन्तरं सवनीयः पशुर्विहितोऽस्ति। तस्मात् पूर्वस्मिन् दिने (औपसथ्यदिने) दीक्षासम्बन्धितस्य (दैक्षस्य) पशोः (अग्नीषोमीयस्य) विधानमस्ति। सवनीयस्य पशोरनन्तरमनुबन्ध्यस्य सोमयागस्य एकदिनसाध्यत्वात् तत्र ''सहपशूनालभते'' इतिवाक्येन पशुसाहित्यं यद्विहितमस्ति तत् तस्मिन् दिवसे क्रियमाणस्य सवनीयपशोः स्थाने कर्तव्यं भवति। पशूनां साहित्यं (सान्निध्यं) नाम पशुशरीरे स्थितानां सर्वेषामङ्गानां युगपत् अनुष्ठानम्। तत्र त्रयाणां पशूनां संस्कारः सवनीयपशोर्देशे (स्थाने) एव कर्तव्योऽस्ति। सवनीयपशोः स्थानं तु आश्विनग्रहस्य ग्रहणानन्तरः कालोऽस्ति। अतः आश्विनग्रह-ग्रहणानन्तरे काले अग्नीषोमीय-सवनीयाऽनुबन्ध्यसंज्ञकानां त्रयाणां पशूनां उपाकरणं (ज्वलदुल्मुकेन पर्यग्निकरणं) कर्तव्यम्। तत्र कतमस्य पशोरुपाकरणं प्रथमं कर्तव्यमिति सन्देहे उपाकरणस्य सवनीयस्थाने कर्तव्यत्वात् ''स्थानक्रमप्रमाणेन प्रथमं सवनीयपशोरेव उपाकरणं कर्तव्यम्। तदनन्तरमितरयोः। अत्र प्रथमं औपसथ्यस्य (अग्नीषोमीयस्य) ततः सवनीयस्य, ततः अनुबन्ध्यस्येत्येवं प्रकृतिगतक्रमस्य त्यागः कर्तव्य इति तात्पर्यम्।

**मुख्यक्रमः।**

**मूलम् - तथा दर्शे सान्नायधर्माणां शाखाच्छेदादीनां पूर्वम्, आग्नेयधर्माणां निर्वापादीनाञ्चानन्तरं प्रवृत्तावपि मुख्ययोराग्नेयसान्नाययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानान्मुख्ययागक्रमेण आदावाग्नेयपुरोडाशस्य प्रयाजशेषाभिधारणम्, ततः पयसोऽभिधारणम् इति मुख्ययागक्रमादभिधारणक्रमः।**

**व्याख्या** - ''तथेति''। तथैव दर्शयागे शाखाच्छेदनादीनां सान्नाय्यधर्माणां पूर्वं, निर्वापादीनामाग्नेयधर्माणां च अनन्तरं प्रवृत्तौ सत्यामपि मुख्ययोः आग्नेययाग - सान्नाययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानात् मुख्ययागक्रमेण प्रथमतः आग्नेयपुरोडाशस्य प्रयाजशेषाभिधारणम् (प्रयाजयागानुष्ठानं कृत्वा अवशिष्टस्य घृतस्य अभिधारणं क्षारणम्), तदनन्तरं दुग्धस्य अभिधारणमिति मुख्ययागक्रमात् अभिधारणक्रमो निर्धारितः।

**प्रवृत्तिक्रमः**

**मूलम् - तथा ''सप्तदश प्राजापत्यान् पशूनालभते'' इत्यत्र सप्तदशपशुद्रव्यकप्रजापतिदेवताकाः सप्तदश यागाः कर्तव्यत्वेन बोधिताः। तत्रोपकरणाख्यः पदार्थः यतः कुतश्चिदारभ्य यत्र क्वचित् समापनीयः,**

**नियोजनादिकन्तु येन क्रमेण उपाकरणं प्रवृत्तं तेनैव क्रमेण कर्तव्यम्। कथम् - प्रकृतावग्नीषोमीयपशोरेकत्वेन उपाकरणमादौ कृत्वा द्वितीयक्षणे एव नियोजनं तृतीयक्षणे एव प्रोक्षणम्, व्यवधानप्रयोजकाभावात्।**

**अत्र तु सप्तदशपशूनां सहानुष्टेयत्त्ववचनात् प्रथमतो यत्र क्वचित् पशौ कृतमुपाकरणं स्वाश्रयकर्तव्य नियोजनाय षोडशभिः क्षणैः व्यवधानं सहते, न त्वधिकम्। तत्रोपाकरणक्रमेण नियोजनं प्रथमपशावकृत्वा पश्वन्तरे नियोजनं कृत्वाऽनन्तरं प्रथमपशौ नियोजनकरणे षोडशक्षणाधिकव्यवधानं शास्त्राननुमतमापद्यते, तन्निरासायोपाकरणं येन क्रमेण प्रवृत्तं तेनैव नियोजनादिकं कार्यमिति प्रवृत्तिक्रमः।**

**व्याख्या** - ''तथेति''। ''सप्तदश पशूनालभते'' इत्यत्र सप्तदशपशुरूपद्रव्येण युक्ताः प्रजापतिदेवताकाः सप्तदशयागाः कर्तव्याः इति विधीयते। सप्तदशपशवः द्रव्याणि येषां ते सप्तदशपशुद्रव्यकाः। प्रजापतिर्देवता येषां ते प्रजापतिदेवताकाः। सप्तदशपशुद्रव्यकाश्च ते प्रजापतिदेवताकाश्च सप्तदशपशुद्रव्यकप्रजापतिदेवताकाः।

तत्र पशोः यूपे नियोजनाख्यः संस्कारः एकः, तस्य प्रोक्षणाख्यः संस्कारोऽपरः, पिपासाशमनार्थं जलदानाख्यः अपरः संस्कारः, जुहूपात्रेण अञ्जनकरणाख्यः संस्कारः, पर्यग्निकरणाख्यः संस्कारः, विशसनाख्यः संस्कारः इत्यादिषु पशुसंस्कारेषु ''उपाकरणाख्यः'' प्रथमः संस्कारः अनुष्ठेयोऽस्ति।

तत्र आद्यः (प्रथमः) उपाकरणाख्यः पशुसंस्कारः यस्मात् कस्माच्चिदपि पशोरारभ्य यस्मिन् कस्मिन्नपि पशौ समापनीयः। किन्तु यूपबन्धनात्मकनियोजनादयः संस्कारास्तु येन क्रमेण उपाकरणमनुष्ठितं तेनैव क्रमेण अनुष्ठेयाः। कथमिति चेत्? तथाहि - अग्नीषोमीयनामकपशुप्रकृतियागे अग्नीषोमीयाख्यः पशुरेक एवास्ति। तस्मात् एकस्य तस्य पशोः प्रथमतः उपाकरणं कृत्वा द्वितीयक्षणे एव नियोजनाख्यः संस्कारः, तृतीयक्षणे एव प्रोक्षणाख्यः संस्कारः क्रियते। यतोहि तत्र व्यत्यय (व्यवधान) करणार्थं किमपि निमित्तं नास्ति। किन्तु अत्र प्राजापत्ययागात्मकविकृतियागे तु सप्तदशपशूनां सहानुष्ठेयत्ववचनात् प्रथमतः यस्मिन् कस्मिंश्चित् पशौ अनुष्ठितमुपाकरणं, कर्तव्यत्वेन स्वसम्बन्धितानां नियोजनादिसंस्काराणां कृते षोडशभिः क्षणैः व्यवधानं सहते, नतु अधिकैः। यदि उपाकरणक्रमेण प्रथमपशौ नियोजनं न क्रियते अर्थात् पश्वन्तरेषु नियोजनं कृत्वा तदनन्तरं प्रथमपशौ नियोजनं क्रियते तर्हि षोडशक्षणाधिकक्षण-व्यवधानं स्यात्, तच्च शास्त्रानुमतं न भवेत्। अतः यस्य पशोः प्रथममुपाकरणं कृतं, तस्यैव उपाकरणाऽव्यवहितोत्तरक्षणे (सप्तदशक्षणे) यूपबन्धनात्मकं नियोजनं कर्तव्यम्।

उपाकरणसमये यः पशुः द्वितीयोऽस्ति, स एव नियोजनसमयेऽपि द्वितीय एव भाव्यः। तथैव तृतीयः चतुर्थः पञ्चमोभाव्यः। एवं सप्तदशपशुपर्यन्तं विज्ञेयम्। अयं ''प्रवृत्तिक्रमः'' अस्ति।

**मूलम् - इत्येवं श्रुत्यर्थ-पाठ-स्थान-मुख्य-प्रवृत्तिक्रमैरेव कर्मानुष्ठानम्। अन्यथानुष्ठाने वैगुण्यमित्यलम्।**

**व्याख्या** - एवं प्रकारेण श्रुति-अर्थ-पाठ-स्थान-मुख्य-प्रवृत्याख्यानां षण्णां क्रमबोधक-प्रमाणानां आधारेणैव कर्मणाम् (तत्तद्यागानाम्) अनुष्ठानं कर्तव्यम्। एतद्वैपरीत्याचरणे तु कर्मणां वैगुण्यं (क्रमभङ्गः) सम्पत्स्यते, येन च लौकिकं पारलौकिकं वा किमपि फलं न प्राप्यते।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) वेदादिप्रमेयः ..........। (चतुर्विधः, त्रिविधः, अनेकविधः)

(२) प्रयाजादिकं केवलं ..........। (पुरुषार्थः, क्रत्वर्थः, उभयार्थः)

(३) पुरुषार्थे .......... प्रयोजकम्. (कर्म, यागः, फलं)

(४) ''अध्वर्युर्गृहपतिं दीक्षयित्त्वा .......... दीक्षयति।'' (होतारं, उद्गातारं, ब्रह्माणं)

(५) ''समिधो यजति'' तनूनपातं यजति'' इत्यादौ ......... क्रमात् अनुष्ठानक्रमः। (अर्थ, पाठ, श्रुति)

(६) तत्रोपाकरणाख्यः ......... पदार्थः। (मध्यमः, अन्तिमः, आद्यः)

(७) तेन पूर्वं पाकः पश्चात् .........। (यागः, दानम्, होमः)

(८) तुषोपवापाङ्गत्वेन ......... विधीयते। (शूर्पः, परशुः, पुरोडाशकपालं)

(९) दर्शादौ प्रयोजकः .........। (पश्वादिः, स्वर्गादिः, पुत्रादिः)

(१०) दध्यादि तु ......... रूपम्। (एक, बहु, उभय)

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) ''दध्नेन्द्रियकामस्य जुहुयात्'' इति कीदृशं वाक्यम्?

(२) ''संयोगपृथक्त्वं कुत्र नियामकं भवति?''

(३) प्रयोजकः कः?

(४) कपालस्य प्रयोजकं किम्?

(५) विधिना किं कर्तव्यतया चोच्यते?

(६) क्रमनिर्णायकानि प्रमाणानि कानि?

(७) साद्यस्काख्यः कः यागः?

**३. द्वित्रवाक्यैः उत्तराणि लिखत।**

(१) क्रमस्यावश्यकतां लिखत।

(२) श्रौतक्रमं सोदाहरणं निरूपयत।

(३) पाठक्रमादनुष्ठानक्रमः कथं सिध्यति?

(४) ''सहपशूनालभते'' इत्यनेन के के यागाः विधीयन्ते?

(५) मुख्यक्रमात् क्रमनिर्णयं निरूपयत।

**४. टिप्पणीं लिखत।**

(१) ''संयोग-पृथक्त्वन्यायः''।

(२) ''पुरोडाशकपालेन तुषानुपवपति''।

(३) ''अग्निहोत्रं जुहोति यवागूं पचति''।

**५. निबन्धात्मकमुत्तरं लिखत।**

(१) क्रत्वर्थ-पुरुषार्थ-उभयार्थांश्च निरूपयत।

(२) प्रयोज्य-प्रयोजकभावं सोदाहरणं निरूपयत।

(३) प्रवृत्तिक्रमं सोदाहरणं प्रतिपादयत।

● ● ●